# पञ्चपादिकाप्रस्थानम्

# PANCAPADIKA-PRASTHANAM

(A CRITICAL APPRECIATION)

ADHYATMA PRAKASHA KARYALAYA,
HOLENARSIPUR.

अप्रथमोऽयं महान् प्रयत्नः सुरभारती-वाङ्मये पञ्चपादिकाटीकाप्रस्थानस्य सुमहद् वैलक्षण्यं भाष्यप्रस्थानतोऽस्ति, विरोध एव च क्वचित् प्रमेयविशेषसतत्त्वनिर्धारणे – इति सप्रमाणं निर्णेतुम् । महता आयासेन अत्र नैकानि भाष्यवाक्यानि सङ्कलितानि प्रकरण-प्रणेतृभिः श्रीश्री सच्चिदानन्देन्द्रसरस्वती-स्वामिभिः, यथोक्तं प्रस्थानविरोधावगमं दृढीकर्तुम् । आस्थितश्च प्रयत्नः पण्डित-प्रकाण्डान् सकलविद्यानिलयस्थप्राध्यापकांश्च विश्वासयितुं यथा स्वतन्त्रप्रस्थानत्वेनैव एतदुभयं प्रत्यभिज्ञाय भाष्यतट्टीकयोरसङ्करं पृथक्पृथक्पाठनप्रणालीप्रणयनेन शुद्ध-शाङ्करप्रस्थानसतत्त्वबोधः सुखतरो लाभ-प्रदश्च भवेदिति ॥

अध्यात्मग्रन्थावलिः

भाष्याशयवर्णने प्रस्थानभेदाः

तत्र

# पञ्चपादिकाप्रस्थानम्

भाष्यप्रस्थानसतत्त्वनिर्धारणार्थं

तुलनात्मकदृष्ट्या टीकापरिशीलनात्मकं प्रकरणम्

रचयितारः

श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः

क्रमाङ्कः १३४

प्रकाशनस्थानम्

अध्यात्मप्रकाशकार्यालयः

होळेनरसीपुरम्

१९६६

First Edition
1000 Copies

©

All Rights Reserved
by
The Adhyatma Prakasha Karyalaya
Holenarsipur

Registered under the Copy Right Act of 1957.

Printed in India
by
Y. Narasappa
at
The Adhyatma Prakasha Press
Holenarsipur.

## PUBLISHERS' NOTE

Readers of Swami Satchidanandendra Saraswatiji's *Sūtra Bhāshyārtha-Tattva-Vivecanī* and the *Vedanta Prakriyā Pratyabhijnā*, are well aware of the un-abated vigour with which he has been endeavouring to rescue S'aṅkara's Vedanta from later accretions by way of sub-commentaries and glosses as well as from misrepresentations of adverse critics. Here is his latest attempt to disentangle S'aṅkara's teachings from those of one of the traditional interpretations which have indistinguishably entwined themselves around for a long time.

Swamiji has done yeoman's service in this work in exposing the fallacies of argument that would persuade us to believe that S'aṅkara's Absolutism is one and the same as the system of the *Pañcapādikā* and other interpretations of Vedanta which are theological and speculative to a degree and invariably proceed from an ontological point of view. Let us hope that impartial criticism will prevail at long last and appreciate the worth of this invaluable contribution.

Assistance from the following donors has given us some relief in meeting the printing expenses of the work. Sri Jaya Vasudeva Sastry, Professor, Bhumareddy Engineering College, Hubli; Sri K.S. Srikantiah, Vanivilas Mohalla, Mysore; Srimati Lakshmi-

devamma, Mattur, Shimoga Dt., and a gentleman in Bombay who prefers to remain anonymous. We are deeply thankful to them all. Swamiji has asked us to record his Narayanasmaranams to these generous souls as well as to the Vidwans who have gone through the manuscript and offered useful suggestions.

Holenarsipur,
6-7-1966.

Y. NARASAPPA,
*Chairman, A. P. Karyalaya.*

# INTRODUCTION

—:§:—

## Vedantic Absolutism
### obscured by later commentators

After the traditional Absolutism had been placed on a firm footing by Gauḍapādācārya and especially by his grand-desciple S'aṅkarācārya, the ancient rival schools were almost all supplanted and the system held on for some time unchallenged in the field of Indian Philosophy. Innate tendency of the human mind, however, soon asserted itself, and Advaita Vedanta succumbed to the in-roads of realism in the garb of Advaita itself.

This time it was not a full-fledged rival system that attacked the traditional school, but two different systems that reconciled themselves to occupy the subordinate position of supplying critical expositions, called *Tīkās*, of S'aṅkara's Bhāshya so that they might infuse their own doctrines subtly into the dominent philosophy. This artifice was so very successful that the original system soon became inextricable from the teachings of these two rival, and in some respects even mutually opposed schools, and today Vedantins are nowise disconcerted to accept both of them as forming part and parcel of S'aṅkara's Advaita. The idea is, that there are no doubt some differences of opinion regarding certain doctrines relating to emperical truths, but these are due to the different means of approach employed to reveal the nature of Reality,

and do not matter at all so long as both the sub-schools are in perfect agreement about the nature of the Absolute. The critical student of Advaita is thus inevitably thrown into a state of perplexity as to what exactly is the system of S'aṅkara. Whether that great thinker actually agrees with this or that school, or has a system of his own distinct from both, continues to be an unsolved enigma to this day.

### THE SCOPE OF THE PRESENT WORK

A vast amount of Advaitic literature has grown up around the original works of these two branches, called *the Pañcapādikā* and *the Bhāmatī* respectively. There have appeared numerous original works, sub-commentaries and manuals, each supporting the doctrines of its own tradition and controverting those of writers in the other camp. The *Pañcapādikā* in particular, has a brilliant exposition by Prakās'ātma Yati, called *the Vivaraṇa*, which has almost cast the original work into the shade, so much so that this school now usually goes by the name of *the Vivaraṇa School*, after this famous work. It is *the Pañcapādikā* in particular that I have undertaken to examine in order to see how far the teachings of this sub-commentary, are in consonance with those of the Bhāshya.

### THE SCHOOLS TO WHICH THE PAÑCAPĀDIKĀ AND THE BHĀMATĪ ACTUALLY OWE THEIR ALLEGIANCE

I have already shown very briefly in my Introduction[1] to *the Vedanta-Prakriyā-Pratyabhijñā* (Section VII), how both the sub-schools differ from S'aṅkara,

1. Published separately under the title "*How to Recognize the Method of Vedanta*".

but my sole aim in that work was to clarify my position that all writers on Vedanta except Gauḍapāda, S'aṅkara and Sures'vara, have failed to recognize the only genuine method of Vedanta. The object of the present thesis is to show in detail how the originators of both these sub-schools professing to follow S'aṅkara, really owe their allegiance to different ancient schools of Vedanta quite distinct from S'aṅkara and at variance with it in many respects. That Vācaspati Mis'ra, the founder of the Bhāmati Tradition, has actually glossated on Maṇdana's *Brahma-Siddhi* from which he has freely borrowed and displayed many doctrines and even technical words, verbatim quotations or adaptations thereof in the *Bhāmati*, is too patent to be denied. Detailed substantiation of this allegation, has to be reserved for another occasion. This Mis'ra's predecessor, the author of *the Pañcapādikā* on the other hand, has doctrines foreign and even opposed to S'aṅkara's, to prove which we have to rely only on textual criticism but can trace them to no particular treatise of any school so far known. From a casual allusion found in *the Brahma-Siddhi*, however, we can gather that this school, which takes *Avidyā* to be the material cause of the Universe, was still flourishing independently during Maṇdana's time ; for he writes " तथा चोक्तम् अविद्योपादानभेदवादिभिः 'अनादिरप्रयोजना चाविद्या' इति " ('The supporters of the theory that *Avidyā* is the material cause of the manifold, aver that *Avidyā* is beginningless and serves no teleological purpose. ').

## THE PAÑCAPĀDIKĀ AND ITS AUTHOR

*The Pañcapādikā* (literally 'consisting of five *pādas*') is actually a fragmentary work containing the discussion of S'aṅkara's Sūtra Bhashya on the first four

Sūtras of Bādarāyaṇa. There are indeed evident indications, in the portion of the work available, that the author actually proposed to comment upon the whole of the Bhashya, but diligent search so far made, has not succeeded in unearthing anything beyond the *Tīkā* on the *Catus-Sutri* portion. Poetical works called *S'aṅkara-Vijayas*, ascribe the work to Padmapāda Ācārya, the direct disciple of S'aṅkara, but no trustworthy evidence internal or external has been so far adduced by any scholar to ratify this tradition. Nor do we have any reliable information about any other work safely assignable to the author. In his Foreword to the English translation of *the Pañcapādikā*, Sri B. Bhattacharya, General Editor of *the Gaekwad's Oriental Series*, (p. IX) writes that the second work attributed to Padmapāda is *the Ātmabodha Vyākhyāna* also called *the Vedanta Sāra*; but that work is neither widely known nor published yet. Nor can we be sure of the identity of the author of certain Tantric works attributed to Padmapāda by tradition. Indeed, we have to make sure in the first place that the Pañcapādikā is genuinely from the pen of Padmapāda, the direct disciple of S'aṅkara, before we hazard any further judgment respecting the author of the work.

## The Aim and Upshot of the Present Inquiry

I have already stated that the main object of the inquiry instituted in the present work, is to show that *the Pañcapādikā* really represents altogether a different school of Vedanta while it covertly poses to be a sub-commentary on a work propounding Vedantic Absolutism. I am quite aware that I am liable to be charged with sacrilege and blasphemy by the orthodox admirers of a book now universally ascribed to a holy

personage, the great Padmapāda himself. But I owe it to myself to declare openly before the earnest students of S'āṅkara-Vedanta, that we should be guilty of a greater sacrilege when we impute to the sacred names of the universally respected S'aṅkara and Gauḍapāda, repositories of genuine Vedantic tradition, doctrines which they would indignantly repudiate under any circumstances. Being convinced as I am of the disparity and even mutual opposition of these two systems, I have not hesitated to place them before my readers in their true perspective, and to disclose how we have been deceiving ourselves all these days, that the one is really an interpretation of the other. It is high time that we ceased stifling our conscience and boldly recognized the distinctive features of the mutually exclusive sets of teachings as such.

### Two systems that are as Poles asunder

I have summarized the cardinal tenets of each of these schools in the Sanskrit Introduction, so that one can see at a glance how, set against each other, they would visibly exhibit their diametrically opposite nature. It will be sufficient here to call attention to the fundamental differences in the very view-points from which they judge things. In the first place, S'aṅkara says that the final intuition of Brahman results from a rational co-ordination of partial intuitions ( श्रुत्यादयोऽनुभवादयश्च यथासम्भवम् इह प्रमाणम्, अनुभवावसानत्वात् भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य S. B. 1-1-2, p. 8), universal intuition being taken here as the one source of Vedantic knowledge. Knowledge arising from S'ruti-texts like 'That thou art' is immediate intuition of an existent fact which can never be doubted or denied. (अनुभवारूढं तु ज्ञानफलम् 'यत्साक्षादपरोक्षाद् ब्रह्म' इति श्रुतेः, 'तत्त्वमसि' इति च सिद्धवदुपदेशात्

S.B. 3-3-32, p. 407); नासौ नास्ति नाधिगम्यत इति वा शक्यं वदितुम्, 'स एष नेति नेत्यात्मा' इत्यात्मशब्दात्, आत्मनश्च प्रत्याख्यातुमशक्यत्वात् S.B. 1-1-4, p. 20). According to *the Pañcapādikā*, however, doubt is possible even in the case of direct knowledge of Ātman, and reason may have to be called in to rescue this knowledge from insecurity (सम्यग्ज्ञानमपि स्वविषये अप्रतिष्ठितम् अनवाप्तमिव भवति । तेन तत् स्वरूपप्रतिष्ठायै तर्कं सहायीकरोति । p. 91)[1]. In the second place, S'aṅkara is sure that final knowledge arising from listening to the Vedantic text being of the nature of ultimate intuition, identical with Brahman or one's own Self, takes one to the final goal itself and there remains nothing more to be achieved (तस्मात्, सर्वदुःखविनिर्मुक्तचैतन्यात्मकोऽहम् इत्येष आत्मानुभवः । न चैवम् आत्मानमनुभवतः किञ्चिदन्यत् कृत्यमवशिष्यते । S. B. 4-1-2, p. 463), whereas the author of *the Pañcapādikā* believes that repeated contemplation of that knowledge (ज्ञानाभ्यासः) has got to be practised (p. 97) before direct realization (साक्षात्कारः) accrues to the aspirant. Thirdly, while according to S'aṅkara, Ātman or the Self being an immediacy self-established, needs no proof for establishing its existence (न ह्यात्मा आगन्तुकः कस्यचित्, स्वयंसिद्धत्वात् । न ह्यात्मा आत्मनः प्रमाणमपेक्ष्य सिद्ध्यति । S. B. 2-3-7, p. 268), the author of *the Tīkā* grants (pp. 91-92) that even the immediateness of one's own Self may be questioned (असम्भावनाभिभूतविषयत्वात्). Again, S'aṅkara thinks that the validity of the Atman arising from listening to Vedantic texts like 'That thou art' can never be questioned since it is the final intuition of the non-dual Ātman (अपि चान्त्यमिदं प्रमाणम् आत्मैकत्वस्य प्रतिपादकम् । नातः परं किञ्चिदाकाङ्क्ष्यमस्ति । .... सर्वात्मैकत्वविषयत्वावगतेः । .... न चेयमवगतिरनर्थिका भ्रान्तिर्वा - इति शक्यं वक्तुम्; अविद्यानिवृत्तिफलदर्शनात्, बाधकज्ञानान्तराभावाच्च ॥ S. B. 2-1-14, p. 199), the author of

1. References in the brackets are to *the Brahma Sūtra Bhāshya* in the case of S'aṅkara and to the pages of the present work in the case of the *Pañcapādikā*.

*the Tīkā* falls back upon the theological postulate that the Veda being no product of the human mind (शब्दस्तावदपौरुषेयत्वाददुष्टः) is as valid a source of knowledge concerning an existent entity, as it is in the case of injunctions ( यथैव विधिवाक्यानाम् pp. 110–111) of rituals. Finally, for S'aṅkara *Avidyā* is only the mutual superimposition of the Self and the non-self, superimposition being understood to mean no more than mistaking one thing for another (अतस्मिन् तद्बुद्धिः), as for instance taking nacre for silver. This ignorance of course need not be proved, for it is recognized to be such as soon as pointed out, being within the experience of all of us (सर्वलोकप्रत्यक्षः). For the author of *the Pañcapādikā*, however, *Avidyā* is an undefinable inert potentiality of ignorance (अनिर्वचनीया जडात्मिका अविद्याशक्तिः) which clings to the very being of both the self and the external things, capable of transforming itself into an illusory object (p. 19) like the nacre-silver or the rope-snake. This *Avidyā* must be presumed to cling to the being of external things (तत्स्वरूपसत्तामात्रानुबन्धिनी), as otherwise we cannot account for the origin of illusory objects (p. 19 मिथ्यार्थावभासानुपपत्तेः). And in the case of the individual soul, we have to postulate this *Avidyā* on the strength of S'rutis which declare the identity of the soul with Brahman ; for, how else could we explain the absence of the knowledge of this identity except by supposing that *Avidyā* envelops the Brahmic effulgent nature (ब्रह्मस्वरूपप्रकाशाच्छादिका) of the individual self (p. 33) ?

It is obvious that S'aṅkara's is a rational system based upon universal intuition, and *Vidyā* and *Avidyā* in his scheme of arguments are quite intelligible to all who are familiar with the antipathy between knowledge and error in everyday life. The system offered by the writer of *the Pañcapādikā* on the other

hand, speculates on the basis of a hypothetical *Avidyā* presumed just to account for the appearance of illusory phenomena by a series of controvertible arguments with a view to justify the theological dogma that knowledge of Brahman destroys the world of duality of which the postulated *Avidyā* is the material cause. Who can deny, with such sharp differences of doctrines staring one in the face, that the so-called *Pañcapādikā (- Vivaraṇa ) School* offers us a conglomeration of teachings actually pertaining to different and discordant systems somehow fused into one ?

I have tried to array a number of quotations from the Sūtra-Bhāshya in the body of the present work and some more from the Upanishads and the Bhagavadgītā in the Appendix - as against each discrepant doctrine of *the Pañcapādikā* not only to reveal how antipathetic the latter is to the general trend of S'aṅkara's thought, but also to accumulate and present the many passages scattered in the various Bhāshyas on each particular subject so that they may serve as a source of ready reference to the earnest student of S'aṅkara. In the course of this critical study of *the Pañcapādikā*, I have sometimes adduced passages culled from *the Vivaraṇa, the Ishta-Siddhi, the Saṅkshepa S'ārīraka* and *the Bhāmatī* as well, in so far as they have any bearing on certain important topics discussed. I trust that these illustrations will be useful not only to convince oneself about the divergent and highly conflicting nature of the Post-S'āṅkara doctrines on particular subjects, but also to serve the purpose of a healthy stimulus to the study of the development of Vedantic thought.

### An Appeal to Pandits and Professors

If I have succeeded in some measure in bringing home to the intellectuals the disharmony which reigns

supreme in the realm of the present day Advaita Vedanta owing to the indiscriminate admixture of S'āṅkara and Post-S'āṅkara doctrines, I shall have been amply recompensed for my effort. I earnestly appeal to all scholars - Vedanta Pundits as well as University Professors - who may happen to be persuaded in this direction, to make an earnest effort to see that S'aṅkara's original system and the varieties of teachings contained in the sub-commentaries - such as *the Pañcapādikā*, *the Vivaraṇa*, *the Bhāmatī* or any other - are not mixed up in teaching, so as to allow Advaita Vedanta to continue a mere *pot-pourri* of incoherent ideas. Teachers of Vedanta in the public or private institutions would be really doing a great service to the cause of Advaita, or even Vedanta in general for that matter, if they immediately set about making united efforts in influencing the educational authorities to take active steps to adapt the syllabus so that the original system of S'aṅkara may be studied in its pristine purity before attempts are made to take up the developments in the sub-commentaries.

## ACKNOWLEDGMENT

My thanks are due to all generous souls that have helped to make this publication materialize, whether by going through the manuscript and offering suggestions or coming forward with financial aid to the Adhyatma Prakasha Karyalaya, which has, as usual, accepted the onerous responsibility of printing and publishing the work. May Bhagavan Narayana shower his benign blessings on them all.

Holenarsipur.
20-7-1966

**Swami Satchidanandendra Saraswati**

# अशुद्धिशोधनं ग्रन्थसंयोजनं च

**अ. = अधरोत्तरं गणने**

| पृष्ठे | पङ्क्तौ | स्थाने | पठनीयम् |
|---|---|---|---|
| ५ | अ. १० | का. | का. भा. |
| ७ | अ. ७ | युष्तत्प्र | युष्मत्प्र |
| ७ | अ. १ | भाष्यव्याख्यानयोर | भाष्येण व्याख्यानस्या |
| ९ | ३ | प्रत्यया | प्रत्ययत्वा |
| १० | ७ | भाष्यम् । .... वक्तृ | भाष्यम् .... ऽभिदधत् । |
| १३ | १० | कारसंपत्त्यर्थम् | कारिसिद्धयर्थम् |
| १५ | अ. ५ | तावदेकान्तेन | तावदयमेकान्तेन |
| १६ | अ. १३ | तद्धर्माणां च | परस्तात् संयोजनीयम् ' अध्यासः तद्विपर्ययेण विषयिणस्तद्धर्माणां च – |
| १६ | अ. ११ | मिथ्याभवितुं | मिथ्येति भवितुं |
| १७ | ७ | ऋजुव्याख्यान | ऋजुर्व्याख्यान |
| १७ | १२ | ग्रन्थमेवमवतरति | ग्रन्थानुवादे तत्परिहारावसरे च लिखति स्म |
| १७ | अ. ६ | प्रवृत्तयः | प्रवृत्तिलक्षणाः |
| १८ | अ. १ | स्वमावावपि | स्वभावे अपि |
| १९ | अ. ६ | तद्गत | तद्गतनिसर्ग |
| १९ | अ. ५ | स्वरूपानवभासं | स्वरूपावभासं |
| २४ | ४ | चेत्यन्योन्य | चेत्येवमन्योन्य |
| २७ | २ | लक्षणो .... नत्वन्यार्थे | लक्षणं ... न त्वन्यः, |
| २७ | अ.५-३ | तदेवम् .... इत्यर्थः | 'तदेवम् – इत्यर्थः' |
| २८ | अ. ८ | इति मू दूषितम् | इति परिहृतम् |
| २९ | अ. ५ | णीयस्य | णीयस्य (णीय ?) |
| ३० | १४ | तत् | तदेतत् |
| ३१ | अ. ३ | | अत्र संयोजनीयम् ' इत्याह ॥ ' |
| ३२ | अ. १४ | कल्पनं | कल्पनं तस्यैव |
| ३२ | अ. २ | रादिकारणं | रादि कारणं |
| ३३ | ४ | भाष्योक्तं | भाष्योक्ति |

| पृष्ठे | पङ्क्तौ | स्थाने | पठनीयम् |
|---|---|---|---|
| ३६ | ४ | र्थानिश्चायनम् | र्थनिश्चायनम् |
| ३६ | ५ | कस्यचिदर्थस्य | कश्चिदर्थं |
| ३७ | ८ | यत्तु | यस्तु |
| ३७ | अ. ७ | अनुदाहृतो | उदाहृता |
| ३८ | अ. ४ | इत्युक्तमत्र | इत्युक्तम् |
| ४१ | अ. १४ | पं. पा. १२२- | पं. वि. पा. १२२- |
| ४८ | २ | विद्याकर्म | विद्या'कर्म |
| ४८ | अ. १ | सू. भा. १-४-५ | सू. भा. ३-४-५ |
| ४९ | ७-८ | शब्दः प्रयुक्तः | शब्दार्थौ कण्ठरवेणोक्तः |
| ४९ | ११ | इति च | इति च पदे |
| ४९ | अ. ७ | समाहर | समाहार |
| ५० | ५ | पादिका | पादका |
| ६३ | १५ | प्रत्ययस्यैव | प्रत्ययगोचरस्यैव |
| ६५ | अ. ३ | दृष्टान्तः | दृष्टान्ताः |
| ७५ | ३ | अज्ञतीव | अम्रतीव |
| ७६ | अ. ६ | निमित्त | निमित्तान्तर |
| ७८ | ६ | वाध्यात् | वाध्यासात् |
| ७९ | अ. ३ | तदर्थापत्ति | तदर्थापत्तिलक्षण |
| ८१ | १३ | प्रवर्तनः | प्रवर्तकः |
| ८१ | १५ | मात्र | मात्रप्रवर्तकत्व |
| ८२ | १६ | प्रवर्तकः | प्रवर्तनः |
| ८२ | १६ | हेतुकं | हेतुत्वं |
| ८३ | अ. ११ | भवरूढ | भवारूढ |
| ८४ | अ. ९ | असूसुच | असुसूच |
| ८६ | २ | पा. ८ | पा. ८४ |
| ८६ | १२ | नमना | नमनना |
| ८७ | अ. ५ | बन्धकाः | बन्धिकाः |
| ८८ | १० | तच | स च |
| ९६ | अ. ४ | विमर्शिनी | विवेचनी |
| १०६ | अ. ६ | (९१) | (९३) |
| १०७ | अ. ३-२ | सर्पस्येव रज्जुपरतन्त्रस्य | सर्पस्य रज्जुपरतन्त्रत्वमेव यथा |
| १०८ | अ. ८ | समन्वयमेव प्रदर्शयन्ति | समन्वयमेव च प्रदर्शयितुं |

| पृष्ठे | पङ्क्तौ | स्थाने | पठनीयम् |
|---|---|---|---|
| १०९ | १३ | कारणं | कारणोपदेशं |
| १०९ | अ. १ | १-५-२४ | २-१-२४ |
| ११० | १० | श्रुत्यैक | श्रुत्येक |
| ११२ | १८ | निराकाङ्क्षत्वगति | निराकाङ्क्षावगति |
| १२२ | १० | वादेव | वादेन |
| १२४ | अ. ८ | प्यविद्याकर्तृ | ध्याविद्याकत्व |
| १२५ | २ | विपरिणामितं | विपरिणमितं |
| १२७ | अ. २ | एतन्मूला | एतन्मूलभूता |
| १२७ | अ. १ | स्वाभ्यूहितविद्या | स्वाभ्यूहिताविद्या |
| १२८ | ११ | छायात्मकः | छायात्मनः |
| १३१ | १३ | एवं रूपो | एवंरूपो |
| १३१ | अ. ८ | सर्वो | सर्वोऽपि |
| १३६ | अ. १ | ८-१-२, पा. ५९३. | ८-१२-१, पा. ५९६. |
| १३७ | अ. १० | आत्मस्वरूपं | आत्मा स्वरूपं |
| १४२ | ६ | कनु | को नु |
| १४४ | अ. ४ | सुषुप्त एव .... वाच्य | सुषुप्तमेव .... वाच्यम् |
| १४५ | अ. ९ | विजानीयुः सति, | विजानीयुः, सति |
| १४९ | अ. ८ | [अत्र ... इत्युक्तम् ] | अयं कंसान्तर्गतो भागः सप्तमोदाहरणेन संगमनीयः |
| १५२ | अ. ३ | एवं नामानो | एवंनामानो |
| १५४ | अ. ६ | व्यवहारे .... कल्पितौ | व्यवहारे ते .... कल्पिते |
| १५५ | अ. ११ | गीतासु | गीताभाष्ये |
| १५६ | अ. ४ | अदृष्ट्वा चेत् | अदृष्टवतश्चेत् |
| १५७ | ७ | इति | इत्युक्तं प्राक् |
| १६० | १४ | सूचितः । | सूचितः, |

# प्रस्तावना

—§O§—

## ग्रन्थस्वरूपम् , ग्रन्थकारसंस्तवश्च

विजानन्त्येव वेदान्तविद्वांसो यत् पञ्चपादिकेति नाम्ना प्रसिद्धो वेदान्तमीमांसासूत्रभाष्यटीकाखण्डः, श्रीशङ्करभगवत्पादानां साक्षाच्छिष्यत्वेन प्रख्यातानां श्री पद्मपादाचार्याणां कृतिः – इतीयं जनश्रुतिः पण्डितैरपि बहुयुक्त्युपबृंहिता अद्यापि तथ्यत्वेनैव विश्वस्यते महाजनेनेवेति । ग्रन्थोऽयं पूर्ण एव विरचितः कारणविशेषाद् दग्धावशिष्टोऽपूर्णः संजातः – इति शङ्करविजयस्था आख्यायिकापि अद्यतनग्रन्थावस्थोपपादकत्वेन केनचित् प्रकल्पितैवेति भाति । न हि ग्रन्थकर्त्रा व्याख्यानकारैर्वा कैश्चिदपि ईदृशी वार्ता परामृष्टा सूचिता वा इति । या तु प्रतिज्ञा समुपलभ्यते ग्रन्थशरीरे 'स्वावसर एवैतत् सुगतमतपरीक्षायां निपुणतरं प्रपञ्चयिष्यामः' (पा. ४०२), 'यथा आकाशस्य अक्षव्यापारमन्तरेणापि अपरोक्षता तथा दर्शयिष्यामः' (पा. ४१७), 'युक्त्याभासत्वं लेशतो दर्शितमेव देहाद्व्यतिरिक्तात्मपक्षं दर्शयद्भिः ; इतरेषां युक्त्याभाससिद्धत्वं स्वावसरे दर्शयिष्यामः ; दर्शितं च लेशतः, उत्तरोत्तरपक्षग्रहणकारणप्रदर्शनेन । वाक्याभासतां तु तत्र तत्राधिकरणे सिद्धान्तयिष्यन्तः प्रदर्शयिष्यामः ।' (पा. ८६१)–इत्येवम्, सा तु ग्रन्थकृता समग्रमेव भाष्यं व्याचिख्यासितमितीयन्मात्रं ज्ञापयेत्, न तु टीका सम्पूर्णैव विरचिता इत्यपि, असति तदुपपादकहेतौ इत्यन्यदेतत् । ग्रन्थस्य 'पञ्चपादिका' इत्यभिधानं तद्व्याख्यातृभिरेव कृतं न वा इत्येतदपि दुःशकमूहितुं सम्प्रति । '<u>विवरण-प्रबोधपरिशोधिनी</u>'प्रभृतिव्याख्याननिर्मातॄणाम् 'व्याख्यास्ये पञ्चपादिकाम्', 'विभजे पञ्चपादिकाम्', 'व्याकुर्वे पञ्चपादिकाम्' इत्यादिरूपा हि प्रतिज्ञा पारम्पर्यप्रसिद्धनाम्नैव ग्रन्थव्यपदेशमात्रम् इत्यप्युपपादयितुं शक्यते ; पञ्चपादान्तग्रन्थ एव तैर्व्याचिख्यासित इत्यत्र पर्याप्तप्रमाणाभावात्, अत्यर्वाचीनत्वात् तेषां व्याख्यातॄणाम्, चतुःसूत्री परिमिततयैव टीकायास्तद्व्याख्यानानां च समुपलभ्यमानत्वाच्च । <u>वेदान्तकल्पतरुकारै</u>र्वैश्वानराधिकरणे दहराधिकरणे च 'पञ्चपादीकृतस्तु', 'पञ्चपाद्यां तु' इति च परामृष्टो ग्रन्थः प्रकृतटीकाकाराणामेव तदन्यस्य वा कस्यचित् पञ्चपादीत्यभिधानीयकग्रन्थान्तरनिर्मातुः – इत्येतदप्यनिर्धारितमेवाद्यावधीति न स परामर्शः किञ्चिन्निर्वोढुमलं टीकापरिमाणनिर्धारणे । 'यत्पुनः, पदच्छेदपदार्थोक्त्यादिरूपव्याख्यानलक्षणपञ्चकसत्त्वात् व्युत्पत्तिलब्धोऽयमर्थः पञ्च पादाः, भागाः, अस्य सन्तीति पञ्चपादिका इति' इति ; तत्तु कस्याञ्चिदपि टीकायां लक्षणव्याप्तेः,

अतिप्रसञ्जकं व्याख्यानकौशलमिति भाति । एवं 'विस्तारार्थकपचिधातुतः, ज्ञानपदपर्यायगत्यर्थकपद्लृधातुतश्च शब्दनिष्पत्तिसमाश्रयणेन भाष्यटीकायाः विस्तारेण भाष्यार्थप्रतिपादकत्वात् पञ्चपादिकेति नाम इत्यपि वक्तुं शक्यते' इत्यभ्यूहनमपि अभ्यूहनमात्रमेवेति न तत्र वक्तव्यमवशिष्यते । मद्रासनगरीस्थितप्राचीनग्रन्थकोश संरक्षणशालायां राजकीयायां 'R. 3224' संज्ञाङ्किते देवनागरीलिप्यां लिखिते पुस्तके चतुस्सूत्रीभागादुपर्यपि कियद्भागपर्यन्तं व्याख्यानं दृश्यते – इत्येष वृत्तान्तो मद्रासर्वकारप्राच्यग्रन्थमालायां (Madras Government Oriental Series) प्रकाशिते सोपव्याख्यपञ्चपादिकापुस्तके शास्त्ररत्नाकरैः पोलकम् सु॰ श्रीरामशास्त्रिभिर्निर्मितायां भूमिकायां (पा॰ ९) लिखितमुपलभ्यते, तत्रापि परम् 'एवम् अज्ञातकर्तृके व्याख्याने पञ्चपादिकायाः चतुःसूत्र्या उपरितनभागस्य कस्यचित् व्याख्यातत्वेऽपि तद्व्याख्याने ईक्षत्यधिकरणशेषभागस्य उपरितनभागानां च अनुपलम्भः' (पा॰ १२) इति तैरेव शास्त्रिवर्यैर्लिखितं दृष्ट्वा मन्यामहे यावत् तदज्ञातकर्तृकम् आद्यन्तहीनं व्याख्यानं समग्रतया संपाद्य न प्रकाशयिष्यते, तावन्न किञ्चिदपि प्रकृतविषये अनुमातुं शक्यत इति । तदेवं टीकाग्रन्थः परिपूर्णतया विनिर्मितो वा न वा, पञ्चपादिकापर्यन्तमपि तथ्यत एव स प्रणीतो न वा, एतट्टीकाकाररचित चतुःसूत्रीभागादुपरितनभागगर्भितमपि पुस्तकं कुत्रचित् पुरातनपुस्तककोशरक्षणालये संगृहीतं स्यान्न वा – इत्येते प्रश्ना अनिर्णीता एवावतिष्ठन्ते अद्य यावत् इति स्थितम् ॥

एवमेव ग्रन्थकर्तृसंस्तवप्रश्नोऽपि तदवस्थ एवाद्यावधीति वक्तव्यम् । यावता टीकेयं भगवत्पादानां साक्षादन्तेवासिभिः पद्मपादाचार्यैरेव रचितेत्यत्र अत्यर्वाचीनशङ्करविजयकाव्यजातप्रामाण्यं मुक्त्वा नान्यत् प्रमाणं तदुपबृंहिकां युक्तिं वा उपलभामहे; नापि ग्रन्थशरीरे तद्व्याख्यानेषु वा कुत्रचिदपि एतदर्थोपष्टम्भकं विश्वासार्हं वचनं पश्यामः ॥

## ग्रन्थप्रतिपाद्यविषयाणां भाष्यानुसारित्वे संप्रतितनानाम् ऐककण्ठ्यम्

तिष्ठतु तावदियं ग्रन्थपरिमाणेयत्तायाः ग्रन्थकर्तृविशेषस्य च अशक्यनिर्णयताचिन्ता । टीकाप्रतिपाद्यवेदान्तार्थानां विषये तावत् सत्यपि स्फुटे वैलक्षण्ये तदीयाभिप्रायाणां भाष्यकाराभिप्रायेभ्यः, सर्वे एव पण्डितप्रकाण्डाः, तथा ग्रन्थसतत्त्वशोधकाः पाश्चात्यविमर्शकाः, तदनुसृतविचारसरणिमनुरुन्धाना अस्मद्देशीयविमर्शका अपि सर्वे, शङ्करभाष्यपञ्चपादिकयोरेकमेव प्रस्थानमङ्गीकृतम्, परिशीलितं च – इत्यवयन्ति । वेदान्तपाठनावसरे न केवलं प्राचीनपद्धत्यनुसारिणः पण्डिताः, किं तर्हि, सर्वकारानुमोदितविश्वविद्यानिलयस्था ग्रन्थशोधनकुशला अपि वेदान्तप्राध्यापकाः, सूत्रभाष्य-

स्थितमेव प्रस्थानं प्रक्रियान्तरेण व्याख्यानेऽपि विशदीक्रियते- इत्येव मन्यन्ते । तथैव च पाठनप्रणालिका सर्वत्रापि अद्य यावत् ऐकमत्येन स्वीकृता अस्तीति चित्रमेतत् ॥

किञ्चान्यत् वेदान्तप्रकरणनिर्मातारः पाठकाश्चाधुनातनाः पञ्चपादिका(विवरण) प्रस्थानम्, भामतीप्रस्थानम् - इति च विज्ञायापि प्रस्थानभेदं सर्वमप्येतद् भाष्यकार-मतमेवेत्युद्घोषयन्तो व्याख्यानोपव्याख्यानग्रन्थजातं परस्परविरुद्धाभिप्रायगर्भितं समुप-स्थापयन्ति शिष्याणां पुरतः, पाठयन्ति च जिज्ञासून् इत्याश्चर्याणामप्याश्चर्यमेतत् ॥

## प्रकृतग्रन्थनिर्माणे हेतुः

तदेवंविधां दुरवस्थाम् उपनीते वेदान्तमननप्रकारे, याथातथ्यतो भगवत्पादीय-सिद्धान्तविशेषं तदादृतं वेदान्तप्रक्रियाविशेषं च निर्दिधारयिषूणां कृते सूत्रभाष्यार्थ-तत्त्वविवेचनीं नाम भाष्यव्याख्यां भागशः प्रकटयितुमुद्युक्तः, वेदान्तप्रक्रियाप्रत्यभिज्ञां नाम विमर्शात्मकनिबन्धस्य प्रथमसंपुटं च पण्डितप्रकाण्डानां सविधे समर्पितवानहम् । इदानीं तु पञ्चपादिकाप्रस्थानं भाष्यप्रस्थानेन विरुद्धमेव क्वचित् प्रमेयविशेषेषु - इत्युपपादयितुं तुलनात्मकदृष्ट्या यथोक्तं प्रस्थानद्वयं परिशीलयितुमिच्छूनामुपकाराय प्रकृतं प्रकरणं प्रणीयम् ॥

व्याख्यानप्रस्थानयोरुभयोरपि परस्परविरुद्धप्रक्रियामाश्रितयोः, न केवलं भगव-त्पादसम्मता वेदान्तप्रक्रिया नादृता, यावत् बहवो भाष्यकारीया मुख्याभिप्रायाः स्वैरं विपरिणमिताः स्वोपज्ञप्रस्थानान्तरानुगुणा एव तु सुस्फुटं भाष्याशयविरुद्धा अपि भाष्यकारानुमतत्वेनोपस्थापिताश्च - इत्येतत् तत्तत्प्रमेयविचारावसरे - प्रस्थानग्रन्थ-भाष्यवाक्यानि विप्रकीर्णानि एकत्र संकलय्य - अत्र समुदाहृतानीत्यतो निःसंशयं हृदयमागच्छेत् भाष्यतद्व्याख्यानयोः परस्परविरुद्धप्रक्रियाश्रयणं वेदान्तार्थनिरूपणे इत्याशंसे ॥

## भाष्यप्रस्थानपञ्चपादिकाप्रस्थानयोः परस्परविरोधः

तत्र स्वप्रणीतपञ्चपादिकाभूमिकायाम् एवं लिखन्ति शास्त्ररत्नाकराः पोलकम् श्रीरामशास्त्रिणः–'भामतीविवरणप्रस्थानयोः उपेयभूतपारमार्थिकाद्वैतसिद्धान्तस्थापनैक-परमतात्पर्यवतोरपि तदुपायभूतव्यावहारिकप्रमेयविशेषे तात्पर्यभेदः ' (पा· ११६) इति; 'पद्मपादाचार्याः, भगवत्पादीयं विमलमौक्तिनिभं अद्वैतसिद्धान्तं भगवत्पादमुखादेव साक्षादवधारयन्तः पञ्चपादिकायां सुनिपुणम् उपपादयामासुः ' (पा १७) इति च । तत्र व्याख्यानप्रस्थानयोः परस्परविरुद्धयोरुभयोरपि भगवत्पादसंमतत्वेन स्वस्वाभिप्राय-मुपस्थापयतोर्मध्ये कतरद् भाष्यकारानुमतत्वेन कथं निर्धारणीयम् - इत्येतत् अन्यत्रैव परिशीलयितव्यमिति न तत्र किञ्चिदिह वक्तुमीहे । पञ्चपादिकाकाराः भगवत्पादीयं सिद्धान्तं विरुन्धन्ति न वा:-इत्येतन्निरूपणायैव प्रकृतप्रकरणस्यारम्भात्, प्रथमशारीरे

सोपपत्तिप्रदर्शितेषु विरोधेषु अत्र प्रामुख्येन दशैव अनुक्रमशः सङ्क्षिप्य वाचकानां पुरतः स्थापयिष्यामि ॥

(१) 'मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः'

इति भाष्ये सुस्फुटं व्यवहारस्य मिथ्याज्ञाननिमित्तत्वोद्घोषणे सत्यपि भाष्ये कुत्राप्यदृष्टचरम् 'अनिर्वचनीयम् अज्ञानम् मिथ्याज्ञानम्' इत्येतत् स्वीकृत्य, 'तन्निमित्तः, तदुपादानः' इति निमित्तशब्दस्य उपादानार्थतया स्वाभ्युपगतप्रक्रियापोषणार्थं व्याख्यानं प्रथमो विरोधः ॥ ' (पा. १९-२२).[1]

(२) 'कोऽयमध्यासो नाम ? उच्यते – स्मृतिरूपः परत्र पूर्वदृष्टावभासः ॥'

इति भाष्यस्य 'अध्यासो नाम अतस्मिंस्तद्बुद्धिरित्यवोचाम', 'मिथ्याप्रत्ययरूपः' इति चोदर्के विवरिष्यमाणस्यापि 'स्मर्यमाणरूपमिव रूपम् अस्य' इति स्मृतिशब्दं कर्मसाधनत्वेन व्युत्पाद्य अर्थाध्यासपरत्वेन वर्णनं द्वितीयो विरोधः ॥ (पा. २८)

(३) 'अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते ॥'

इति भाष्ये यथावर्णिताध्यासप्रहाणस्यैव ब्रह्मजिज्ञासासाक्षात्फलत्वेन कण्ठरवेणोक्तत्वेऽपि 'अशाब्दम् अविद्याविलयं मन्वानः श्रुतिन्यायकोविदो भगवान् भाष्यकारः विषयात् पृथङ् निर्दिशति।' इति वचनम्, 'विद्या उदितापि न प्रतिष्ठां लभते, असम्भावनाभिभूतविषयत्वात् .... तेन सम्यग्ज्ञानमपि स्वविषये अप्रतिष्ठितं अनवाप्तमिव भवति, तेन तत् स्वरूपप्रतिष्ठायै तर्कं सहायीकरोति' इति च सम्यग्ज्ञानेऽपि असम्भावनाया उपपादनं तृतीयो विरोधः ॥ (पा. ८३-९३). एतद्विरोधेन 'शाब्दज्ञानाभ्यासोऽपि विधिं विना साक्षात्काराय भवेत्' (पा. ९७) इत्यभ्युपगमलक्षणो भाष्यविरोधोऽपि अत्रानुसन्धेयः ॥

(४) 'न तावदयमेकान्तेनाविषयः, अस्मत्प्रत्ययविषयत्वात्'

इति भाष्यस्य अविषये अध्यासः कथम् ? – इत्येतदाक्षेपपरिहारायैव प्रवृत्तस्यापि 'नात्र विषयत्वमभिमतम्, किं तु अस्मत्प्रत्ययाभिमते अहङ्कारे व्यवहारयोग्यो भवतीति गौण्या वृत्त्या अस्मत्प्रत्ययविषयता उच्यते' इत्यसमञ्जसकल्पनं चतुर्थो विरोधः (पा. ८)। क्षेत्रज्ञनामसु प्राज्ञादिशब्दानां परमात्मवाचकानामपि परिगणनमपि भाष्यविरुद्धमत्रानुसन्धेयम् ॥

---

1. अत्र दत्ताः सङ्ख्याः प्रकृतग्रन्थपत्रपार्श्वसूचकाः ॥

(५) 'तमेतमेवंलक्षणम् अध्यासं पण्डिता अविद्येति मन्यन्ते, तद्विवेकेन वस्तुस्वरूपावधारणं विद्याम् आहुः'

इति सुनिश्चितार्थमपि भाष्यम् अध्यासस्याविद्यासंज्ञाविधायकं विद्यापदाध्यस्तबोधकं च अविगणय्य 'अध्यस्तोपादानभूताविद्याशक्तेरेवाविद्याशब्दवाच्यत्वेन कल्पनम् (पा. १९, ३३), अध्यस्तात्तद्द्रव्यसर्पविलयनं कुर्वद् वस्तुस्वरूपं रज्जुरेवेत्यवधारयद् विज्ञानं विद्या इति प्रसिद्धमेव लोके ब्रह्मविदो वदन्ति' (पा. ७३) इति स्वाभ्युपगतप्रक्रियानुगुणं तदर्थकल्पनं च पञ्चमो विरोधः । अविद्याकल्पितमायापराभिधानीयकस्य अव्याकृतस्यैव अविद्यात्वेन व्यापनलक्षणश्च भाष्यविरोधोऽत्रैवानुसन्धेयः ॥ (पा. ४७-५२)

(६) 'तमेतमविद्याख्यम् आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि ॥'

इति प्रमाणव्यवहाराणां शास्त्राणां च अविद्याख्याध्यासपुरस्सरैव प्रवृत्तिरिति भाष्येणोद्घोषितमप्यनादृत्य स्वाभिमताविद्याशक्तेरेव मुख्यवृत्तेन अविद्याशब्दवाच्यत्वं स्वीकृत्य तत्सत्त्वे दृष्टार्थापत्तिलक्षणप्रमाणोदाहरणम् (पा. १९, ३५), श्रुतितदर्थापत्युदाहरणं च षष्ठो विरोधः । 'कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादिप्रमाणानि' इति भाष्यस्य 'कथमविद्यावद्विषयाणि प्रमाणानि स्युः ?' (पा. ५९) इत्यप्रसक्तविषयचिन्तार्थकत्वेन विपरिणामश्चात्रैवानुसंधेयः ॥

(७) 'सता सोम्य तदा संपन्नो भवति', 'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्' इत्यादिश्रुत्यनुरोधेन

जीवस्य सुषुप्ते सद्ब्रह्मणा संपत्तिं भवति सूत्रभाष्ये (३·२·७) जाग्रत्येव स्वाभिमताविद्याशक्तेः परिणामविशेषोऽहङ्कार इति (पा. ४८), सा च सुषुप्तादौ अहङ्कारविक्षेपसंस्कारमात्रशेषं स्थित्वा पुनर्भवति' इति कल्पनम् (पा. ४०-४१) सप्तमो विरोधः ; विवरणादिग्रन्थेषूपलभ्यमानस्य 'सुषुप्तादौ स्वरूपानवभासव्यवहारोऽग्रहणमिथ्याज्ञानतत्संस्कारकर्मभ्योऽन्यदेव किञ्चित् प्रतिबन्धकमज्ञानं कल्पयति इत्यविद्यैव तत्राप्यस्ति' इति व्याख्यानस्य स्वीकारे तु पञ्चपादिका एतस्मिन्नंशे भाष्यविरोधिनीति स्फुटतरम् ॥

(८) 'तस्मात्, जन्मादिसूत्रं नानुमानोपन्यासार्थम्, किं तर्हि वेदान्तवाक्यप्रदर्शनार्थम्'

इति सूत्रे अनुमानसूचनं कण्ठरवेण निराकुर्वदपि भाष्यमनादृत्य 'युक्तिरपि लक्षणनिर्णये अर्थात् सूचितैव' (पा. १०७) इत्यवधारणम् अष्टमो विरोधः । तर्कः, अनुमानं वेदान्तैरविरुद्धम् ; तदर्थप्रतीतेरेव दृढत्वहेतुतया उपकरणम् अस्याः (मीमांसायाः) (पा. १०६) इति तर्कस्यापि अनुमानत्वेन वर्णनमपि अत्रानुसंधेयम् ॥

(९) समन्वयसूत्रभाष्ये 'सदेव सोम्य', 'आत्मा वा इदमेक एव' इत्यादिजगत्कारणवाक्याभ्यां साकमेव वाक्यान्तरोदाहरणं दृष्ट्वापि 'जन्मादिसूत्रे ब्रह्मणो लक्षणं वक्तव्यमिति तटस्थस्यैव ब्रह्मणो निरूपकाणि वाक्यान्युदाहृतानि, इह तु तत्त्वमसीति जीवस्य ब्रह्मावगतिपर्यन्तानि' इत्युदाहरणवाक्यजातवैजात्याङ्गीकारः (पा. १०८), 'जगत्कारणस्य सर्वज्ञत्वादिस्वभावत्वे समन्वयः, त्वंपदार्थस्य च ब्रह्मात्मतायां समन्वयः' इति समन्वयस्य द्वैधीकरणं च (पा. ११४) नवमो विरोधः ॥

(१०) अकर्त्रात्मबोधोऽपि हि मिथ्याज्ञानबाधनेन कर्माण्युच्छिनत्ति बाधितमपि तु मिथ्याज्ञानं द्विचन्द्रज्ञानवत् संस्कारवशात् कञ्चित् कालम् अनुवर्तत एव' (४–१–१५)

इति भाष्यं व्यावहारिकदृष्ट्या जीवन्मुक्तस्यापि प्रारब्धकर्मशेषानुवृत्त्युपपादनार्थं प्रवृत्तमनुलक्ष्य तत्र स्थितस्य मिथ्याज्ञानविषयस्य न्यायस्य स्वाभिमताहङ्कारग्रन्थ्युपादानकारणाविद्यायामपि सञ्चारणेन संस्कारादपि अग्रहणानुवृत्तेः संभवात्, भयानुवृत्तिवत्। तथा हि सम्यग्ज्ञानान्निवृत्तमपि भयं स्वसंस्कारादनुवर्तते, कम्पादिनिमित्तं च भवति' इति स्वप्रक्रियाकल्पिताविद्यायाः संस्कारकल्पनं (पा. ९८) दशमो विरोधः। विवरणादिग्रन्थेषु तु जीवन्मुक्ते अविद्यालेशोऽपि टीकाकाराभिमत इत्युक्तम् ॥

## प्राचीनाद्वैतिप्रस्थानैरनुशाङ्करप्रस्थानानां साम्यम्

अथाधुनातनैरद्वैतवेदान्तिभिर्योऽयं न्याय आश्रीयते 'पारमार्थिकाद्वैते तात्पर्ये स्थिते व्यावहारिकप्रमेयेषु मतभेदो न दोषाय' इति, नैष साधुरिति वयं प्रतीमः। यत्कारणम् अद्वैतसिद्धान्ताभ्युपगन्तॄणामेव प्रस्थानानि नैकानि भगवता भाष्यकारेण दूषितानि पश्यामः स्वभाष्येषु। स्यादेतत् – नैव ते प्राचीनवेदान्तिनः परमार्थव्यवहारविभागमूरीकृतवन्तो प्रमेयतत्त्वपरिशीलने; अतो युक्तं यत् तेषां मतं निराकृतं भगवत्पादैरिति व्याख्यानकाराणां पुनः स्वीकृतपरमार्थव्यवहारविभागानां सत्यामपि प्रमेयविशेषेषु व्यावहारिकेषु विप्रतिपत्तौ परमार्थाद्वैते संप्रतिपत्तेः सत्त्वात्, न तत्प्रक्रियासु दोषः शक्यते आसञ्जयितुमिति। एतदपि न चारु। यतो व्यवहारपरमार्थपदोच्चारणमात्रेण न किञ्चिद् वैषम्यं साधितं भवति व्याख्यानप्रस्थानानां प्राचीनप्रस्थानेभ्यः, यावन्नोपपाद्यते किमिदं व्यावहारिकत्वं नाम यत्र विमतिर्न दोषाय, कथङ्कारं वा अदः पारमार्थिकत्वं सिषाधयिषितम् अद्वैततत्त्वस्येति। समानमेव हि प्राचीनाद्वैतिनाम् अनुशाङ्कराणां च यत् (१) श्रुतिरपौरुषेयत्वेन अद्वैते प्रमाणमित्यङ्गीक्रियते, आचार्यस्तु श्रुत्यर्थबोधको मीमांसान्यायानुसरणमात्रेणेति। (२) समानं च श्रुतिविहितत्वेन स्वस्वप्रस्थानोरीकृतसाधनोपदेशो मुमुक्षूणामर्थाय। (३) जीवस्य कारणविशेषकृतं

बद्धत्वम्, मुक्तिश्च स्वस्वोक्तसाधनानुष्ठानेनेत्यभ्युपगमोऽपि समान उभयोः । (४) समानं चोभयेषामपि स्वस्वसम्प्रदायसम्मतमीमांसाप्रकारानुरोधेन वाक्यार्थ-निर्धारणं स्वस्वसिद्धान्तस्थापनाय, परपक्षनिराकरणाय युक्तिविशेषानयनं चेति । न चाधुनापि न विद्यन्ते द्वैतिवेदान्तिनो यैरपि अनुशाङ्करवेदान्तिक्षुण्णेनैव पथा प्रस्थितैः स्वस्वाभिमतसिद्धान्तविशेष उपस्थाप्यते सर्ववेदान्तसिद्धत्वेन । एतावांस्तु विशेषोऽत्र यत् प्राचीनवेदान्तिनः स्वोपज्ञमेव प्रस्थानं सर्ववेदान्तसिद्धतत्त्वसमर्पकम् इत्यास्थिषत पृथक् पृथक् प्रक्रियाविशेषस्वीकारपूर्वकम्, व्याख्यानप्रास्थानिकास्तु भगवत्पादाचार्य-मतानुयायित्वेनात्मानं प्रख्यापयन्तो विवदन्ते विरुध्यन्ते च परस्परं भगवत्पादीय-प्रस्थानप्रक्रियाविशेषसतत्त्वनिर्धारणविषये इति । तस्मात् सिद्धमिदं यत्, यावन्नोपपाद्यते कया प्रणाड्या सर्वेषामेषां व्याख्यानप्रस्थानानाम् एकवाक्यतेति, यावद् वा सर्वसंप्रति-पत्तिर्न संपाद्यते अमुक एवैको व्याख्याता भगवत्पादीयप्रस्थानविदामुत्तम इत्यत्र, तावदेते विवादपदकारणान्न मुच्येरन्निति, तावन्नाकिञ्चित्करमिदमेतेषां पारमार्थिक-व्यावहारिकविभागाङ्गीकरणमन्त्रपुरश्चरणम् इति ॥

## पञ्चपादिकाया भाष्यविरुद्धत्वे नागेशभट्टानुमोदनम्

प्रकृतं त्वेतत् । यथैव प्राचीनाद्वैतवेदान्तिनः केवलं वाक्यव्याख्यानं तर्कं चाश्रित्य भाष्यकारीयसाम्प्रदायिकप्रस्थानाद् भिन्नमेव, क्वचित् क्वचित्तद्विरुद्धप्रमेयाभ्युपगम-कलङ्कितं च, स्वस्वसंप्रदायागतप्रस्थानं सर्ववेदान्तसिद्धान्तसमर्पकमित्यास्थिताः, एवमेव पञ्चपादिकाकारोऽपि सम्प्रदायान्तरागतमेव प्रस्थानविशेषं भाष्यकारप्रस्थानविरुद्धमेव तत्सम्मतत्वेन प्रथयितुं केनचित् कारणेन भाष्यप्रस्थाने संक्रामितवान् टीकाप्रणयन-व्याजेनेत्येतन्नासम्भावितमिति । टीकाप्रस्थानं चेदं भाष्यप्रस्थानाद् भिन्नमेवेति नायमभिनवोऽभ्यूह इत्यत्र विद्वत्प्रकाण्डैः पोलकं सु. श्रीरामशास्त्रिभिः प्रबलं प्रमाणं निदर्शितमस्ति । एवं हि तैर्लिखितं पश्यामः – "महावैयाकरणः, सर्वतन्त्रार्थतत्त्वज्ञः सर्वत्र निबन्धकृच्च श्रीनागेशभट्टः वैयाकरणसिद्धान्तलघुमञ्जूषाभिधे निबन्धे …….. पूर्वनिर्दिष्टान् पञ्चपादिकोक्तान् सैद्धान्तिकान् अर्थान् साग्रहं निराचकार" (पं. भू. पा. २११) इति, 'अनादिभावरूपाविद्या भगवत्पादानभिमता न केवलम्, भगवत्पाद-भाष्यादिनिबन्धविरुद्धा च' इति साग्रहं वदति नागेशभट्टः । तस्य भगवत्पादसिद्धान्ते न द्वेषः, तदभिमताद्वैतसिद्धान्तस्य स्वयं मञ्जूषायां बहुत्र पुरस्कारात्, किं तु भावरूपाविद्यायामेव द्वेषः" (पं. भू. २८) इति च । एतेन स्पष्टमिदं यदद्वैतिनोऽपि केचित् प्राक्तनाः पञ्चपादिकाप्रस्थाने भगवत्पादप्रस्थानविरुद्धाः प्रमेयविशेषा उद्भावकाशाः सन्तीति मेनिरे इति । नागेशभट्टस्त्वसौ 'तस्मात् भ्रमरूपा स्थूलाविद्या; वासनारूपा च अव्यक्तपदवाच्या सूक्ष्माविद्या, व्यवहारकाले स्थूलाविद्यायाः सा कारणमिति तस्या एव कारणत्वेन निर्देशः' (पं. भू. पा. २२), इति 'एवं च सिद्धं भ्रमः, तत्संस्कार-

रूपा च अविद्येति । सा च जन्यैवेति नैकविज्ञानेन सर्वविज्ञानप्रतिज्ञाभङ्गः ' (पं. भू. पा. २३) इति च ब्रुवन् वाचस्पतिमिश्रानुयायिप्रस्थानान्तरमेव भगवत्पादीयमित्यभिनिविष्टः इति गम्यते ।[1] ततश्च तत्प्रस्थानपरीक्षा भामतीपरीक्षावसर एव कर्तव्येत्यन्यदेतत् ॥

## प्रस्थानयोः परस्परविरोधस्फूर्तेर्दार्ढ्यार्थमयं यत्नः

न केवलं प्राचीनप्रस्थानसामान्यसाम्यात् सम्भवतः, प्रस्थानान्तरानुयायिनागेशभट्टकृतप्रत्यक्षाभियोगतश्च लिङ्गात्, भाष्यप्रस्थानेनास्य टीकाप्रस्थानस्य विरोध उन्नेयः, अपि तु साक्षाद् भगवत्पादभाष्यवचनैस्तुलनात् स्फुटतरो भवति सः – इति दृढं विश्वस्तेन मया प्रकृतं प्रकरणं निरमायि । बलवदाशंसे च निर्मत्सरा अधस्तान्मया संगृहीतस्य विरोधदशकस्य, ग्रन्थशरीरे समुद्घाटितानामन्येषां च बहूनां विरोधानां समवलोकनेन सन्तुष्टा भवेयुः, टीकाप्रस्थानस्यास्य भाष्यप्रस्थानतः सुतरां वैषम्यमेव चकास्तीति । अत्रैव दृढतरप्रत्ययार्थं सूत्रभाष्यादुद्धृतानि वाक्यानि प्रकरणशरीरे, उपनिषद्भ्यो भगवद्गीताभ्यश्च सञ्चितानि वाक्यकुसुमानि च प्रदर्शितानि परिशिष्टे परःशतं यैरालोकितैः प्रस्थानयोः परस्परवैरूप्यं जिज्ञासूनां सम्यग् हृदयमागच्छेत् । अनेन तत्तत्प्रमेयविशेषमधिकृत्य प्रस्थानत्रये समुपलभ्यमानानां भाष्यवाक्यरत्नानां संग्रहोऽपि मुमुक्षूणामनायासेन एकत्र लभ्येत ॥

## केनेयं टीका किंनिमित्तं प्रणीता स्यात् ?

अथ केनेयं टीका किं प्रयोजनमुद्दिश्य कदा रचिता स्यात् – इत्यत्र मम मनसि प्रादुर्भूतं तर्कं वाचकमहाशयसविधे समर्पयितुमीहे । ग्रन्थोऽयं शङ्करविजयादिकाव्यकल्पितकथानकसुप्रथितयशोभिः श्रीपद्मपादाचार्यैं रचित इत्यत्र न पर्याप्तं प्रमाणं समस्तीत्यावेदितं प्राक् । यो वा को वा अस्तु टीकाकृत् तथ्यतः, तस्य सर्वतन्त्रस्वतन्त्रत्वं प्रसन्नगम्भीरया शैल्या वाचकचित्ताकर्षणे कौशलम्, स्वाभिप्रेतार्थस्य मीमांसान्यायैर्विचारप्रचोदकैस्तर्कैश्च समुपबृंहणेन शास्त्रविनोदरसिकानां सम्मोदजननदक्षता च निर्विवादमाविष्कृतमस्ति प्रकृते अल्पकाये अपूर्णेऽपि ग्रन्थे । व्याख्याता चायम् अविद्योपादानकप्रपञ्चवादिनां वेदान्तप्रस्थाने निष्णातः । तच्च प्रस्थानं स्वातन्त्र्येणैव प्रचरति स्म यावद्ब्रह्मसिद्ध्याविर्भावम् इति तत्रत्यान्मण्डनवाक्यादेकस्मात् गम्यते । " तथा चोक्तम् अविद्योपादानभेदवादिभिः 'अनादिरप्रयोजना चाविद्या ' इति " (ब्र. सि. पा. १०) इति स्वाभिमतप्रक्रियोपोद्बलकत्वेन एतेषामेकदेशिनां प्रस्थानमुदाहरन् हि मण्डनः प्रस्थानस्यास्य तदात्वे विद्वज्जनगोष्ठीषु सुप्रसिद्धतां ज्ञापयति । केनापि कारणेन तनुतां गतं प्रस्थानमेतत् शङ्करभाष्यटीकावेषेण विद्वन्मण्डलमान्यं चिकीर्षुणा पण्डितप्रकाण्डेनानेन

1. अत्राधिकं पञ्चपादिकाभूमिकात एवाधिगन्तव्यम् । नागेशभट्टकृतशङ्कापरिहारश्च तत्रैव द्रष्टव्यः ॥

टीकेयं निर्मिता । ततः कञ्चित् कालमज्ञातवासमनुभूय ग्रन्थमहिमाकृष्टचेतोभिर्वेदान्तप्रवरैरर्वाक्कालीनैर्विरचितं व्याख्यानं चासाद्येयं टीका श्रीपद्मपादविरचितत्वेनोत्थापितयशःपताका तत्तुल्यसूत्रभाष्यव्याख्यानाभावात्, क्रमक्रमेण भाष्यकाराभिप्रायप्रकाशितैवेति जिज्ञासुभिः कथञ्चित् सम्मानितेत्युत्प्रेक्षितुं शक्यते । भाष्यगुहानिहितं मूलप्रक्रियाविशेषं प्रत्यभिज्ञातुमसमर्था अत्यर्वाचीनाः तदभिन्नैव प्रक्रियेयमिति बभ्रमुः शङ्करविजयेषु श्रूयमाणपद्मपादविजयडिण्डिमघोषव्यामुग्धा इत्यहो मायामोहवैभवम् !

## व्याख्यानप्रस्थानस्य भाष्यप्रस्थानाद् व्यावर्तका धर्माः

अपि च नैवात्र विवदितव्यं टीकाप्रस्थानं भाष्यप्रस्थानाद् भिन्नं न वा – इति । यतः सन्त्यत्रात्यन्तमेवास्य वैलक्षण्यं भाष्यप्रस्थानान्निस्सन्देहं स्फोरयन्तः असाधारणा धर्माः । तथा हि – (१) भाष्यकारेण तावदभ्युपगम्यते ब्रह्मजिज्ञासायां न केवलं श्रुत्यादय एव प्रमाणम्, किं तु श्रुत्यादयः, अनुभवादयश्च यथासम्भवमिह प्रमाणम्; अनुभवावसानत्वात् । भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य (१-१-२, पा. ८) इति । इह तु टीकायां यद्यपि ‘सिद्धे वस्तुनि संभवत्यनुभवः तदवसाना आकाङ्क्षानिवृत्तिर्यतः’ इति (पं. पा. ९२५) स्वीक्रियते, तथापि अनुभवप्रमाणत एव ब्रह्मज्ञानमुदेतीति नियमोऽत्र न कण्ठरवेणोक्तः । (२) अत एव स्यात्, भाष्ये ‘येषां पुनर्निपुणमतीनां नाज्ञानसंशयविपर्ययलक्षणः पदार्थविषयः प्रतिबन्धोऽस्ति, ते शक्नुवन्ति सकृदुक्तमेव तत्त्वमसिवाक्यार्थमनुभवितुमिति तान् प्रति आवृत्त्यानर्थक्यम् इष्टमेव’ (४-१-२, पा. ४६२) इति उत्तमाधिकारिणां श्रवणमात्रेणाप्यनुभवपर्यन्तज्ञानोत्पत्तिमभ्युपेत्य, ‘न चैवमात्मानमनुभवतः किञ्चिदन्यत् कृत्यमवशिष्यते’ (४-१-२, पा. ४६३) इति विस्पष्टतरमुक्तम् । टीकायां पुनः ‘सिद्धश्च ज्ञानाभ्यासः, शास्त्रश्रवणादेर्वा साक्षात्करणे हेतुः’ इति शङ्कावादिमतमुत्थाप्य ‘यद्येवम्, किं विधिना स्वयमेव पुरुषार्थे निर्ज्ञाते हेतौ प्रवर्तते’ (पा. ९७) इति ज्ञानाभ्यासोऽपि साक्षात्कारसाधनत्वेनानुमोदितः । ‘विद्या उदितापि न प्रतिष्ठां लभते । असम्भावनाभिभूतविषयत्वात् .... तेन सम्यग्ज्ञानमपि स्वविषये अप्रतिष्ठितम् अनवाप्तमिव भवति । तेन तत्स्वरूपप्रतिष्ठायै तर्कं सहायीकरोति’ (पा ९१) इति भाष्यविरोधमप्यविगणय्य सम्यग्ज्ञानेऽपि असम्भावनाशङ्काया अवकाशो दत्तः । (३) किञ्चान्यत् –‘यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः’ इत्यादिश्रुत्युक्तप्रकारेण अपरोक्षानुभवस्वभावमेवात्मानमुपेत्य भाष्यकारेरविषयेऽपि प्रत्यगात्मन्यनात्मतद्धर्माध्यासमुपपादयितुमुक्तम्, ‘अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः’ इति । टीकाकारेण तु अपरोक्षत्वमपि साध्यपक्षे निक्षिप्य, तदुपपादनार्थं प्रत्यगात्मप्रसिद्धिरेव हेतुत्वेनोपन्यस्यते (पा. ७०-७१) इति वैपरीत्यम् । (४) अन्यच्च भाष्ये “‘अनुभवारूढं तु ज्ञानफलम्’, ‘यत्साक्षादपरोक्षाद् ब्रह्म’ इति श्रुतेः, ‘तत्त्वमसि’ इति सिद्धवदुपदेशात् (३-३-३२)” इति श्रुतिवाक्यस्य अनुभवपर्यन्त-

ज्ञानजनकत्वेनैव प्रामाण्यमभ्युपगम्यते। टीकायां पुनः 'शब्दस्तावदपौरुषेयत्वाददुष्टः। प्रमेयस्य पुनर्ज्ञानहेतुत्वे न प्रमाणमस्ति, शब्दस्यैव तदेकनिष्ठत्वेन तन्नियमात्' (पा. ११०) इति, 'अतो यथैव विधिवाक्यानां स्वार्थमात्रे प्रामाण्यम्, एवं स्वरूप-वाक्यानामपि, अनवगतार्थपरिच्छेदसामान्यात्', 'तस्मात् यथा कार्यमवगमयंस्तदर्थः, एवम् ऐकात्म्यमप्यवगमयंस्तदर्थो भवितुमर्हति।' (पा. १११) इति च विधिवाक्य-साम्येनैव आत्मस्वरूपेऽपि प्रमाणं भवितुमर्हति श्रुतिरिति मन्यत इति वैषम्यम्। (५) अपि च भाष्ये 'तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते; तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः' इति प्रतिज्ञया आत्मानात्मनोरितरेतराध्यास एव अहंममेतिनैसर्गिकलोकव्यवहारात् अनुभवमात्रसिद्धो 'मिथ्याज्ञानम्', 'अविद्या' इति च व्यवहृतः। अध्यासस्वरूपं च लोकानुभवोदाहरणेनैव हृदयं गमितम् 'शुक्तिका हि रजतवदवभासते', 'एकश्चन्द्रः सद्वितीयवत्' इति च। तथा च विद्याविद्ययोर्बाध्य-बाधकभावोऽयं लोकानुभवसिद्ध एवेति अद्वैतसिद्धान्ते निष्पद्यत इति स्पष्टम्। टीकायां पुनः, अनाद्यनिर्वचनीया अविद्याशक्तिः, अविद्यापुरस्सरत्वेन भाष्यसमुपपादितप्रमाण-व्यवहारमेवाश्रित्य दृष्टार्थापत्तिश्रुतार्थापत्तिभ्यां साध्यते (पा. १९, ५५); मिथ्या-रजतस्याप्युत्पत्तिं मिथ्याज्ञानालम्बनत्वं चाभ्युपगम्य लोकानुभवसिद्धदृष्टान्तोऽपि विवादपदमारोप्यते; अविद्याशक्तेरहमादिसर्वप्रपञ्चोपादानकारणत्वं स्वीकृत्य विद्याविद्या-विचारापेक्षया कार्यकारणभावविचार एव अभ्यर्हितः क्रियते - इति सुमहद् वैलक्षण्यम्॥

## अभ्यर्थना पण्डितप्रकाण्डेषु

तदेवं यथाप्रतिभानं प्रदर्शितं मयात्र पञ्चपादिकाप्रस्थानं नामेदं यत्किञ्चिदन्यदेव भाष्यकारीयात् स्वासाधारणप्रक्रियाविशेषसंवलितं केनचिद् विद्वद्वरेण विरचितम्, सुविरुद्धं च प्रधानभूतेषु बहुषु प्रमेयांशेषु - इति। अथेदानीं सप्रश्रयं संप्रार्थ्यन्ते वेदान्ततत्त्वविवेचनरसिका गुणदोषविवेककुशलाः विद्वत्तल्लजाः, परीक्ष्यतामिदं प्रकरणम् आमूलचूडं सावधानैः, परिमार्ज्य च भाषादोषान् विचारक्रमदोषांश्च ग्रन्थकर्तृभ्रम-प्रमादादिभिः सञ्जातान्, इदमेव प्राधान्येन निरूप्य निर्धार्यताम् यदत्र प्रपञ्चितमस्ति भाष्यप्रस्थानात् पञ्चपादिकाप्रस्थानस्य महद् वैलक्षण्यं तत् किं प्रकरणनिर्मातृपुरो-भागित्वदोषहेतुकम्, उत वस्तुतो विद्यमानस्यैवाविष्करणम् इति। यदि वस्तुतो विद्यमानस्यैवाविष्करणमेतत्, तदा इदं कर्तव्यं भविष्यति सर्वेषामपि विदुषां विशेषतश्च भगवत्पादभक्तानाम्, न प्रकरणकर्तुरेव केवलम्, यत् सर्वप्रयत्नेनापि परिशुद्धशाङ्करप्रस्थानस्य परिरक्षणं व्याख्यानप्रस्थानप्रमेयसंक्रान्तिदोषात्। यद्यत्रानुमति-र्भवताम्, तर्हि विधीयतां पाठनपद्धतौ तथा परिवर्तो यथा भाष्यचिन्तनं व्याख्यान-निरूपणात् प्रागेव करिष्यते इतःपरमपि पाठशालासु, विश्वविद्यानिलयेषु च। अथ मम मतिमान्द्यात् दोषैकदृष्टिहेतोरेव वा दुष्टमेवेदं प्रकरणमिति निश्चयः, तर्हि क्षिप्रमेव

तदप्यावेद्यताम् अयं जनो यथायं पश्चात्तापपूर्वकं क्षमापयेत् सर्वान् विदुषः; परित्यज्य चेदं बहुमान्येषु पूर्वेषु मिथ्यादोषारोपणव्यसनम्, सर्वमद्यतनम् अद्वैतग्रन्थजातेपूपलभ्यमानम् एकमेव प्रस्थानं विभिन्नतया विभाव्यमानमपीति प्रतिबुद्ध्येत, प्रतिबोधने च स्वीयानां शीघ्रतरं सर्वसम्मतमेव मार्गं सकातंज्ञप्रकटनं सविनयं चानुसरेत् । न हि स्वार्थेषु मत्सरो नाम कस्यचिदपि युज्यत इति ॥

## कृतज्ञताऽऽविष्कारः

अथेदानीम् इदमेव त्ववशिष्यते मम कर्तव्यतया यत् स्वाधमर्ण्यप्रकटीकरणं प्रकृतग्रन्थनिर्माणे प्रकाशने च । प्रप्रथमं स्मरणीया पण्डितप्रवरादिबिरुदाङ्कितस्य, नानाशास्त्रेषु कृतपरिश्रमस्य ब्रह्मश्रीयुक्तश्रीमदनन्तमूर्तिशास्त्रिण उपकृतिः, यदसौ ग्रन्थभागावलोकनेन तत्र तत्र लेखनशैल्यां विचारसरण्यां च संस्करणावश्यकतां असुसूचत् । विशिष्य च वेदान्तशिरोमण्यादिबिरुदाङ्कितः श्री परकजे सुब्रह्मण्यभट्टः संस्मरणीयः, यः खलु साद्यन्तं लिखितपुस्तकमालोक्य भाषासंस्करणे साहाय्यमकरोत् । अध्यात्मप्रकाशकार्यालयाध्यक्षश्चाभिनन्दनीयोऽत्र, यतः स्वीये मुद्रणालये ग्रन्थमिमं मदीयमङ्कयित्वा तत्प्रकाशनभारमपि यथापूर्वमूढवान् । सर्वानप्येतान् वेदान्तग्रन्थप्रचारणे साहाय्यकमाचरितवतः, श्रीभगवान् नारायणः सकलाभ्युदयभागिनः कृत्वा समनुगृह्णात्विरत्याशंसे इति

पराभवसंवत्सरे
आषाढशुक्लपूर्णिमायाम्

प्रकरणरचयिता
श्रीसच्चिदानन्देन्द्रसरस्वतीभिक्षुः

# विषयानुक्रमणिका


प्रस्तावना (आंग्लभाषामयी) 5-13

प्रस्तावना (गीर्वाणभाषामयी) 17-27

१. ग्रन्थारम्भे हेतुः – २. विचारस्यागतार्थता – ३. पञ्चपादिकाया एव प्रथमं परीक्षणे हेतुः – ४. पञ्चपादिकासंस्तवः – ५. सूत्रभाष्यवाक्यानामेव प्रथममुदाहरणे हेतुः ॥ १–३

६. भाष्यगतम् अध्यासस्वरूपप्रदर्शनपरं वाक्यम्

७. भाष्ये विवक्षितो विरोधः कीदृशः ? (टी.) न सहानवस्थानलक्षणः, किं तर्हि जातिव्यक्त्योरिव इतरेतरसम्भेदात्मकत्वानुपपत्तिः ; (भा.) सहानवस्थानलक्षणमेव विरुद्धस्वभावत्वम् । ८. चिदचितोर्विरुद्ध-स्वभावत्वं कथम् ? ३–७

९. किं नामास्मत्प्रत्ययगोचरत्वं विषयिणः ?

१०. अस्मत्प्रत्ययगोचरत्वमात्मनः किमभ्युपगतं भाष्ये, किं वा नाभ्युपगतम् ? ११. (टी.) अहङ्कारे व्यवहारयोग्यत्वमेव अस्मत्प्रत्यय-विषयत्वम् ; योग्यत्वस्य, अध्यासस्य च बीजाङ्कुरयोरिव कार्यकारण-भावः। (भा.) अहंप्रत्ययविषयत्वमेव अस्मत्प्रत्ययगोचरत्वं नाम । १२. अस्मत्प्रत्ययविषयत्वाङ्गीकारः कथं कृत्वा ? – अहंप्रत्ययनिराकरणे हेतुः । १३. आत्मनोऽहंप्रत्ययविषयता स्वीकृता किंप्रयोजना ? ८–१६

१४. 'अध्यासो मिथ्या' इत्यस्यार्थः

१५. 'नैसर्गिको व्यवहारः' इति कोऽर्थः ?

(टी.) प्रत्यक्चैतन्यसत्तामात्रानुबन्धी मनुष्योऽहमित्यभिमानः ; (भा.) निसर्गत एव अध्यस्य अहंममेति व्यवहरति लोकोऽविचारदशायाम् इत्यर्थः ॥ १६–१९

१६. 'मिथ्याज्ञाननिमित्तो लोकव्यवहारः' इत्यस्य टीका

(टी.) अनिर्वचनीयाविद्याशक्त्युपादानकः । १७. मिथ्याज्ञानशब्दो भाष्ये अध्यासार्थक एव । तत्र भाष्यवाक्यानि (30) – मिथ्याशब्दो न कुत्रापि भाष्ये अनिर्वचनीयपर्यायत्वेन प्रयुक्तः । तत्र भाष्यवाक्यानि (5) ॥ १९-२३


---

1. वाक्यानां सङ्ख्या एवं कंसान्तरिता निर्दिश्यते ॥

१९. 'अहमिदम्', 'ममेदम्' इति नैसर्गिकोऽयं व्यवहारः

-इत्यस्यार्थः । २०. व्यवहारवैविध्यम् ; तत्र भाष्यवाक्यानि (19) ।
२१. गीताभाष्येऽपि मिथ्याज्ञानशब्दोऽध्यासपर्याय एव ॥ २३-२७

२२. मिथ्यार्थावभासः

२३. अख्यातिवादादीनां विमर्शः । २४. अध्यासोत्पत्तिचिन्ता । २५. अविद्यायां प्रमाणोपन्यासः किं समञ्जसः ? २६. भाष्यानुसारेण प्रातिभासिक-रजतादिविचारः ; तत्र वाक्यानि (13) ॥ २८-४०

२७. सुषुप्तावविद्याशक्तिसद्भावः किं भाष्यसम्मतः ?

तत्र भाष्यवाक्यानि (19) । २८. सौषुप्ताविद्याविषये विवरणकारयुक्तयः ॥ ४०-४७

२९. अविद्यास्वरूपम्

३०. अव्याकृतम् नामरूपादिशब्दवाच्यम् अविद्याविलक्षणमिति भाष्यमतम् । तत्र वाक्यानि (12) । ३१. इष्टसिद्ध्यादिषु मायासतत्त्वविचारः ॥ ४७-५३

३२. अविद्याश्रयः, अविद्याविषयश्च

भाष्यकारमते अध्यास एवाविद्या जीवाश्रयश्च सः ; तत्र वाक्यानि (7) । व्याख्यानप्रस्थानेषु विविधानि मतानि ॥ ५३-५८

३३. अविद्यापुरःसरत्वं व्यवहाराणाम् ५८-६०

३४. अस्मत्प्रत्ययगोचरात्मनामानि

तत्र टीकाकारेण परमात्मनामान्यपि जीवनामत्वेन परिगणितानि ॥ ६०-६३

३५. अहमध्यासः

तत्र भाष्यवाक्यानि (5) । ३६. अहमध्यासे दृष्टान्ताः ॥ ६४-७०

३७. अविषये प्रत्यगात्मन्यध्यासः

तत आत्मपरोक्षत्वविषये मतभेदः ॥ ७०-७२

३८. विद्याऽविद्याविवेकः

(टी.) अविद्याया आच्छादकत्वम्, अतद्रूपावभासिता च ; (भा.) विपरीत-ग्राहकादिरूपैवाविद्या । (टी.) अध्यस्तातद्रूपविलयनं कुर्वद् वस्तुस्वरूपम् अवधारयद् विज्ञानं विद्या ; (भा.) विवेकेन वस्तुस्वरूपावधारणं विद्या । भाष्ये अध्यस्तवर्णने 'अविद्याध्यस्तम्' इत्यादिविशेषणानि नियमे-नोपादीयन्ते, न तु क्वचिदपि 'अविद्योपादानकम्' – इति । तत्र वाक्यानि (11) ॥ ७२-७४

### ३९. अहंप्रत्ययिसाक्षिणोरन्योन्याध्यासः

(टी०) अहंप्रत्ययी नाम अहङ्कारग्रन्थिः ; (भा०) अहंप्रत्ययी नाम अहंप्रत्यय-विषयत्वेन अविद्याकल्पित आत्मा ; (टी०) इतरेतराध्यासवचनम् आत्मानात्मनोरुभयोरपि प्रकाशे उपपत्तिसमर्पणार्थम् ; (भा०) अध्यास-कर्तुरेव परमार्थरूपं साक्षी ॥ ७४-७६

### ४०. किं नाम नैसर्गिकत्वं व्यवहारस्य ?

(टी०) प्रत्यक्चैतन्यसत्तामत्रानुबन्धित्वम् ; (भा०) नैसर्गिकत्वं नाम स्वाभाविक-त्वम्, अविचारदशायां लब्धात्मत्वम् ॥ ७६-७७

### ४१. साक्षिणोऽहम्यध्यस्तत्वेऽपि न मिथ्यात्वप्रसङ्गः

(टी०) सत्यम् अनिदंचैतन्यम्, अनृतं युष्मदर्थः स्वरूपतोऽपि अध्यस्तरूपत्वात् ; (भा०) मिथ्याहमर्थः सत्यात्मवस्तुत्वेन अवगत इत्येतावता न साक्षिणि कश्चिद्दोषासङ्गः ॥ ७७-७८

### ४२. अध्यासस्य अनादित्वमानन्त्यं च

(टी०) उपक्रमेऽपि प्रत्यगात्मन्यहङ्काराध्यास एव नैसर्गिको लोकव्यवहारोऽभिप्रेतः ; (भा०) नैसर्गिकत्वं मिथ्यात्वे हेतुः । दिक्कालादीनामपि कार्यत्वम् ॥ ७८-७९

### ४३. किं नामाध्यासस्य मिथ्याप्रत्ययरूपत्वम् ?

(टी०) अनिर्वचनीयरूपत्वं लक्षणतः, न व्यवहारतः । (भा०) अनाद्यध्यासोऽपि विद्यापबाध्यत्वात् मिथ्याप्रत्यय एव ८०-८१

### ४४. अध्यासः कर्तृत्वभोक्तृत्वप्रवर्तकः

(टी०) अनर्थहेतुत्वं दर्शयति हेयतासिद्धये; तेन कर्तृत्वं भोक्तृत्वं च स्वाभाविकमिति मतं निराकृतं भवति । (भा०) प्रवृत्तिलक्षणो व्यवहारो दर्शितोऽत्र ॥ ८१-८२

### ४५. 'सर्वलोकप्रत्यक्षः' इति कोऽर्थः ?

(टी०) पूर्वोक्तस्यैव अहंममानुभवलक्षणस्य निगमनमत्र । (भा०) कर्तृत्वभोक्तृत्व-बुद्धिरेव संसारानर्थहेतुरिति कृत्वा एवं सैवोपसंहारे सर्वलोकप्रत्यक्षत्वेन निगम्यते ॥ ८२-८३

### ४६. 'अस्यानर्थहेतोः' इत्यस्यार्थः

(टी०) हेतोः प्रहाणाय इति प्रयोजनं निर्दिशति । हेतोः प्रहाण्या हि हेतुमतः प्रहाणिरिति ; (भा०) अध्यास एव हेतुः, न तु हेत्वन्तरं यथा टीकाकारोपात्तम् – इति द्योत्यतेऽत्र । (टी०) विवेकमात्रेण कथम् अध्यास-निवृत्तिरिति चेत् वाक्याद् ज्ञानान्तरमेवोत्पद्यते अविद्यां निरस्यदेवेत्यदोषः । किमिति भाष्यकारो कारणभूतामविद्यां कण्ठरवेण नोक्तवानिति तु वक्तव्यमत्र ॥ ८३-८४

## ४७. अनर्थहेतोः प्रहाणाय इति प्रयोजनवचनं न वा ?

(टी·) ब्रह्मात्मावगतिनान्तरीयकमनर्थहेतोरविद्यायाः प्रहाणम् । नन्वादेरश्रवणेऽपि विज्ञानस्वभाव एव तादृशो येनाविद्या निराक्रियते ज्ञानोत्पत्तिसमसमये । दृष्टान्ते 'शुक्तिकेयम्' इत्येव निराकाङ्क्षं वाक्यम् ; 'नेदं रजतम्' इत्यनुवादः । (भा·) प्रतिबन्धनिरासमूलकमेव ब्रह्मज्ञानमवाप्यते । तत्र वाक्यानि (16) ॥ ८५-९१

## ४८. विद्याप्रतिपत्तिविषये शङ्कासमाधाने

(टी·) न हि विद्या तटस्था येन तत्प्राप्तिः पृथगुच्येत इति शङ्का । परिहारस्तु उदितापि विद्या अप्रतिष्ठिता, अनवाप्तेव । तत्प्रतिष्ठायै तर्कं सहायीकरोति । (भा·) तत्र प्रत्यक्षफलत्वात् विद्यायाः, शङ्कानुपपत्तिः । तत्र वाक्यानि (5) ॥ ९१-९४

## ४९. साक्षात्कारवादो न भाष्यसम्मतः

(टी·) अवगतिरिति साक्षादनुभव उच्यते ; ज्ञानं तु परोक्षे अनुभवानारूढेऽपि संभवति ; विधिं विनैव स्वयं साक्षात्करणाय ज्ञानाभ्यासे प्रवर्तते । (भा·) अन्त्यं प्रमाणं तत्त्वमसीति आत्मैकत्वप्रतिपादकम् ; नातःपरं किञ्चिदाकाङ्क्ष्यमस्ति ॥ ९४-९७

## ५०. विद्यया अविद्यानिवृत्तिः किं निःशेषा, किं वा सावशेषा ?

(टी·) न जीवस्य ब्रह्मात्मावगमस्तद्विषयानवगमम् अबाधमान उदेति । संस्कारादपि तु अग्रहणानुवृत्तेः संभवः ; भयानुवृत्तिवत् । स्वसंस्कारादनुवृत्तम् अग्रहणम् अहङ्कारग्रन्थेर्निमित्तं भवतीति न किञ्चिदनुपपन्नम् । (भा·) जीवस्य क्रियाकारकफलसंबन्धो मिथ्याज्ञानकल्पितः । मिथ्याज्ञानं बाधितमपि संस्कारवशात् द्विचन्द्रज्ञानवत् अनुवर्तते । ज्ञानिदृष्ट्या तु क्रियाकारकफलसंबन्धो न कदाप्यस्ति । तत्र वाक्यानि (7) ॥ ९८-१००

## ५१. सर्वे वेदान्ता विद्याप्रतिपत्तये आरभ्यन्त इति कथम् ?

(टी·) कममुक्त्याद्यर्थाय विहितान्युपासनानि, अब्रह्मोपासनानि च । तस्मात् तदर्थोपजीवित्वादितरस्य 'आत्मैकत्वविद्याप्रतिपत्तये' इति न विरुध्यते । (भा·) पार्थगर्थ्यमेव उपासनावाक्यानां ब्रह्मवाक्यानां च ; 'सर्वे वेदान्ताः' इति तु ब्रह्मवस्तूपदेशकवाक्यमात्राभिप्रायकम्, अथवा उपासनावाक्यानां चित्तैकाग्र्यद्वारा मुमुक्षून् प्रति आत्मैकत्वप्रतिपत्तिपरत्वमपीति 'सर्वे वेदान्ताः' इत्युच्यते ॥ १००-१०२

## ५२. जिज्ञासाद्यधिकरणस्थाष्टीकाभिप्रायाः केचन

(टी.) कार्यनिष्ठ एव वेदभागः पूर्वं विचारितः, न वस्तुनिष्ठः । (टीकामतेऽपि ज्ञानस्य भावरूपाज्ञानबाधकत्वं नास्तीति कथं न कार्यनिष्ठत्वं वार्येत ? )

## ५३. 'भोक्तुरात्मैव ब्रह्म' इति भाष्यवाक्यस्य टीका

अहंप्रत्ययविषयविप्रतिपत्त्यापि प्रणाड्या ब्रह्मविप्रतिपत्तिरेव निर्दिश्यते । [पूर्वम् अस्मत्प्रत्ययविषयत्वविषये (खं. १०, ११) यदुक्तम् तदनेन तुलनीयम् ] ॥

## ५४. तर्कसतत्त्वम्

तर्कः इति कर्तव्यता, अनुमानं वा । इदं पूर्वोक्तेन (पा. ९३) तुलनीयम् ॥

## ५५. जन्मादिसूत्रे किं युक्तिरपि सूत्रिता ?

(टी.) सूत्रितैव ; (भा.) नानुमानाद्युपन्यासार्थं सूत्रम् ; केवलं श्रुतिवाक्य-प्रदर्शनार्थम् ॥

## ५६. ब्रह्मणः शास्त्रं प्रति कारणत्वं कथम् ?

(टी.) अनादेरपि वेदस्य ब्रह्मपरतन्त्रत्वादेव ब्रह्मकार्यत्वम् , सर्पस्येव रज्जु-परतन्त्रस्य रज्जुकार्यता । ब्रह्मणो ज्ञानशक्तिविवर्तत्वादेव च वेदस्य सर्वज्ञता च ॥ ( अत्र मिथ्याप्रतिभासार्थम् अविद्याशक्तिरपेक्षिता वा न वा ?) १०३-१०८

## ५७. समन्वयसूत्रभाष्योदाहृतानि वाक्यानि

(टी.) अत्र जीवस्य ब्रह्मात्मावगतिपर्यन्तानि वेदान्तवाक्यानि उदाहृतानि ; न जन्मादिसूत्रभाष्ये इव तटस्थब्रह्मवाक्यान्येव । (भा.) उभयत्रापि ब्रह्मात्मन्येव समन्वयः ॥

## ५८. परिनिष्ठितवस्तुस्वरूपे ब्रह्मणि श्रुतिप्रमाणकत्वम्

(टी.) शब्दस्तावददुष्टः । अतो यथैव विधिवाक्यानां स्वार्थमात्रे प्रामाण्यम् , एवं स्वरूपवाक्यानामपि । अनवगतार्थपरिच्छेदसामान्यात् ; 'तत्त्वमसि' इति सिद्धवदुपदेशात् । अपरोक्षत्वाच्च ब्रह्मात्मनः ; अनुभवारूढं ज्ञानफलम् इति नात्र शङ्का समुन्मिषति । तत्र वाक्यानि (8) ॥

## ५९. अविषयस्य ब्रह्मणः शास्त्रप्रमाणकत्वं कथम् ?

(टी.) शास्त्रं हि 'सोऽयम्' इत्यादिलौकिकवाक्यवत् ब्रह्मणि प्रमाणम् ; (भा.) अविद्याकल्पितसंसारित्वविवर्तनेन नित्यमुक्तात्मस्वरूपसमर्पकत्वात् प्रमाणम् ॥

६०. वेदान्तवाक्यानां समन्वयः

(टी.) सामान्यतः सिद्धस्य जगत्कारणस्य सर्वज्ञत्वादिस्वभावत्वे, त्वंपदार्थस्य च ब्रह्मात्मतायां समन्वयो वेदान्तवाक्यानाम् ; (भा.) सर्वत्रापि ब्रह्मात्मन्येव समन्वयः ॥

६१. किं ब्रह्मात्मज्ञानं नाम क्रिया ?

(टी.) ज्ञानस्य क्रियात्वेऽपि न चोदनाजन्यत्वम्, नापि पुरुषतन्त्रत्वम् ; (भा.) ज्ञानं न ध्यानवत् मानसी क्रिया ; वैलक्षण्यात् ॥

६२. श्रवणादिर्विधीयते वा न वा ?

(टी.) अर्थवादतयैव आत्मज्ञानस्तावकत्वेन तदुन्मुखीकरणाद् विधय इव लक्ष्यन्ते श्रवणादयः । (भा.) ज्ञेयाभिमुखीकरणेन विधिवत् भवन्ति ; न 'ज्ञानमेव कुरु' इति वदन्ति श्रवणादीनि ॥ १०८-१२४

६३. उपसंहारः १२४-१२५

## परिशिष्टम्

१. मिथ्याज्ञानशब्दसंवलितानि भाष्यवाक्यानि १२६

२. व्यवहारपदघटितानि वाक्यानि १३१

३. प्रातिभासिकपदार्थविषयाणि वाक्यानि १३३

४. सुषुप्ताद्यवस्थावाक्यानि १४१

५. अव्याकृतवाक्यानि १४८

६. अविद्याश्रयवाक्यानि १५३

७. स्वाभाविकशब्दगर्भितवाक्यानि १५७

८. जीवन्मुक्तिवाक्यानि १६०

९. कारणब्रह्मवाक्यानि १६५

मुख्यशब्दसूची १६९-१७१

—:§:—

# संकेतविवरणम्

**विज्ञापना** — उपनिषदः स्वस्वनामप्रथमाक्षरेणैव सूचिताः । तत्तद्भाष्यवाक्यपरामर्शस्तु 'भा.' – इति सङ्केताक्षरसंयोजनेन कृतः । तद्यथा – 'का.'=काठकोपनिषदि ; 'का. भा.'=काठकोपनिषद्भाष्ये – इत्येवं सर्वत्रोह्यम् ॥

| सङ्केतः | **विवरणम्** |
|---|---|
| अध्या. भा. | शङ्करभगवत्पादीये, अध्यासभाष्ये |
| अव. | अवतरणिकायाम् |
| इ सि. | इष्टसिद्धौ, एम्. हिरियण्णमहाशयैः सम्पादितायाम् , बरोडा गायकवाड ग्रन्थमालायां क्रि. श. 1933तमवत्सरे मुद्रापितायाम् |
| उप. | उपदेशसाहस्र्याम् , महादेवशास्त्रिभिः संपादितायाम् , Oriental Library संस्थया महीशूरनगरे मुद्रापितायाम् |
| गी. | भगवद्गीतासु |
| गी. भा. | भगवद्गीताभाष्ये शङ्करभगवत्पादकृते, अष्टेकर् कंपनी, पूना – इत्येतैः, क्रि. श. 1929तम वत्सरे मुद्रापितायाम् |
| गौ का. | गौडपादीयकारिकासु, दशोपनिषद्भाष्ये |
| पं पा. | पञ्चपादिकायाम् , महामहोपाध्यायादिबिरुदाङ्कितैरनन्तकृष्णशास्त्रिभिः संपादितायाम् , The Metropolitan Printing & Publishing House संस्थया कलिकत्तानगरे क्रि. श. 1933तमवत्सरे प्रकाशितायाम् |
| पा. | पत्रपार्श्वे, 'पार्श्वयोः', 'पार्श्वेषु' इति यथायोगम् |
| पं. वि. | पञ्चपादिकाविवरणे, महामहोपाध्यायैः अनन्तकृष्णशास्त्रिभिः संपादिते, कलिकत्तायां प्रकाशिते |
| वा. भा. | वाचस्पतिमिश्रविरचितायां भामत्यां निर्णयसागरमुद्रणालयसंस्थया क्रि.श. 1917तमे वत्सरे प्रकाशितायाम् |
| सू. भा. | ब्रह्मसूत्रभाष्ये मूलमात्रे निर्णयसागरमुद्रणालयसंस्थया क्रि. श. 1927 तमे वत्सरे प्रकाशिते |
| सं. शा. | संक्षेपशारीरके, सर्वज्ञात्ममुनिविरचिते, आनन्दाश्रमः, पूना – इत्येतैः, क्रि. श. 1918तम वत्सरे मुद्रापितायाम् |

—§O§—

॥ ॐ ॥

भाष्याशयवर्णने प्रस्थानभेदाः

तत्र

# पञ्चपादिकाप्रस्थानम्

—:§:—

## ग्रन्थारम्भे हेतुः

१. सुप्रसिद्धमेतद् यथा शङ्करभगवत्पादप्रणीतानां प्रस्थानत्रय-भाष्याणाम् आशयं विवरीतुं प्रवृत्ता व्याख्यानकारा भिन्नभिन्नप्रस्थानजुषः, स्वेन स्वेनादृते व्याख्यानप्रकारविशेषे भगवत्पादानामेव वेदान्तसिद्धान्त-प्रस्थानम् आत्मना समनुसृतं प्रतिजानत इति । सम्प्रतितना वेदान्तविद्वांसस्तु व्याख्यानानां प्रस्थानभेदम् अभिजानन्तोऽपि वदन्ति 'परमार्थवस्तुप्रतिपादने प्रवृत्तैर्व्याख्यातृभिः प्रक्रियाभेदे समादृते सत्यपि प्रतिपिपादयिषिताकल्पित-वस्तुप्रतिपत्त्युपायतया कल्प्यमानेषु व्यवहारमात्रसिद्धविषयेषु तात्पर्याभावात् परस्परं विप्रतिपत्तिर्न दोषाय' इति । परं तु अत्यन्तप्रधानेष्वपि प्रमेयभेदेषु विविधं प्रस्थितानां व्याख्यानप्रकाराणां कया प्रणाळिकया एकवाक्यता ?—इति तु नैव कुत्रचित् केनचित् प्रदर्शितम् इत्यतः 'अमी व्याख्यानकारा भाष्याशयं यथावदुद्घाटयन्ति वा न वा' इति व्याकुलचित्ता भवेयुर्जिज्ञासवः । अतोऽत्र भाष्यार्थं निःसन्दिग्धं निर्णेतुकामानां मुमुक्षूणां कृते प्रत्येकं व्याख्यान-प्रस्थानानि भाष्यप्रस्थानेन तुलयितुं प्रयत्नः क्रियते मया ॥

## विचारस्यागतार्थता

२. यद्यपि वेदान्तप्रक्रियाप्रत्यभिज्ञाभिधे निबन्धे परीक्षितान्येव व्याख्यानप्रस्थानान्यपि भगवत्पादप्रस्थानेन साम्यवैषम्यनिर्धारणार्थमेव, तथापि

तत्र 'भगवत्पादाभिमतं वेदान्तप्रक्रियारहस्यं नैव यथावदनुसृतम् अनुशाङ्करनिबन्धेषु' इत्येतावत् प्रतिपादितम्, न तु भाष्याशयविरुद्धा अप्यभिप्रायाः किं दृश्यन्ते व्याख्यानेषु भाष्यकारीयत्वेनोपन्यस्ताः – इत्येतन्निर्णयार्थं विशिष्य यत्न आस्थितः। अतोऽत्र प्रस्थानान्तरसंक्रान्तिपरिहारेण शुद्धशाङ्करवेदान्तोपदेशसतत्त्वनिर्धारणार्थं भूयोऽपि व्याख्यानानि विस्तरशः परिशील्यन्ते – इति विशेषः ॥

## पञ्चपादिकाया एव प्रथमं परीक्षणे हेतुः

३. तत्र भाष्यव्याख्यानजातं त्रिधा राशीकृत्य परिशीलनीयं भवति – पञ्चपादिकाप्रस्थानम्, भामतीप्रस्थानम्, वार्तिकप्रस्थानं चेति। तत्र यद्यपि तत्तद्व्याख्यानस्य उपव्याख्यानानि स्वस्वमूलविरोधेनापि क्वचित् क्वचित् स्वं स्वम् अभिप्रायविशेषम् उपस्थापयन्ति, तथापि यथोक्तमूलप्रस्थानान्येव आकरत्वेन स्वीकृत्य तानि प्रवृत्तानीत्यतो यथोदाहृतान्येव प्रप्रथमं परीक्षितव्यानि भवन्ति। तत्रापीदानीं प्रचलितेष्वद्वैतग्रन्थेषु प्रायशः पञ्चपादिकातद्विवरणप्रस्थानविषये पण्डितप्रकाण्डा अपि अध्ययनक्रमसंप्रदायपरम्पराप्रभाविताः दुर्निवाराभिनिवेशग्रस्ताश्च, एतत्प्रस्थानगताः केचनाभिप्राया सुस्फुटं भाष्यविरुद्धा अपि भाष्यार्थमेव याथातथ्येन प्रतिबिम्बयन्तीत्यभिमन्यन्ते। अतोऽत्र सर्वेषामपि व्याख्यानप्रस्थानानां भाष्यसरण्युल्लङ्घने परमप्रचोदकं पञ्चपादिकाग्रन्थमेव प्रप्रथमं लक्ष्यं विधाय तद्द्वारेणैव सर्वव्याख्यानसाधारणान् भाष्यविरुद्धवादान् संगृह्य दर्शयिष्यामः ॥

## पञ्चपादिकासंस्तवः

४. पञ्चपादिकानाम्ना अद्य प्रचलितो चतुःसूत्रमात्रपरिच्छिन्नो ग्रन्थभागः, वस्तुतः शङ्करभगवत्पादशिष्यैः पद्मपादाचार्यैः परिपूर्णतया विरचितायाः सूत्रभाष्यटीकायाः कारणविशेषात् प्रणष्टाया एकदेशः – इति कथा माधवीयशङ्करदिग्विजये सन्दब्धा दृश्यते। पूर्णमेव भाष्यं व्याचिख्यासितं ग्रन्थकारेण – इत्यत्र लिङ्गानि च दृश्यन्ते ग्रन्थशरीरे।

अस्याष्टीकायाः 'पञ्चपादिका' इति नाम केन कदा किंनिमित्तं कृतम् इति तु टीकाविवरणकर्तृभिः "प्रकाशात्मा यतिः सम्यक् प्राप्तविद्याशुशुत्सया। यथाश्रुतं यथाशक्ति व्याख्यास्ये पञ्चपादिकाम् ॥" इति सनामोल्लेखं टीकाव्याख्यानं प्रतिजानानैः, तदन्यैर्वा टीकाव्याख्यातृभिः, नैव स्पष्टीकृतम्। न च टीकाकारेण ग्रन्थनाम, स्वनाम वा, कुत्रचिल्लिखितम्–इत्यतो न किञ्चिदत्र निश्चित्य वक्तुं पार्यते। संप्रत्युपलभ्यमानेषु व्याख्यानेषु पञ्चपादिकाया एव प्राचीनतमत्वात्, यावल्लभ्यटीकाभागावलोकनेनापि एतत्प्रस्थानस्य भाष्यप्रस्थानाद् वैलक्षण्यस्य सुस्फुटं शक्यविज्ञानत्वात्, ग्रन्थनिर्माणकालादद्यावधि एतस्यैव व्याख्यानस्य विवरणाद्युपबृंहितस्य शङ्करानुयायिभिः सबहुमानम् अधीयमानत्वाच्च एतद्विमर्शनमेव सर्वप्रथमं क्रियते ॥

## सूत्रभाष्यवाक्यानामेव प्रथममुदाहरणे हेतुः

५. पञ्चपादिकायाः साक्षात्सूत्रभाष्यव्याख्यानत्वेन प्रवृत्तत्वात्, सूत्रभाष्याभिप्रायैरेव प्रप्रथमतो विरोधः प्रख्यापनीयः, तदन्वेव तु उपनिषद्भाष्योपदेशैः, गीताभाष्योपदेशैश्च। तत्रापि स्वतःसिद्धं निष्प्रपञ्चं वस्तु समर्पयितुम् अध्यारोपापवादप्रक्रियायाः सर्वास्वप्युपनिषत्सु समाश्रीयमाणत्वात्, सर्वविधाध्यारोपचित्राणां भित्तिरूपाया अविद्यायाः सूत्रभाष्योपोद्घात एव मूलाध्याससतत्त्वपरिशीलनेन सविस्तरं निरूपितत्वात्, तत्रैव च पञ्चपादिकायां व्याख्यानवैषम्येण प्रस्थानभेदाङ्कुररोपणे बीजावापसमारम्भाच्च सूत्रभाष्यवाक्यान्येव समुदाहृत्य प्रकृतप्रस्थानद्वयतुलना प्रारभ्यते ॥

## भाष्यगतम् अध्यासस्वरूपप्रदर्शनवाक्यम्

६. तत्र, इदं तावद् भाष्ये समुपलभ्यमानम् अध्यासस्वरूपप्रदर्शनवाक्यम् –

(१) "युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोः, तमःप्रकाशवद् विरुद्धस्वभावयोः, इतरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतराम् इतरेतरभावानुपपत्तिः–इत्यतः, अस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्यय-

गोचरस्य विषयस्य तद्धर्माणां च अध्यासः, तद्विपर्ययेण विषयिणः तद्धर्माणां च विषये अध्यासो मिथ्या इति भवितुं युक्तम् ॥

तथापि अन्योन्यस्मिन् अन्योन्यात्मकताम्, अन्योन्यधर्मांश्च अध्यस्य इतरेतराविवेकेन, अत्यन्तविविक्तयोर्धर्मधर्मिणोः, मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य 'अहमिदम्, ममेदम्' इति नैसर्गिकोऽयं लोकव्यवहारः ॥ "

इति ॥

अत्र—यद्यपि विरुद्धप्रत्ययगोचरत्वात्, सत्यानृतस्वरूपत्वेन विरुद्धस्वभावत्वाच्च, चिदचितोः परस्परात्मता परस्परधर्मसम्भिन्नता वा कथमपि न संभवतीति परस्परत्र परस्पराध्यासः परस्परधर्माध्यासो वा क्रियत इति न शक्यशङ्कं युक्तितः, तथापि तादृशमध्यासं कृत्वैव 'अहम्', 'मम' — इति व्यवहरति लोकः ; सा चेयं व्यवहृतिः स्वाभाविकी सर्वेषाम् अविवेकदशायाम् — इत्युच्यत इति स्पष्ट एव वाक्याभिप्रायो यथाश्रुताक्षरानुसारिणां निष्पक्षपातमालोचयतां पदार्थसङ्गतिं भाष्ये ॥

## भाष्ये विवक्षितो विरोधः कीदृशः ?

७. अत्र, "कोऽयं विरोधः ? कीदृशो वा इतरेतरभावोऽभिप्रेतो भगवतः, यस्यानुपपत्तेः 'तमःप्रकाशवत्' इति निदर्शनम् ?" — इत्याशङ्क्य पञ्चपादिकाकार आह —

"यदि तावत् सहानवस्थानलक्षणो विरोधः, ततः प्रकाशभावे तमसो भावानुपपत्तिः । तदसत् ; दृश्यते हि मन्दप्रदीपे वेश्मनि अस्पष्टं रूपदर्शनम्, इतरत्र च स्पष्टम् । तेन ज्ञायते मन्दप्रदीपे वेश्मनि तमसोऽपि ईषदनुवृत्तिरिति, तथा छायायामपि औष्ण्यम् तारतम्येनोपलभ्यमानम् आतपस्यापि तत्र अवस्थानं सूचयति । एतेन शीतोष्णयोरपि युगपदुपलब्धेः सहावस्थानम् उक्तं वेदितव्यम् ॥

उच्यते - परस्परानात्मतालक्षणो 'विरोधः' । न जातिव्यक्त्योरिव परमार्थतः परस्परसम्भेदः सम्भवति - इत्यर्थः । तेन इतरेतरभावस्य इतरेतरसम्भेदात्मकत्वस्य अनुपपत्तिः ॥" पं. पा. ५२-५९.

इति ॥

नेदं समीचीनं व्याख्यानम् इत्यस्मन्मतिः । भाष्याक्षरबहिर्भावात्, लोकानुभवविरोधाच्च । भाष्याक्षरबाह्यत्वं तावत् — इह खलु सूत्रभाष्ये,

अन्यत्र वा न भाष्यकृत् परस्परानात्मतालक्षणं विरोधं तमःप्रकाशयोरन्वाचष्टे । प्रत्युत सहानवस्थानमेवानयोस्तत्र तत्र निदर्शयति । इह च 'तमःप्रकाशवत् विरुद्धस्वभावयोः' इत्येव भाष्याक्षराणि संदृश्यन्ते । तानि च प्रकाशस्य तमसा स्वभावविरोधं वक्तुं प्रभवन्ति, न तु परस्परानात्मताम् इति स्पष्टम् । ज्योतिश्चरणाधिकरणे च भाष्यकृदाह –

(2) 'तमः', 'ज्योतिः' इतीमौ शब्दौ परस्परप्रतिद्वन्द्विविषयौ प्रसिद्धौ । चक्षुर्वृत्तेर्निरोधकं शार्वरादिकं 'तमः' उच्यते, तस्या एवानुग्राहकम् आदित्यादिकं ज्योतिः' (१-१-२४, पा. ५१).

इति । अतः सिद्धमिदं सूत्रभाष्याक्षरबाह्यं व्याख्यानमिति ॥

अन्यत्र तु तमःप्रकाशयोः सहानवस्थानमेव विरोधत्वेनोल्लिख्य निदर्शितम् । तद्यथा –

(१) न हि विविशतेनापि तमःप्रकाशयोरेकत्र सद्भावः शक्यते कर्तुम्, किमुत लिङ्गैः केवलैः ॥ मुं. भा. अव. पा. १४२.

(२) न च विद्याविद्ये एकस्य पुरुषस्य सह भवतः, तमःप्रकाशाविव ॥
बृ. भा. ३-५-१, पा. ८१४.

एवं छायातपयोरपि विविक्ततामेवाह भाष्यकृत् काठकव्याख्याने –

(३) छायातपयोरिव अत्यन्तविविक्तं ब्रह्मलोक एवैकस्मिन् ॥
का. २-३-५, पा. ९९.

इति । शीतोष्णयोरपि सहावस्थानं न विज्ञायत इति ईशावास्यभाष्ये उक्तम्–

(४) न हि अग्निरुष्णः, प्रकाशश्च इति विज्ञानोत्पत्तौ यस्मिन् आश्रये तदुत्पन्नम्, तस्मिन्नेवाश्रये शीतोऽग्निः, अप्रकाशो वा – इत्यविज्ञाया उत्पत्तिः ॥ ई. भा. उपसंहारे, पा. १३-१४.

तदेवं 'तमःप्रकाशवत्' इति निदर्शनभाष्ये सहानवस्थानं तयोर्न विवक्षितमिति टीकावचनं न भाष्यानुगुणमिति स्थितम् ॥

यदपि टीकायां समाधानग्रन्थे 'परस्परानात्मतालक्षणो विरोधः । न जातिव्यक्त्योरिव परमार्थतः सम्भेदः सम्भवति–इत्यर्थः' इति, तदपि 'शीतोष्णयोर्विरोधो परस्परानात्मतालक्षणः' इत्यंशे यद्यपि सम्यगेव, चिदचितोः

परस्परात्मताया असम्भवप्रदर्शनात्; तथापि 'जातिव्यक्त्योः परस्परसम्भेद एव तादात्म्यम्' इत्यंशे नास्त्येव भाष्यानुमतिः। यत्कारणं भाष्ये एवोपलभ्यते इदं वचनम् –

> (५) शुक्लः कम्बलः, रोहिणी धेनुः, नीलमुत्पलम् – इति द्रव्यस्यैव तस्य तस्य तेन तेन विशेषणेन प्रतीयमानत्वात्, नैव द्रव्यगुणयोः, अग्निधूमयोरिव भेदप्रतीतिरस्ति। तस्मात् द्रव्यात्मकता गुणस्य। एतेन कर्मसामान्यविशेषसमवायानां द्रव्यात्मकता व्याख्याता॥ २-२-१७, पा. २३६.

इति॥

लोकानुभवविरोधः खल्वपि – यत्र मन्दप्रदीपे वेश्मनि रूपदर्शनम् अस्पष्टम्, तत्र अनुग्राहकस्य प्रकाशस्य पर्याप्तप्रमाणेन अभावादेव स्पष्टदर्शनाभावः, न तु तमसः प्रकाशस्थलेऽपि ईषदनुवृत्तेः – इत्येव जना अवयन्ति। तथा हि; वयोवृद्धाः लिखिताक्षराणि नेत्रदौर्बल्येन स्फुटमवलोकितुम् असमर्थाः सुलोचनमेव सहायीकुर्वन्तो दृश्यन्ते न तु अक्षरावारकं तमोद्रव्यम् अपसारयितुम्। यः पुनः 'चक्षुर्वृत्तेर्निरोधकं तमः' इति व्यवहारः, स तु तत्र प्रकाशाभावमेव तमःशब्देन गोचरीकरोतीति सुप्रसिद्धम्। न हि कश्चन विवेकी तमोद्रव्यं प्रकाशव्यापारेण विनाश्यम् अपसारणीयं वेति मन्यते लोके इति॥

अतः प्रकाशस्थानीयं चिद्वस्तु, तम इवासदपि सदिव प्रतिभासमानं विषयभूतमनात्माभिख्यम् – इत्येव तयोर्विरुद्धस्वभावकत्वमिष्यते तमःप्रकाशदृष्टान्तप्रणयनेनेति युक्तमुत्पश्यामः। एवमेव हि सिद्धान्तग्रन्थे भाष्यकृदपि स्फुटयिष्यति 'सत्यानृते' इति विशेषणोपादानेनेति॥

## चिदचितोर्विरुद्धस्वभावत्वं कथम्?

८. अथ दार्ष्टान्तिके चिदचितोर्विरुद्धस्वभावत्वं कथं प्रसाधितम् इत्येतच्चिन्तनीयम्। तत्र भाष्यम् (१) 'युष्मदस्मत्प्रत्ययगोचरयोः' इति, (२) 'विषयविषयिणोः' इति च विशेषणद्वयं साभिप्रायमादत्ते इति व्यक्तम्। तत्र विषयी अस्मत्प्रत्ययगोचरः, विषयस्तु युष्मत्प्रत्ययगोचरः, प्रत्यययोश्चानयोः

प्रत्यक्पराग्विषयत्वेन विरुद्धस्वभावपदार्थकर्मकत्वमिति यथाश्रुतार्थः स्फुरति ; चिद्वस्तु विषयि, अचित्तु विषयात्मकं किञ्चित् – इति च । अत्र यथा तमः-प्रकाशौ विरुद्धस्वभावौ लोके दृष्टौ, एवं विषयविषयिणावित्याशयो गम्यते प्रथमविशेषणेन । न हि अस्मत्प्रत्ययगोचरत्वस्वभावकं वस्तु जातुचित्, युष्मत्प्रत्ययगोचरत्वस्वभावकं भवेदिति शक्यशङ्कम् इति, अतः विषयिणि विषयत्वाध्यासः, विषये च विषयित्वाध्यासः नैव संभावित इति तयोः स्वभाववैपरीत्यगमनेन लोको व्यवहरतीति न युक्तिमदिदं वचः – इत्यर्थो भाष्यस्यावसीयते ॥

## किं नामास्मत्प्रत्ययगोचरत्वं विषयिणः ?

९. तदेतावदेव वाक्यशेषेऽपि स्फुटितमुपलभ्यते भाष्ये – 'अस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चाध्यासः, तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषये अध्यासो मिथ्येति भवितुं युक्तम्' इति । अत्र 'युष्मदस्मत्प्रत्ययगोचरयोः' इति, 'अस्मत्प्रत्ययगोचरे विषयिणि' इति चाभ्यासेन द्विरुक्तम् 'अस्मत्प्रत्ययगोचरत्वम्' कीदृशम् ? – इति विचिन्त्यम् । अत्र पञ्चपादिका –

> "अस्मत्प्रत्ययगोचरे योऽनिदमंशश्चिदेकरसः, तस्मिन्, तद्बलनिर्भासिततया लक्षणतो युष्मदर्थस्य मनुष्याभिमानस्य सम्भेद इवावभासः, स एवाध्यासः, .... स मिथ्या इति भवितुं युक्तम्" इति ॥ पं. पा. १५-१७.

अत्र 'अस्मत्प्रत्ययगोचरत्वात् युष्मत्प्रत्ययगोचरत्वाच्च' इति यदेवाश्रित्य चिदचितोर्विरुद्धस्वभावकत्वमुक्तं प्रथमवाक्ये, तदेव 'इत्यतः' इति हेतूकृत्य अध्यासो मिथ्येति भवितुमर्हतीत्युच्यते इति तावदभ्युपगन्तव्यम् ; अन्यथा अन्यदेव हेतुत्वेन प्रतिज्ञातम्, अन्यदेव तूक्तम् अभीष्टसाधनवेलायाम् इति वैरूप्यमापद्येतेति । अथ च टीकाकृदयम् 'अस्मत्प्रत्ययगोचरे' इत्यस्य व्याख्यानावसरे अस्मत्प्रत्यये यश्चिदेकरसोंऽशः तमेव गृहीतवान्, न तु प्रत्ययगोचरमपि इति स्फुटं भाष्यव्याख्यानयोरनानुरूप्यम् ॥

## अस्मत्प्रत्ययगोचरत्वमात्मनः किमभ्युपगतं भाष्ये, किं वा नाभ्युपगतम् ?

१०. 'अस्मत्प्रत्ययगोचरे' विषयिणि इति वदता आचार्येण किं विवक्षितम् ? किं विषयिणोऽस्मत्प्रत्ययगोचरत्वमपि तस्याभीष्टम्, किं वा अहङ्कारे अभिव्यज्यत इत्येतावता अस्मत्प्रत्ययगोचर इत्युपचर्यत इतीयन्मात्रं तदभिमतम् ? – इत्येतदत्र विचारणीयम् । यावता भाष्यकारो वक्ष्यति सुस्फुटम् 'न तावदयमेकान्तेनाविषयः । अस्मत्प्रत्ययविषयत्वात्' (अध्यासभा. पा. २) इति । टीकाकारस्तु तदेव वाक्यमेवं व्याख्यास्यति – 'अहङ्कारग्रन्थिरस्मच्छब्दितः ; प्रत्ययश्चासौ आदर्श इव प्रतिबिम्बस्य अनिदञ्चित्संवलितत्वेन तस्याभिव्यक्तिहेतुत्वात्' (पं. पा. ४०३) इति । अत्र च 'अस्मत्प्रत्ययगोचरे' इति भाष्यं व्याचिख्यासुराह 'अस्मत्प्रत्यये योऽनिदमंशः' इत्यादि । अतश्च किमहङ्कारे अभिव्यक्तत्वमात्रमस्मत्प्रत्ययगोचरत्वम्, उत अहम्प्रत्ययविषयत्वमपि तत् ? – इति विचिन्त्यमेतत् ॥

वयं तु पश्यामो यथोक्तप्रत्ययगोचरत्वमपि विवक्षितं भगवतेति । कुतः ? 'युष्मदस्मत्प्रत्ययगोचरयोः', 'अस्मत्प्रत्ययगोचरे' इत्यभ्यासदर्शनात् ; न हि तद्गोचरत्वाननुज्ञातुः, ईदृशो विशेषणाभ्यासो युज्यते । उत्तरत्रापि स्वीकारदर्शनाच्च । एवं हि भाष्यकारः, अध्याससंभवम् आक्षिप्य परिहरिष्यत्युत्तरत्र –

> (१) कथं पुनः प्रत्यगात्मनि अविषये अध्यासो विषयतद्धर्माणाम् ? सर्वो हि पुरोऽवस्थिते विषये विषयान्तरम् अध्यस्यति ; युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनः, अविषयत्वं ब्रवीषि । उच्यते – न तावदयम् एकान्तेनाविषयः, अस्मत्प्रत्ययविषयत्वात् ॥ अध्या. भा. पा. २.

इति ॥

अत्र खलु पूर्वपक्षवादी युष्मत्प्रत्ययगोचरत्वमेव विषयत्वप्रयोजकं मन्वानः शङ्कते 'कथं पुनः प्रत्यगात्मनि अविषये अध्यासः' इति । सिद्धान्ती तु अस्मत्प्रत्ययगोचरत्वेन विषयत्वमप्यस्ति प्रत्यगात्मनः – इति ब्रवीतीति स्पष्टम् । अथ च टीकाकारः तादृशप्रत्यये यश्चिदंशः, तमेव त्वत्र गृह्णातीति न्यूनता व्याख्यायां स्फुटा ॥

## अस्मत्प्रत्ययगोचरत्वं टीकाकृदभिमतम्

११. अत्र पञ्चपादिकाकारस्य अभिप्रायस्तु एवं विवृतम् उत्तरत्र–

(१) अस्मत्प्रत्ययाभिमतोऽहङ्कारः ; स च इदमनिदंरूपवस्तुगर्भः सर्वलोकसाक्षिकः ॥ पं॰ पा॰ ३०२॰

इति ॥

(२) यद्यपि चैतन्यैकरसोऽनिदमात्मकत्वात् अविषयः, तथापि अहङ्कारे व्यवहारयोग्यो भवतीति गौण्या वृत्त्या अस्मत्प्रत्ययविषयता उच्यते । प्रमेयस्य च व्यवहारयोग्यत्वाव्यभिचारात् ॥ पं॰ पा॰ ३५४॰

इति च ॥'

नेदं समीचीनं व्याख्यानम् इति वयं पश्यामः । एवं हि अस्मत्प्रत्ययगोचरत्वं नास्त्येव मुख्यवृत्त्या प्रत्यगात्मनि इत्यापद्यते । तथा च अविषयत्वादात्मनस्तस्मिन्नध्यासो न संभवी – इति यदुक्तं शङ्कावादिना, तदेव दृढीकृतं भवतीति मूले कुठारपातः स्यात् । अत्राध्यासविषये या शङ्का तत्समाधानं च टीकाकृतः –

(३) ननु व्यवहारयोग्यत्वे अध्यासः, अध्यासपरिनिष्पन्नाहंप्रत्ययबलात् व्यवहारयोग्यत्वम् इति प्राप्तम् इतरेतराश्रयत्वम् । न । अनादित्वेन प्रत्युक्तत्वात्[1] ॥ पं॰ पा॰ ३५५॰

इति । तदुभयमपि भाष्यबहिर्भूतम् । न हि कुत्रचित् सूत्रभाष्ये अहङ्कारे व्यवहारयोग्यत्वादेव आत्मनो विषयत्वमिति, तादृशयोग्यत्वाध्यासयोर्बीजाङ्कुरयोरिव अनादिकार्यकारणभाव इति वा वर्णितं समुपलभ्यते । युक्तिविरुद्धं

---

1. भामत्यामपि पञ्चपादिकासरणिरेवानुसृता दृश्यते –

"तस्मात् चिदात्मनोऽव्यतिरेकात् जीवः स्वयंप्रकाशोऽपि अहंप्रत्ययेन कर्तृभोक्तृतया व्यवहारयोग्यः क्रियत इति 'अहंप्रत्ययालम्बनम्' उच्यते । न चाध्यासे सति विषयत्वम्, विषयत्वे चाध्यासः – इत्यन्योन्याश्रयत्वम् इति साम्प्रतम्, बीजाङ्कुरवदनादित्वात्, पूर्वपूर्वाध्यासतद्वासनाविषयीकृतस्य उत्तरोत्तराध्यासविषयत्वाविरोधात् इत्युक्तं 'नैसर्गिकोऽयं लोकव्यवहारः' इति भाष्यग्रन्थेन । तस्मात् सुष्ठूक्तं 'न तावदयमेकान्तेनाविषयः' इति । जीवो हि चिदात्मतया स्वयंप्रकाशतया अविषयोऽपि औपाधिकेन रूपेण विषय इति भावः ॥" भा॰ भा॰ ३९॰

इति । अत्राहंप्रत्ययोऽङ्गीकृतः न तु पूर्वटीकायामिव अहङ्कार एव प्रत्ययत्वेन स्वीकृतः – इति विशेषः ॥

चेदं व्याख्यानम् । कथम् ? यदि हि अध्यासोऽपि बीजवत् अङ्कुरवद्वा अनादिप्रवाहगतैकव्यक्तित्वेन स्वीक्रियेत, तर्हि यत्कालाधारः स प्रवाहः स नैव स्यादध्यस्तः ; 'अध्यास एव तु सर्वव्यवहारहेतुः' इति परमसिद्धान्तश्च परित्यक्तः स्यात् । तदेतत् पञ्चपादिकामतम् अध्यासविषयकविचारे पुनरपि वितत्य विमृक्ष्याम इत्यास्तां तावत् ॥

भाष्यविरोधाच्च नादेयमिदं व्याख्यानम् । विद्यते हि प्रत्यक्षं भाष्यम् । अहंप्रत्ययविषयत्वमात्मनो वक्तृ –

(४) स्नानाचमनयज्ञोपवीतादिना 'अहं शुद्धः संस्कृतः' इति यत्र बुद्धिरुत्पद्यते स संस्क्रियते । स च देहेन संहत एव, तेनैव हि अहङ्कर्त्रा अहंप्रत्ययविषयेण प्रत्ययिना सर्वाः क्रिया निर्वर्त्यन्ते । तत्फलं च स एवाश्नाति ॥ १-१-४, पा. १७.

इति । अत्र हि 'कर्ताऽहम्, अस्य कर्मणः फलं भोक्ष्ये परलोके' इति यो मन्यते स आत्मा अस्मत्प्रत्ययगोचर इत्युच्यते । स्पष्टतरं चेदमुक्तमन्यत्र –

(५) ननु, आत्मा अहंप्रत्ययविषयत्वात् उपनिषत्स्वेव विज्ञायत इत्यनुपपन्नम् । न । तत्साक्षित्वेन प्रत्युक्तत्वात् । न हि अहंप्रत्ययविषयकर्तृव्यतिरेकेण तत्साक्षी सर्वभूतस्थः, समः, एकः, कूटस्थनित्यः, पुरुषः, विधिकाण्डे तर्कसमये वा केनचिदधिगतः सर्वस्यात्मा ॥ १-१-४, पा. २०.

इति । अत इदं निश्चितं यत् आत्मा द्विविध इष्यते भाष्ये – अस्मत्प्रत्ययविषय एकः, कर्ता भोक्ता च ; यः खलु मीमांसकैस्तार्किकैश्च 'जीव' इत्यभिधीयते । सोऽपि भवत्येव विषयी बाह्यविषयान् प्रति । अविषयश्चिदात्मकोऽपरः ; य एव औपनिषदः पुरुष इति व्यपदिश्यते वेदान्तिभिः । उभयथापि विषयविषयिणोर्विरुद्धस्वभावत्वात् परस्पराध्यासो मिथ्येति भवितुं युक्तम् – इति शङ्कावादिनो मतम् । उभयत्रापि समानं प्रतिवचनम् – एवम् अत्यन्तविविक्तयोरपि विषयविषयिणोरविवेकात्तु परस्पराध्यासो दृष्टो लोके इति ॥

## अस्मत्प्रत्ययविषयत्वाङ्गीकारः कथं कृत्वा ?

१२. एवमेव च भाष्ये वाक्यशेषे अध्याससंभवगताक्षेपपरिहारौ उभयत्राप्युपन्यस्तौ सङ्गच्छेते –

(1) कथं पुनः प्रत्यगात्मन्यविषये अध्यासो विषयतद्धर्माणाम् ? सर्वो हि पुरोवस्थिते विषये विषयान्तरमध्यस्यति। युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वं ब्रवीषि ? पा. २.

इत्याक्षेपः । समाधानं तु –

(२) न तावदयमेकान्तेनाविषयः । अस्मत्प्रत्ययविषयत्वात् ॥ पा. २.

इति प्रथमम् अस्मत्प्रत्ययविषयत्वमङ्गीकृत्य ॥

(३) अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः ॥ पा. २.

इति केवलस्य चिदात्मकतापक्षमपि मनसि कृत्वा ॥

ननु कथम् अध्याससंभावनार्थमपि प्रत्यगात्मनो अस्मत्प्रत्ययविषयत्वाङ्गीकारो भाष्ये ? प्रत्युक्तमेव हि स्पष्टाक्षरैरहंप्रत्ययविषयत्वमन्यत्र –

(४) प्रत्यगात्मग्राह्यता च आत्मनोऽहमिति (इति) मीमांसकपक्षः प्रत्युक्तः ॥ बृ. भा. ४-३-७, पा. ८७४.

इति ॥

(५) 'हन्ताऽहम्', 'हतोऽस्म्यहम्' इति देहहननेन आत्मानम् अहंप्रत्ययविषयं यौ विजानीतः, तौ आत्मस्वरूपानभिज्ञौ – इत्यर्थः ॥ गी भा. २-१९, पा. १७.

इति ॥

(६) आत्मनश्च विज्ञेयत्वे ज्ञात्रभावप्रसङ्गः ; ज्ञेयत्वेनैव विनियुक्तत्वात् । एक एवाऽऽत्मा ज्ञेयत्वेन ज्ञातृत्वेन च उभयथा भवतीति चेत् । न, युगपत् अनंशत्वात् । न हि युगपत् ज्ञेयज्ञातृत्वोपपत्तिः ॥ तै. भा. २-१, पा. २४३.

इति च ? सत्यम् । 'आत्मा अहंप्रत्ययेन प्रत्यक्षीक्रियत इति, अनुमीयते इति वा ये मन्यन्ते, ये च अहंप्रत्ययविषयतैव आत्मनः परमार्थरूपम्, नान्यदस्ति तद्व्यतिरिक्तं केवलचिदात्मकमपि–इत्यभिमन्यन्ते, तन्मतनिराकरणं क्रियते यथोदाहृतवाक्यैरित्यविरोधः । तथा हि भाष्यकारीयं वाक्यम् –

(७) तस्मात्, प्रत्यक्षविषयवैलक्षण्यात् प्रत्यक्षात् आत्मास्तित्वसिद्धिः । तथा अनुमानादपि । श्रुत्या आत्मास्तित्वे लिङ्गस्य दर्शितत्वात्, लिङ्गस्य च प्रत्यक्षविषयत्वात्, नेति चेत् । न । जन्मान्तरसंबन्धस्याग्रहणात् । आगमेन तु आत्मास्तित्वे अवगते वेदप्रदर्शितलौकिकलिङ्गविशेषैश्च तदनुसारिणो मीमांसकाः, तार्किकाश्च अहंप्रत्ययलिङ्गानि च वैदिकान्येव स्वमतिप्रभवाणि – इति कल्पयन्तो वदन्ति प्रत्यक्षश्च अनुमेयश्च आत्मा – इति ॥ बृ. भा. अव. पा. ६०८.

(८) यथा प्रसिद्धितस्तु विधिप्रतिषेधशास्त्रश्रवणान्यथानुपपत्त्या अनुमितात्मास्तित्वः, आत्मविशेषानभिज्ञः, श्रद्दधानतया च प्रवर्तते – इति सर्वेषां नः प्रत्यक्षम् ॥ गी. भा. १३-२, पा. १९४.

## आत्मनोऽहंप्रत्ययविषयता स्वीकृता किंप्रयोजना ?

१३. अथ किंप्रयोजना स्यात् अहंप्रत्ययविषयता स्वीकृता प्रत्यगात्मनः ? – इत्येतद् विचारणीयम् । तदिदमुक्तमेवाधस्तात् । अहंप्रत्ययविषयात्मकमिव भासते यद्यत् व्यवहारे, तत्र तत्राऽऽत्ममतिं कुर्वते लौकिकाः । प्रत्यक्षानुमानादिप्रमाणावगतैरुपायैः स्वेष्टानिष्टप्राप्तिपरिहारार्थम्–इति प्रसिद्धमेतत् । तत्र तु अस्त्यात्मा कार्यकरणसङ्घातव्यतिरिक्तः, कर्ता भोक्ता च इति ज्ञानं नोपयुज्यते । लोकत एव इष्टानिष्टप्राप्तिपरिहारोपायानां सिद्धत्वात् । यथाह भाष्यकारः –

(१) न हि देहव्यतिरिक्तात्मज्ञानं लौकिकेषु कर्मसूपयुज्यते । सर्वथा दृष्टार्थप्रवृत्त्युपपत्तेः । वैदिकेषु तु देहपातोत्तरकालफलेषु देहव्यतिरिक्तज्ञानमन्तरेण प्रवृत्तिर्नोपपद्यते इति उपयुज्यते व्यतिरेकविज्ञानम् ॥ सू. भा. ३-४-२, पा. ४३४.

तस्मात् शास्त्रीयकर्मसु प्रवृत्तौ कर्मकाण्डप्रामाण्यार्थम् अस्मत्प्रत्ययगोचरत्वम् आत्मनः स्वीकृत्याध्यासगताक्षेपपरिहारौ इति गम्यते । उक्तं च बृहदारण्यकभाष्ये –

(२) तस्मात्, जन्मान्तरसंबन्ध्यात्मास्तित्वे जन्मान्तरेष्टानिष्टप्राप्तिपरिहारोपायविशेषे च शास्त्रं प्रवर्तते ॥ बृ. भा. अव.

इति ॥

किञ्च, यथैव वैदिककर्मसु प्रवृत्तिर्देहादिव्यतिरिक्ताहंप्रत्ययविषयात्मनः सत्त्वं विज्ञातवत एवावकल्पते, तथैव उपासनासु प्रवृत्तिरपि । न हि 'अहं कर्ता स्वर्गब्रह्मलोकादिफलभोक्ता' इति विज्ञानमन्तरेण शास्त्रीये उपासनानुष्ठाने अधिक्रियेत कश्चित् इति । तथा च भाष्यम् –

(३) शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वा आत्मनः परलोकसंबन्धम् अधिक्रियते, तथापि न वेदान्तवेद्यम् अशनायाद्यतीतम् अपेतब्रह्मक्षत्रादिभेदम्, असंसार्यात्मतत्त्वम् अधिकारे अपेक्ष्यते । अनुपयोगात्, अधिकारविरोधाच्च ॥ अध्या. भा. पा. ३.

इति ॥

शास्त्रीयव्यवहारः कर्मोपासनयोरनुष्ठानं देहाद्यतिरिक्ताहंप्रत्ययविषयात्मनो ज्ञानमपेक्षते इत्यभ्युपगतमत्र ॥

(४) यद्यपि आत्मशब्दस्य प्रत्यगर्थत्वं 'सर्वं खल्विदं ब्रह्म' इति च प्रकृतम्, 'एष म आत्माऽन्तर्हृदये एतद् ब्रह्म' इत्युच्यते तथापि अन्तर्धान-मीषदपरित्यज्यैव एतमात्मानम् इतोऽस्माच्छरीरात् प्रेत्य अभिसंभवितास्मि - इत्युक्तम् ॥ छां. भा. ३-१४-४, पा. ४३०, ४३१.

अत्र ब्रह्मात्मप्रतिपत्त्यर्थं शरीरपातोत्तरकालोदीक्षणश्रवणात्, आत्मनः परलोकसंबन्धार्थम्, अहंप्रत्ययविषयता कर्तृभोक्तृत्वादिकं च अपेक्ष्यत इत्युच्यत इति स्पष्टम् । तदेवम् अद्वैतादीषद्विकृतब्रह्मविषयाणि उपासनानि ज्ञानकाण्डे एव विधीयन्ते - इत्यतः तत्राधिकारसंपत्त्यर्थम् इहापि ब्रह्मजिज्ञासायाम् अस्मत्प्रत्ययगोचरस्यात्मनः स्वीकृतिरवश्या भवति । तस्मात् विषयविषयिणोर्युष्मदस्मत्प्रत्ययगोचरत्वेन विरुद्धस्वभावतां व्यवहारदृष्ट्या मुख्यवृत्तामेव स्वीकृत्यात्र अध्यास आक्षिप्यते समाधीयते च इत्यङ्गी-कर्तव्यम् ॥

अपि च मोक्षोपयोगिज्ञानबाध्याध्याससाधकदृष्टान्तसिद्ध्यर्थमपि अस्मत्प्रत्ययगोचरत्वमात्मनो मुख्यवृत्तमेवेह स्वीक्रियत इत्यङ्गीकार्यम् । तथा हि -

(५) सर्वजन्तूनां प्रसिद्धो देहादिषु अनात्मसु आत्मभावो निश्चितोऽविद्याकृतः, यथा स्थाणौ पुरुषनिश्चयः । न च एतावता पुरुषधर्मः स्थाणोर्भवति, स्थाणुधर्मो वा पुरुषस्य । तथा न चैतन्यधर्मो देहस्य, देहधर्मो वा चैतन्यस्य । सुखदुःखमोहात्मकत्वादिः, आत्मनो न युक्तः, अविद्याकृतत्वाविशेषात्, जरामृत्युवत् । न, अतुल्यत्वात् इति चेत् - स्थाणुपुरुषौ ज्ञेयावेव सन्तौ ज्ञात्रा अन्योन्यस्मिन् अध्यस्तौ अविद्यया ; देहात्मनोस्तु ज्ञेयज्ञात्रोरेव इतरेतराध्यासः -इति न समो दृष्टान्तः । अतो देहधर्मो ज्ञेयोऽपि ज्ञातुरात्मनो भवति इति चेत्- न, अचैतन्यादिप्रसङ्गात् । यदि हि ज्ञेयस्य देहादेः क्षेत्रस्य धर्माः सुखदुःख-मोहेच्छादयो ज्ञातुर्भवन्ति, तर्हि ज्ञेयस्य क्षेत्रस्य धर्माः केचन ज्ञातुरात्मनो भवन्ति अविद्याध्यारोपिताः, जरामरणादयस्तु न भवन्ति - इति विशेषहेतु-र्वक्तव्यः । न भवन्ति इत्यस्त्यनुमानम् । अविद्याध्यारोपितत्वात् जरा-मरणादिवत् इति, हेयत्वात्, उपादेयत्वाच्च इत्यादि ॥ गी. भा. १३-२, पा. १९१.

इति क्षेत्रज्ञेश्वरैकत्वदर्शनार्थं गीताभाष्यम् । तत्र यथा जरामरणे अध्यस्ते न क्षेत्रज्ञस्य इत्यभ्युपगम्येते, एवं सुखदुःखमोहादयः, कर्तृत्वभोक्तृत्वे च–इत्येते अपि अध्यस्ते इति न ते आत्मनो भवितुमर्हन्तीति युक्तिरानीता । तथा च यथा परलोके कर्मफलसंबन्धार्थं देहधर्मभूतजरामरणासंबद्ध एव अस्मत्प्रत्यय-गोचरो विषयी आत्मा कल्प्यते, एवं चिदात्मकोऽपि आत्मा सुखदुःख-मोहाद्यसंबद्धः कल्पयितव्यः, 'ब्रह्म वेद ब्रह्मैव भवति' इति श्रुतिपरिप्रापित-विद्यासार्थक्यार्थम् इत्युक्तं भवति ॥

एवम् –

(६) यत्तूक्तम् 'सदात्मा सन् आत्मानं कथं न जानीयात्' – इति । नासौ दोषः । कार्यकरणसङ्घातव्यतिरिक्तोऽहं जीवः कर्ता भोक्ता इत्यपि स्वभावतः प्राणिनां विज्ञानादर्शनात्, किमु तस्य सदात्मविज्ञानम् ॥

छां॰ ६–१६–३, पा॰ ५४०.

अत्र यथैव कार्यकरणव्यतिरिक्तजीवविज्ञानाभावो नैसर्गिकाध्यास-वशात्, एवमेव 'सदात्माऽहम्' इति ज्ञानाभावोऽपि, अत एव शास्त्रोपदेशोऽर्थ-वानित्युक्तम् । अत एव हि वाक्यशेषे उपसंहरिष्यति –

(७) तस्मात् विकारानृताधिकृतजीवात्मविज्ञाननिवर्तकमेवेदं वाक्यं तत्त्वमसीति सिद्धमिति ॥ छां॰ भा॰ ६–१६–३, पा॰ ५४०.

इति । तदेवं व्यवहारदृष्ट्या मीमांसकाद्यभिमतम् आत्मनोऽस्मत्प्रत्यय-गोचरत्वं कर्तृत्वादि चाभ्युपगम्यत एवात्रापि शास्त्रार्थवत्त्वादिहेतुभ्यः कर्त्रधिकरणे (२–३–३३ प्रभृति २–३–३९ पर्यन्तम्) वक्ष्यमाणेभ्यः, चिदात्माहं-प्रत्ययिनोरन्योन्याध्याससम्भावनोपपादकदृष्टान्तसिद्ध्यर्थं चेति स्थितम् । परमार्थदृष्ट्या कर्तृत्वमेवात्मनः इति मतं तु नाद्रियते सिद्धान्ते । तथा च गीताभाष्योदाहरणम् –

(७) तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥ १८–१६.

भाष्यम् – 'तत्र' इति प्रकृतेन संबध्यते, एवं सति, एवं यथोक्तैः-पञ्चभिर्हेतुभिर्निर्वर्त्ये सति कर्मणि । 'तत्रैवं सति' इति दुर्मतित्वस्य हेतुत्वेन संबध्यते । तत्र एतेषु (एतैः ?) आत्मानन्यत्वेन अविद्यया परिकल्पितैः

क्रियमाणस्य कर्मणः, 'अहमेव कर्ता' इति कर्तारम् आत्मानं केवलं शुद्धं तु यः पश्यति अविद्वान् ; कस्मात् ? वेदान्ताचार्योपदेशन्यायैरकृतबुद्धित्वात् असंस्कृतबुद्धित्वात् – योऽपि देहादिव्यतिरिक्तात्मवादी आत्मानमेव केवलं कर्तारं पश्यति, असावपि अकृतबुद्धिः ; अतोऽकृतबुद्धित्वात् – न स पश्यति आत्मनस्तत्त्वम्, कर्मणो वा इत्यर्थः । अतः दुर्मतिः, कुत्सिता विपरीता दुष्टा अजस्रं जननमरणप्रतिपत्तिहेतुभूता मतिः अस्य–इति दुर्मतिः । स पश्यन्नपि न पश्यति, यथा तैमिरिकः अनेकं चन्द्रम्, यथा वा अभ्रेषु धावत्सु चन्द्रं धावन्तम्, यथा वा वाहने उपविष्टः अन्येषु धावत्सु आत्मानं धावन्तम् ॥ गी. भा. पा. २६३.

अत्र अधिष्ठानादिषु कर्तृत्वोपाधिषु सत्सु शुद्धं चिदात्मानमिव देहादिव्यतिरिक्तम् अहंप्रत्ययिनमप्यात्मानं केवलं यः कर्तारं पश्यति सोऽपि दुर्मतिः – इति अहंप्रत्ययगम्यतावादो विनिन्दितः ॥

तस्मात्, यथोक्तहेतुभ्यः–अस्मत्प्रत्ययगोचरत्वम्, केवलचिदात्मकत्वं चेत्येवम् उभयथापि विषयित्वमङ्गीकृत्य 'विषयविषयिणोरन्योन्याध्यासासम्भवः शङ्क्यते परिह्रियते च प्रकृते भाष्ये इत्यवगम्यते ॥

इतश्चैवम्, यतः 'कर्त्रधिकरणे' जीवस्य कर्तृत्वं स्थापयितुं प्रवृत्तं 'शक्तिविपर्ययात्' (२–३–३८) इति सूत्रं व्याख्यास्यत् भाष्यकार आह –

(८) इतश्च विज्ञानव्यतिरिक्तो जीवः कर्ता भवितुमर्हति । यदि पुनर्विज्ञानशब्दवाच्या बुद्धिरेव कर्त्री स्यात्, ततः शक्तिविपर्ययः स्यात् करणशक्तिर्बुद्धेर्हीयेत, कर्तृशक्तिश्च आपद्येत । सत्यां च बुद्धेः कर्तृशक्तौ तस्या एवाहंप्रत्ययविषयत्वम् अभ्युपगन्तव्यम् ; अहङ्कारपूर्विकाया एव प्रवृत्तेः सर्वत्र दर्शनात् 'अहं गच्छामि', 'अहमागच्छामि', 'अहं भुञ्जे', 'अहं पिबामि' इति च ॥ सू. भा. पा. २९१.

अत्र हि जीवस्य अहंप्रत्ययविषयत्वं हेतुत्वेन स्वीकृत्यैव तस्य कर्तृत्वं साध्यते । एतच्च 'न तावदेकान्तेनाविषयः, अस्मत्प्रत्ययविषयत्वात्' इत्यत्र विषयिणो मुख्यवृत्त्यैव व्यवहारे अस्मत्प्रत्ययविषयत्वस्वीकारपक्षे स्वरसम् । तदेवम् 'अस्मत्प्रत्ययगोचरे विषयिणि' इत्यत्र मुख्यमेव विषयत्वं स्वीक्रियते न गौणम् इति सिद्धम् । एवमेव च सकलप्रमाणप्रमेयादिव्यवहाराणां शास्त्राणां च प्रवृत्तेः, व्यवहारदृष्ट्या सार्थक्यम्, परमार्थदृष्ट्या तु सर्वस्याप्यस्य

अविद्यापुरःसरत्वाद् विद्याबाध्यत्वं चेति व्यवस्था सुस्था भविष्यति । यथा वक्ष्यति भाष्यकारः –

(९) "तमेतमविद्याख्यम् आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लैकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधि-प्रतिषेधमोक्षपराणि " अध्या. पा. २.

इति ॥

(१०) "अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते " ( अध्या. पा. ४ )

इति च ॥

एतच्च वाक्यद्वयं स्वावसर एव विमृक्ष्यत इत्यलमतिप्रपञ्चेन ॥

## अध्यासो मिथ्या – इत्यस्यार्थः

१४. विषयविषयिणोर्विरुद्धस्वभावत्वात् तयोरितरेतराध्यासो न युक्तः – इति शङ्काग्रन्थः, एवमुपसंहृतो भाष्ये –

" अस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां च विषये अध्यासो मिथ्या इति भवितुं युक्तम् ॥ "

इति । अत्र पञ्चपादिका –

(१) मिथ्याभवितुं युक्तमिति । मिथ्याशब्दो द्व्यर्थः, अपह्नववचनः, अनिर्वचनीयतावचनश्च । अत्रायम् अपह्नववचनः । ' मिथ्या-इति भवितुं युक्तम् ' अभाव एव अध्यासस्य युक्तः इत्यर्थः ॥ पं. पा. ६७-६४.

इति । तत्र व्याख्यागतमनिर्वचनीयवादं परस्तात् परिशीलयिष्यामः । अध्यास-मिथ्यात्वशङ्कां च अध्याससतत्त्वविमर्शावसरे ॥

## ' नैसर्गिको व्यवहारः ' इति कोऽर्थः ?

१५. अथ समाधानभाष्ये " अन्योन्यस्मिन् अन्योन्यात्मकताम्, अन्योन्यधर्मांश्च अध्यस्य....सत्यानृते मिथुनीकृत्य, 'अहमिदम्', 'ममेदम्' इति नैसर्गिकोऽयं लोकव्यवहारः " इति लिखितं दृश्यते । तत्र कोऽयं लोकव्यवहारः, किं वा तस्य नैसर्गिकत्वम् ? – इति विचिन्त्यम् । तत्राह टीकाकृत् –

(१) नैसर्गिकः, प्रत्यक्चैतन्यसत्तामात्रानुबन्धी अयम् युष्मदस्मदोरितरेतराध्यासात्मकः 'अहमिदम्', 'ममेदम्' इति लोकव्यवहारः। तेन यथा अस्मदर्थस्य सद्भावो नोपालम्भमर्हति, एवम् अध्यासस्यापि-इत्यभिप्रायः। 'लोकः' इति 'मनुष्योऽहम्' इत्यभिमन्यमानः प्राणिनिकाय उच्यते। व्यवहरणं व्यवहारः, लोक इति व्यवहारः, लोकव्यवहारः। 'मनुष्योऽहम्' इत्यभिमानः-इत्यर्थः॥ पं. पा. ८४-८५.

नायं ऋजुव्याख्यानपथः – इत्यस्मन्मतिः। भाष्याक्षराणां तत्रास्वरसात्, उदर्के टीकाकृतापि अन्यथानयनाच्च व्यवहारशब्दस्येति। कथम्? लोकव्यवहार इति तावत् सामान्यजनस्य अविचारितवस्तुतत्त्वस्य व्यवहरणं प्रत्ययव्यपदेशप्रवृत्तिरूपम् इति प्रथमतः स्फुरन्नर्थ उच्यते। 'एवं व्यवहरति लोकः', 'लोकव्यवहारात् सिद्धमिदम्'–इति च प्रयोगदर्शनात्। भाष्यकारः खल्वपि देवताधिकरणे शङ्काग्रन्थमेवमवतरति –

(1) न हि तावल्लोको नाम किञ्चित् स्वतन्त्रं प्रमाणमस्ति। प्रत्यक्षादिभ्य एव हि अविचारितविशेषेभ्यः प्रमाणेभ्यः प्रसिध्यन्नर्थो 'लोकात् प्रसिध्यति' इत्युच्यते॥ १-३-३२, पा. १३२.

(2) लोकप्रसिद्धिरपि न सति सम्भवे निरालम्बना अध्यवसातुं युक्ता॥ १-३-३३, पा. १३५.

इति च। इहापि वाक्यशेषे –

(3) अध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः॥ अध्यास. पा. ३.

(४) अतः समानः पश्वादिभिः पुरुषाणां प्रमाणप्रमेयव्यवहारः। पश्वादीनां च प्रसिद्धोऽविवेकपुरस्सरः प्रत्यक्षादिव्यवहारः॥ पा. ३.

इति च वक्ष्यते। तत्र 'प्रमाणप्रमेयव्यवहाराः' इति जनानां प्रत्ययव्यपदेशप्रवृत्तयः सर्वेऽपि विवक्षिताः प्रथमोदाहरणे, द्वितीयस्मिंस्तु प्रवृत्तिमात्रम् इति स्पष्टम्; न तु जातुचिद् भाष्यकारो लोकव्यवहारशब्दं 'मनुष्योऽहम् इत्यभिमानः' इत्यस्मिन् विशेषार्थे प्रयुङ्क्ते स्म॥

एवं 'नैसर्गिकः' इति प्रत्यक्चैतन्यसत्तामात्रानुबन्धी – इत्यस्मिन् विशेषार्थे न रूढः स्वरसो वा शब्दप्रयोगः। अध्यस्य व्यवहरति लोको निसर्गत एव अविचारदशायाम् – इति खलु ऋज्ववबोधं भवति वाक्यम्।

भाष्यव्यवहारशब्दप्रयोगस्थलानि तु मिथ्याज्ञानपदार्थविचारावसरे विशिष्य निर्देक्ष्यन्त इतीहैतावतैवोपरम्यते ॥

स्वोक्तिविभङ्गं खल्वपीदं व्याख्यानम् । यतः 'एवमयम् अनादिरनन्तो नैसर्गिकोऽध्यासः' इति भाष्यव्याख्यानावसरे स्वयं वक्ष्यति—

(२) ननु उपन्यासकाले 'नैसर्गिकोऽयं लोकव्यवहारः' इति लोकव्यवहारो नैसर्गिक उक्तः। कथमिह अध्यासो निगम्यते; 'अनादिः' इति चाधिकावापः? अत्रोच्यते – तत्रापि प्रत्यगात्मनि अहङ्काराध्यास एव नैसर्गिको लोकव्यवहारोऽभिप्रेतः। स च प्रत्यगात्मा अनादिसिद्धः, तस्मिन् नैसर्गिकस्य अनादित्वम् अर्थसिद्धम्। अतः प्रक्रमानुरूपमेव निगमनम्, न चाधिकावापः॥ पं. पा ४८५.

इति । तत्र निगमनभाष्यव्याख्यायां तावत् अध्याससामान्यमेव व्यवहारः—इत्युक्तम् । उपन्यासभाष्यव्याख्याने तु 'मनुष्योऽहम् इत्यभिमानः' इत्यध्यासविशेष एव लोकव्यवहारशब्देनाभिप्रेत इत्युक्तम् । इति पूर्वापरविसङ्गतिः ॥

किञ्चान्यत् "'अहमिदम्', 'ममेदम्' इति नैसर्गिकोऽयं लोकव्यवहारः" इति खलु भाष्याक्षरविन्यासः । तत्र 'अध्यस्य', 'सत्यानृते मिथुनीकृत्य', 'व्यवहारः' इत्युक्ते 'अध्यस्य', 'अध्यस्य', 'अध्यासः' इत्यनर्थकः स्यादभ्यास इति कृत्वा स्यात् टीकाकार आह –

(३) 'अध्यस्य', 'मिथुनीकृत्य' इति च क्त्वाप्रत्ययः न पूर्वकालत्वम् अन्यत्वं च लोकव्यवहारात् अङ्गीकृत्य प्रयुक्तः 'भुक्त्वा व्रजति' इति क्रियान्तरानुपादानात् 'अध्यस्य नैसर्गिकोऽयं लोकव्यवहारः' इति स्वरूपमात्रपर्यवसानात्, उपसंहारे च 'एवमयम् अनादिरनन्तो नैसर्गिकोऽध्यासः' इति तावन्मात्रोपसंहारात् । अतः 'चैतन्यं पुरुषस्य स्वरूपम्' इतिवत् व्यपदेशमात्रं द्रष्टव्यम् ॥ पं. पा. ८६–८७.

इति । नैवमपि भाष्याक्षरानुसरणम् आञ्जस्येन कृतं स्यादिति वयं मन्यामहे । न हि असत्यर्थातिशये भगवान् निष्कारणमेव त्रिवारं समानार्थकशब्दप्रयोगं करोतीति श्लिष्टं स्याद् वचः ॥

अतः अत्यन्तविविक्तयोरपि इतरेतराविवेकेन – विविच्य ज्ञानाभावात् 'अध्यस्य' नाम, सत्यानृते विरुद्धस्वभावावपि विषयविषयिलक्षणे मिथुनीकृत्य

योऽयं व्यवहारः 'अहमिदम्', 'ममेदम्' इत्येवंलक्षणः, सोऽयं मिथ्याज्ञान-निमित्तः—इति विवेकाभावनिबन्धनोऽयं मिथुनीकरणरूपोऽध्यासः, तत्पूर्वको व्यवहारश्च अविचारसिद्धो लोकस्य—इति भाष्यस्य यथाश्रुतस्यार्थ इति युक्तमुत्पश्यामः । एवं हि 'प्रत्यक्चैतन्यसत्तामात्रानुबन्धी' अयमध्यासः—इत्यनाञ्जसार्थकल्पनं च व्यावर्तितं भवेत्; अन्योन्याध्यासपूर्वको लोक-व्यवहारो दृश्यते इत्यतः शङ्कावाद्युपन्यस्ता युक्तिरकिञ्चित्करी, न हि भ्रान्त्या युक्त्यनुसारिण्यैव भाव्यमिति नियन्तुं शक्यते—इत्यर्थविशेषश्च लभ्येतेति ॥

## 'मिथ्याज्ञाननिमित्तो लोकव्यवहारः' इत्यस्य टीका

१६. अथ व्यवहारस्य मिथ्याज्ञाननिमित्तत्वं कथम्?—इत्येतद् विवेचनीयम् । पञ्चपादिका तु एवं व्याकरोति भाष्यवाक्यम्—

> (४) मिथ्याज्ञाननिमित्त इति । मिथ्या च तदज्ञानं च मिथ्याज्ञानम् । 'मिथ्या' इति अनिर्वचनीयता उच्यते । 'अज्ञानम्' इति च जडात्मिका अविद्याशक्तिः ज्ञानपर्युदासेनोच्यते । तन्निमित्तः तदुपादान इत्यर्थः ॥
>
> पं. पा. ८७-८८.

इति । अस्य व्याख्यानस्यापि व्याख्येयत्वाविशेषात् पुनरपि भङ्ग्यन्तरेण स्वाभिप्रायं विवृणोति—

> (२) कथं पुनर्नैमित्तिकव्यवहारस्य नैसर्गिकत्वम्? अत्रोच्यते—अवश्य-मेषा अविद्याशक्तिः, बाह्याध्यात्मिकेषु वस्तुषु तत्स्वरूपसत्तामात्रानुबन्धिनी अभ्युपगन्तव्या । अन्यथा मिथ्यार्थावभासानुपपत्तेः । सा च न जडेषु वस्तुषु तत्स्वरूपावभासं प्रतिबध्नाति; प्रमाणवैकल्यादेव तदग्रहणसिद्धेः, रजतप्रति-भासात् प्राक् ऊर्ध्वं च सत्यामपि तस्याम्, स्वरूपग्रहणदर्शनात् । अतः, तत्र रूपान्तरावभासहेतुरेव केवलम् । प्रत्यगात्मनि तु चितिस्वभावत्वात् स्वयं-प्रकाशमाने ब्रह्मस्वरूपानवभासस्य अनन्यनिमित्तत्वात् तद्गतसिद्धाविद्याशक्ति-प्रतिबन्धादेव तस्यानवभासः । अतः सा प्रत्यक्चिति ब्रह्मस्वरूपानवभासं प्रतिबध्नाति, अहङ्कारादतद्रूपप्रतिभासनिमित्तं च भवति; सुषुप्तादौ च अहङ्कारादिविक्षेपसंस्कारमात्रशेषं स्थित्वा पुनरुद्भवति—इत्यतो नैसर्गिकोऽ-प्यहङ्कारममकारात्मको मनुष्याद्यभिमानो लोकव्यवहारो मिथ्याज्ञाननिमित्त उच्यते, न पुनरागन्तुकत्वेन । तेन नैसर्गिकत्वं नैमित्तिकत्वेन न विरुध्यते ॥
>
> पं. पा. ९६-१११.

अत्र टीकाभिप्रायो विभज्य विमर्शनीयः (१) 'मिथ्याज्ञाननिमित्तः' इत्यस्य यथाकृतं व्याख्यानं किं भाष्यसम्मतम्? (२) मिथ्यावभासम् उपपादयितुं नैमित्तिकस्य नैसर्गिकत्वम् उपपादयितुं च प्रकल्पितम् अविद्याशक्तिसत्त्वं किं भाष्यानुगृहीतम्? (३) सुषुप्तौ तस्याः शक्तेः सत्त्वं किं श्रुतिभाष्यसज्ञानसमन्वितम्? – इति त्रेधा विकल्पः। तत्र 'मिथ्याज्ञाननिमित्तः' इत्यस्यार्थ एव तावन्निर्णीयते। तदेव ह्यत्र भाष्ये प्रकृतमिति ॥

## मिथ्याज्ञानशब्दो भाष्ये अध्यासार्थक एव

१७. तत्र मिथ्याज्ञानशब्दस्तावत् सम्यग्ज्ञानप्रतिद्वन्द्विभूतविपरीतप्रत्ययपरतयैव स्वीकृतो भाष्ये सर्वत्र, न तु कुत्रापि अनिर्वचनीयाविद्यावाची दृष्टः? – इत्यवगमयितुं भाष्यवाक्यानि समुदाहरिष्यामः ॥

तत्र सूत्रभाष्ये एव तावत 'मिथ्याभूतम् अज्ञानम्' इति विश्लिष्य प्रयोगो न क्वचिदपि दृश्यते। अनिर्वचनीयविशेषणयुक्तो वा अज्ञानशब्दः। मिथ्याज्ञानशब्दो भ्रान्तिमात्रपरः-इत्यत्र तु गमकमिदं यत् 'मिथ्याप्रत्ययः', 'मिथ्याबुद्धिः' – इत्येवमादिरूप एव तु भूरिशो दर्शनपथमायाति प्रयोगो यत्र मिथ्याशब्देन ज्ञानपर्यायशब्दाः समस्ताः। 'अनिर्वचनीयम् अज्ञानम्' इत्यादिरूपेण अनिर्वचनीयविशेषणसहितोऽज्ञानशब्दः तत्पर्यायो वा न सकृदपि भाष्ये दृष्टचर इत्यवधेयमेतत् ॥

(१) एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः ॥ पा. ४.

(२) तत्र पुरुषः, अन्यो वा-इति मिथ्याज्ञानम्। स्थाणुरेवेति तत्त्वज्ञानम् ॥ १-१-२, पा. ८.

(३) ननु वस्तुमात्रकथनेऽपि 'रज्जुरियम्, नायं सर्पः' इत्यादौ भ्रान्तिजनितभीतिनिवर्तनेन अर्थवत्त्वं दृष्टम्, तथा इहापि असंसार्यात्मवस्तुकथनेन संसारित्वभ्रान्तिनिवर्तनेन अर्थवत्त्वं स्यात् ॥ १-१-४, पा. १३.

[ मिथ्याज्ञानशब्दस्थाने 'भ्रान्तिः' इति पर्यायः प्रयुक्तः ॥ ]

(४) मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानात् भवति ॥ १-१-४, पा. १५

(५) अनवगतात्मवस्तूपदेशश्च तथैव भवितुमर्हति। तदवगत्या मिथ्याज्ञानस्य संसारिहेतोर्निवृत्तिः प्रयोजनं क्रियते ॥ १-१-४, पा. २०.

(६) न हि शरीराद्यात्माभिमानिनो दुःखभयादिमत्त्वं दृष्टमिति तस्यैव वेदप्रमाणजनितब्रह्मात्मावगमे तदभिमाननिवृत्तौ तदेव मिथ्याज्ञाननिमित्तं दुःखभयादिमत्त्वं भवतीति शक्यं कल्पयितुम् ॥ १-१-४, पा. २१.

(७) शरीरे पतिते अशरीरत्वं स्यात्, न जीवत इति चेत्, न। सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात्। न ह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वा अन्यतः सशरीरत्वं शक्यं कल्पयितुम्। ........। तस्मात्, मिथ्याप्रत्ययनिमित्तत्वात् सशरीरत्वस्य सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम् ॥
१-१-४, पा. २८.

[मिथ्याज्ञानशब्दो मिथ्याप्रत्ययवाचकत्वेन भाष्यकृतैव व्याख्यातः ॥]

(८) देहादिसङ्घातोपाधिसंबन्धाविवेककृता ईश्वरसंसारिभेदमिथ्याबुद्धिः ॥
१-१-५, पा. २८.

(९) मिथ्याज्ञाननिमित्तः शारीरस्योपभोगः, न तेन परमार्थरूपस्य ब्रह्मणः संस्पर्शः .... विशेषो हि भवति मिथ्याज्ञानसम्यग्ज्ञानयोः। मिथ्याज्ञानकल्पित उपभोगः, सम्यग्ज्ञानदृष्टम् एकत्वम्। न च मिथ्याज्ञानकल्पितेन उपभोगेन सम्यग्ज्ञानदृष्टं वस्तु संस्पृश्यते ॥ १-२-८, पा. ६९.

(१०) भेदस्तु उपाधिनिमित्तो मिथ्याज्ञानकल्पितः, न पारमार्थिकः ॥
१-४-१०, पा. १५७.

(११) यो हि ब्रह्मक्षत्रादिकं जगत् आत्मनोऽन्यत्र स्वातन्त्र्येण लब्धसद्भावं पश्यति, तं मिथ्यादर्शिनं तदेव मिथ्यादृष्टं ब्रह्मक्षत्रादिकं जगत् पराकरोति-इति भेददृष्टिमपोद्य 'इदं सर्वं यदयमात्मा' (बृ. २-४-६) इति सर्वस्य वस्तुजातस्य आत्माव्यतिरेकम् अवतारयति ॥ १-४-१९, १७०.

(१२) यथा हि सुषुप्तिसमाध्यादावपि सत्यां स्वाभाविक्याम् अविभागप्राप्तौ मिथ्याज्ञानस्य अनपोदितत्वात् पूर्ववत् पुनः प्रबोधे विभागो भवति, एवमिहापि भविष्यति ॥ २-१-९, पा. १९१.

(१३) यथा हि अविभागेऽपि परमात्मनि मिथ्याज्ञानप्रतिबद्धो विभागव्यवहारः स्वप्नवदव्याहतः स्थितो दृश्यते, एवम् अपीतावपि मिथ्याज्ञानप्रतिबद्धैव विभागशक्तिरनुमास्यते। एतेन मुक्तानां पुनरुत्पत्तिप्रसङ्गः प्रत्युक्तः। सम्यग्ज्ञानेन मिथ्याज्ञानस्य अपोदितत्वात् ॥ २-१-९, पा. १९१-१९२.

(१४) तस्करदृष्टान्तेन च अनृताभिसन्धस्य बन्धनम्, सत्याभिसन्धस्य च मोक्षं दर्शयन् एकत्वमेवैकं पारमार्थिकं दर्शयति; मिथ्याज्ञानविजृम्भितं च नानात्वम् ॥ २-१-१४, पा. १९८.

(१५) न चास्मिन् (अनेकात्मकब्रह्मवादे) दर्शने ज्ञानान्मोक्ष इत्युपपद्यते, सम्यग्ज्ञानापनोद्यस्य कस्यचिन्मिथ्याज्ञानस्य संसारकारणत्वेन अनभ्युपगमात् ॥
२-१-१४, पा. १९८.

(१६) अपि च यदा 'तत्त्वमसि' इत्येवञ्जातीयकेन अभेदनिर्देशेन अभेदः प्रतिबोधितो भवति, अपगतं भवति तदा जीवस्य संसारित्वं ब्रह्मणश्च स्रष्टृत्वम्; समस्तस्य मिथ्याज्ञानविजृम्भितस्य भेदव्यवहारस्य सम्यग्ज्ञानेन बाधितत्वात् ॥ २-१ २२ पा. २०९.

(१७) अपि च मिथ्याज्ञानपुरःसरोऽयम् आत्मनो बुद्ध्युपाधिसंबन्धः; न च मिथ्याज्ञानस्य सम्यग्ज्ञानादन्यत्र निवृत्तिरस्ति ॥ २-३-३०, पा. २८८.

(१८) अकर्त्रात्मबोधोऽपि हि मिथ्याज्ञानबाधनेन कर्माणि उच्छिनत्ति। बाधितमपि तु मिथ्याज्ञानं द्विचन्द्रज्ञानवत् संस्कारवशात् कञ्चित् कालम् अनुवर्तत एव ॥ ४-१-१५, पा. ४७५.

(१९) मिथ्याज्ञानावष्टम्भं हि कर्मान्तरं देहपाते उपभोगान्तरम् आरभते। तच्च मिथ्याज्ञानं सम्यग्ज्ञानेन दग्धम् इत्यतः साध्वेतत् आरब्धकार्यक्षये विदुषः कैवल्यम् अवश्यं भवतीति ॥ ४-१-१९, पा. ४७८

(२०) मिथ्याज्ञाननिमित्तश्च बन्धो न सम्यग्ज्ञानादृते विस्रंसितुमर्हति ॥ ४-२-८, पा. ४८३.

एवम् उपनिषद्भाष्येषु गीताभाष्ये च मिथ्याज्ञानशब्दो विपर्यास-विपरीतप्रतिपत्त्यादिपर्याय एव प्रयुक्तो दृश्यते। यथा चेदं तथा परिशिष्टे(१) वाक्योदाहरणेन प्रदर्शयिष्यते। एवं च मिथ्याज्ञानशब्दो भाष्ये मिथ्याभूतं ज्ञानमेव वक्ति, न तु मिथ्याभूतम् अज्ञानम् इति सिद्धम् ॥

## मिथ्याशब्दो न कुत्रापि भाष्ये अनिर्वचनीयपर्यायत्वेन प्रयुक्तः

१८. अपि च यथैव ज्ञानस्य सम्यक्त्वभ्रान्तत्वयोर्वाचकत्वेन सत्यमिथ्याशब्दप्रयोगो दृश्यते भाष्ये तथैव ज्ञेयस्य व्यभिचरद्रूपत्वम् अव्यभिचरद्रूपत्वं वा अभिधातुमपि तत्प्रयोगो दृश्यते। तत्र च मिथ्याशब्द-पर्यायत्वेन असत्यानृतशब्दावपि प्रयुज्येते, न त्वेव जातुचित् अनिर्वचनीय-शब्दः, यथा पञ्चपादिकाप्रस्थाने। तत्र कानिचिदुदाहरणार्थं वाक्यानि भाष्यादुद्धृत्य दर्शयामः –

(१) सत्यानृते मिथुनीकृत्य अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः ॥ अध्या. पा. १.

(२) यावद् हि न सत्यात्मैकत्वप्रतिपत्तिः, तावत् प्रमाणप्रमेयफललक्षणेषु विकारेषु अनृतत्वबुद्धिर्न कस्यचित् उत्पद्यते ॥ २-१-१४, पा. १९८.

(३) कथं तु अमृतेन वेदान्तवाक्येन सत्यस्य ब्रह्मात्मत्वस्य प्रतिपत्तिरुपपद्येत ॥ २-१-१४, पा. १९८.

(४) प्राक्च आत्मैकत्वावगतेरव्याहतः सर्वः सत्यानृतव्यवहारो लौकिको वैदिकश्च - इत्यवोचाम ॥ २-१-१४, पा. १९९, २००.

(५) न हि ईश्वरस्य संसार्यात्मत्वं प्रतिपाद्यत इत्यभ्युपगच्छामः । किं तर्हि संसारिणः संसारित्वापोहेन ईश्वरात्मत्वं प्रतिपिपादयिषितमिति । एवं च सत्या अद्वैतेश्वरस्य अपहतपाप्मत्वादिगुणता, विपरीतगुणता तु इतरस्य मिथ्या – इति व्यवतिष्ठते ॥ ४-१-३, पा. ४६४-४६५.

[यथोदाहृतेषु वाक्येषु 'अनृतम्'. 'असत्यम्' 'मिथ्या' – इति च पर्यायाः 'अनिर्वचनीयम्' इति तु नैवं मिथ्याशब्दपर्यायत्वेन प्रयुज्यते भाष्ये ॥ ]

## 'अहमिदम्', 'ममेदम्' इति नैसर्गिकोऽयं व्यवहारः–इत्यस्यार्थः

१९. अवगतमिदं यत्, मिथ्याज्ञानशब्दोऽत्र सम्यग्ज्ञानप्रतिद्वन्द्विभ्रान्तिपरतयैवोपात्तः सर्वत्र भाष्ये न तु सकृदपि टीकोपात्तम् अनिर्वचनीयम् अज्ञानम् अभिधत्ते, तत्र तत्र मिथ्याप्रत्ययादिपर्यायशब्दोपलम्भात्, अनिर्वचनीयस्याज्ञानस्य भाष्यकारसम्मतत्वे क्वचिदपि कस्यचिद् वचनस्य गमकस्य वा अनुपलम्भाच्च इति । अथेदानीं विचार्यमेतत् 'अहमिदम्', 'ममेदम्' इति लोकव्यवहारः – इत्यनया वचनव्यक्त्या किमभिप्रेतं स्याद् भाष्यकारेणेति । तत्राध्यासोपसंहारभाष्ये तावदस्तीदं वचनम् –

(१) अध्यासो नाम अतस्मिंस्तद्बुद्धिः – इत्यवोचाम । तद् यथा – पुत्रभार्यादिषु विकलेषु सकलेषु वा अहमेव विकलः सकलो वा इति बाह्यधर्मान् आत्मन्यध्यस्यति । तथा देहधर्मान् 'स्थूलोऽहम्', 'कृशोऽहम्', 'गौरोऽहम्', 'तिष्ठामि', 'गच्छामि', 'लङ्घयामि च' इति । तथा इन्द्रियधर्मान् 'मूकः', 'काणः', 'क्लीबः', 'बधिरः' 'अन्धोऽहम्' इति । तथा अन्तःकरणधर्मान् कामसङ्कल्पविचिकित्साऽध्यवसायादीन् । एवम् अहंप्रत्ययिनम् अशेषस्वप्रचारसाक्षिणि प्रत्यगात्मनि अध्यस्य, तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेण अन्तःकरणादिषु अध्यस्यति ॥ पा. ३-४.

इति । तत्र 'अन्योन्यस्मिन् अन्योन्यात्मकताम्' इत्यस्य 'अहमिदम्' इति स्यादन्वाख्यानम्, यस्य विवरणम् 'एवम् अहंप्रत्ययिनम्' इत्यादि । अन्योन्यधर्मांश्च' इत्यस्य च 'ममेदम्' इति शब्दान्तरेणान्वाख्यानम्, यद्विवरणं

'पुत्रभार्यादिषु' इत्यादि–इति श्लिष्यते। चिदात्मके साक्षिणि अहंप्रत्ययव्यध्यासः चिदहमात्मनोश्च अन्योन्यधर्माध्यासेन 'अहम्' इति प्रत्ययव्यपदेशौ। तथा हि सर्वथा विषयिणि साक्षिणि अहंप्रत्ययगोचरता, अहमो विकाराश्चाध्यस्ता भवन्ति इति, अहंप्रत्ययगोचरस्यैव च सर्वप्रत्यक्ता कूटस्थता चेत्यन्योन्य-धर्माध्यासश्च इति प्रकाशितं भवेत्। अध्यस्ताहंप्रत्ययगोचरे तु आत्मनि विषयिणि अन्तःकरणेन्द्रियादितादात्म्यम्, ताद्धर्म्यं च स्फुटतरमिति। एवं च 'मनुष्योऽहम्' इति व्यवहारस्य इत्थमध्यासप्रदर्शनेनैवोक्तप्रायत्वात्, 'नैसर्गि-कोऽयं लोकव्यवहारः' इत्यस्य एवं प्रत्ययव्यपदेशप्रवृत्तिरूपो व्यवहारो लोकस्य अविचारस्वभावेनैव समस्ति–इति ऋज्वर्थः स्यादिति॥

अयमेव तु स्याद् व्यवहारो गीताभाष्यकारेण विवक्षितो तत्रावतर-णिकायामेवं लिखता –

(२) तथा हि। अर्जुनेन राज्यगुरुपुत्रमित्रसुहृत्स्वजनसंबन्धिबान्धवेषु 'अहमेतेषाम्', 'ममैते' इत्येवं भ्रान्तिप्रत्ययनिमित्तस्नेहविच्छेदादिनिमित्तौ आत्मनः शोकमोहौ प्रदर्शितौ 'कथं भीष्ममहं सङ्ख्ये' इत्यादिना॥

गी भा अव. पा. ८.

इति॥

## व्यवहारवैविध्यम्

२०. 'लोकव्यवहारः' इति सङ्क्षिप्योक्त एव तु अध्यासापराभि-धानीयकमिथ्याज्ञानव्यवहारः, यथायथं शारीरकभाष्ये वितत्य प्रदर्श्यते इति गम्यते, परमार्थज्ञानेन सर्वव्यवहारसमाप्तिवचनात् तत्र तत्र। यथा चैतत् तथा व्यवहारशब्दघटितानि भाष्यवाक्यान्युदाहृत्य प्रदर्शयिष्यामः –

(१) तमेतम् अविद्याख्यम् आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः॥ पा. २.

(२) पश्वादीनां च प्रसिद्धोऽविवेकपुरःसरः प्रत्यक्षादिव्यवहारः॥ पा. ३.

(३) शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वा आत्मनः परलोकसंबन्धम् अधिक्रियते ....॥ पा. ३.

[ उदाहृतान्येवेमानि वाक्यानि पूर्वम् ]

(४) तत्र अविद्यावस्थायां ब्रह्मण उपास्योपासकादिलक्षणः सर्वो व्यवहारः॥ १-१-१२. पा. ३५.

(५) तथा च श्रुतिः 'यत्र वा अन्यदिव स्यात् तत्रान्योऽन्यत् पश्येत्' इत्यादिना स्वप्नदृष्टहस्त्यादिव्यवहारवत् अविद्याविषय एव कर्तृत्वादिव्यवहारं दर्शयति ॥ १-२-१२, पा. ७४.

(६) एको हि प्रत्यगात्मा भवति। न द्वौ प्रत्यगात्मनौ संभवतः। एकस्यैव तु भेदव्यवहार उपाधिकृतो यथा 'घटाकाशो महाकाश' इति। ततश्च ज्ञातृ-ज्ञेयादिभेदश्रुतयः प्रत्यक्षादीनि च प्रमाणानि, संसारानुभवः, विधिप्रतिषेधशास्त्रं च – इति सर्वमेतत् उपपद्यते। तथा च श्रुतिः 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' इत्यविद्याविषये सर्वं व्यवहारं दर्शयति; 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्' इति विद्याविषये सर्वं व्यवहारं वारयति ॥ १-२-२०, पा. ८१.

(७) परमात्मनि चायं दर्शनादिव्यवहाराभावोऽवगतः, 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्' (बृ. ४-५-१५) इत्यादि श्रुत्यन्तरात्। योऽप्यसौ सुषुप्तावस्थायां दर्शनादिव्यवहाराभाव उक्तः, सोऽपि आत्मन एवासङ्गत्वविवक्षया उक्तः ॥ १-३-९, पा. १०२.

(८) स्यादेतत् – स्वापे पुरुषान्तरव्यवहाराविच्छेदात् स्वयं च सुप्तप्रबुद्धस्य पूर्वप्रबोधव्यवहारानुसन्धानसंभवात् अविरुद्धम्। महाप्रलये तु सर्वव्यवहारोच्छेदात् जन्मान्तरव्यवहारवच्च – कल्पान्तरव्यवहारस्य – अनुसन्धातुमशक्यत्वाद् वैषम्यमिति ॥

नैष दोषः। सत्यपि सर्वव्यवहारोच्छेदिनि महाप्रलये परमेश्वरानुग्रहात् ईश्वराणां हिरण्यगर्भादीनां कल्पान्तरव्यवहारानुसन्धानोपपत्तेः। यद्यपि प्राकृताः प्राणिनो, न जन्मान्तरव्यवहारम् अनुसन्दधाना दृश्यन्ते (इति ?), तथापि न प्राकृतवदीश्वराणां भवितव्यम्। .... ततश्च अतीतकल्पानुष्ठितप्रकृष्टज्ञान-कर्मणाम् ईश्वराणां हिरण्यगर्भादीनां वर्तमानकल्पादौ प्रादुर्भवतां परमेश्वरानु-गृहीतानां सुप्तप्रतिबुद्धवत् कल्पान्तरव्यवहारानुसन्धानोपपत्तिः ॥

१-३-३०, पा. १२९.

(९) विषयेभ्यश्च मनसः परत्वम्, मनोमूलत्वाद् विषयेन्द्रियव्यव-हारस्य ॥ १-४-१, पा. १४६.

(१०) इह तु सूक्ष्मम् अव्यक्तशब्देन परिगृह्यते, सूक्ष्मस्य अव्यक्त-शब्दार्हत्वात्, तदधीनत्वाच्च बन्धमोक्षव्यवहारस्य जीवात् तस्य परत्वम्। .... ॥

१-४-३, पा. १४९.

(११) बाधिते च शारीरात्मत्वे तदाश्रयः समस्तः स्वाभाविको व्यवहारो बाधितो भवति ॥ २-१-१४, पा. १९७.

[ 'नैसर्गिको व्यवहारः' इत्यस्य स्थाने 'स्वाभाविको व्यवहार' इतीति स्पष्टम् ॥ ]

(१२) न चायं व्यवहाराभावोऽवस्थाविशेषनिबद्धोऽभिधीयत इति युक्तम् वक्तुम् ; 'तत्त्वमसि' इति ब्रह्मात्मभावस्य अनवस्थाविशेषनिबन्धनत्वात् ॥ २-१-१४, पा. १९८.

(१३) नैष दोषः । सर्वव्यवहाराणामेव प्राग् ब्रह्मात्मताविज्ञानात् सत्यत्वोपपत्तेः । स्वप्नव्यवहारस्येव प्राक् प्रबोधात् । यावद् हि न सत्यात्मैकत्वप्रतिपत्तिः, तावत् प्रमाणप्रमेयफललक्षणेषु विकारेषु अनृतत्वबुद्धिर्न कस्यचित् उत्पद्यते । विकारानेव तु 'अहम्', 'मम' इति अविद्यया आत्मात्मीयेन भावेन सर्वो जन्तुः प्रतिपद्यते स्वाभाविकीं ब्रह्मात्मतां हित्वा । तस्मात्, प्राग् ब्रह्मात्मताप्रतिबोधात् उपपन्नः सर्वो लौकिको वैदिकश्च व्यवहारः ॥

२-१-१४, पा. १९८.

(१४) व्यवहारावस्थायां तूक्तः श्रुतावपि ईश्वरादिव्यवहारः । ........ सूत्रकारोऽपि परमार्थाभिप्रायेण 'तदनन्यत्वम्' इत्याह ; व्यवहाराभिप्रायेण तु 'स्याल्लोकवत्' इति महासमुद्रस्थानीयतां ब्रह्मणः कथयति ॥

२-१-१४, पा. २०१, २०२.

(१५) तथा मूलकारणमेव आ अन्त्यात् कार्यात् तेन तेन कार्याकारेण नटवत् सर्वव्यवहारास्पदत्वं प्रतिपद्यते ॥ २-१-१८, पा. २०६, २०७.

(१६) अनादित्वेऽपि अन्धपरम्परान्यायेन अप्रतिष्ठैवानवस्था व्यवहारलोपिनी स्यात् ॥ २-२-३०, पा. २५१.

(१७) ब्रह्म तु अनपायि सुप्तिस्थानम् इत्येतत् प्रतिपादयामः । तेन तु विज्ञानेन प्रयोजनमस्ति, जीवस्य ब्रह्मात्मत्वावधारणं स्वप्नजागरितव्यवहारविमुक्तत्वावधारणं च । तस्मात्, आत्मैव सुप्तिस्थानम् ॥ ३-२-७, पा. ३५१.

(१८) सदेव तु उपाधिसंपर्कात् जीव इत्युपचर्यते इत्यसकृत् प्रपञ्चितम् । एवं सति यावदेकोपाधिगता बन्धानुवृत्तिः, तावत् एकजीवव्यवहारः, उपाध्यन्तरगतायां तु बन्धनवृत्तौ जीवान्तरव्यवहारः ॥ ३-२-९, पा. ३५३.

(१९) परस्मादनन्यत्वेऽपि जीवस्य सर्वव्यवहारलोपप्रसङ्गः, प्रत्यक्षादिप्रमाणाप्रवृत्तेः इति चेत्, न । प्राक् प्रबोधात् स्वप्नव्यवहारवत् तदुपपत्तेः । शास्त्रं च 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' इत्यादिना अप्रबुद्धविषये प्रत्यक्षादिव्यवहारमुक्त्वा पुनः प्रबुद्धविषये 'यत्र त्वस्य सर्वमात्मैवाभूत्तत् केन कं पश्येत्' (बृ. ४-५-१५) इत्यादिना तदभावं दर्शयति ॥

४-१-१४, पा. ५०१.

एवं सूत्रभाष्यस्थवाक्यानाम् अवलोकनेन तावदवगम्यते लोकव्यवहारशब्देन न केवलं 'मनुष्योऽहम्' इति विशेषव्यवहारः, अपि तु सर्वे लौकिका वैदिकाश्च व्यवहारा अध्यासकार्यत्वेन विवक्ष्यन्त इति । यथा तु

एवमेव सर्वेषूपनिषद्भाष्येषु गीताभाष्येऽपि चाध्यासकार्यमेव प्रत्ययव्यपदेशादि-लक्षणो व्यवहारशब्दार्थ इष्यते न त्वन्यार्थे, तथा परिशिष्टे (२) दर्शयिष्यत इत्यलमिह पल्लवितेन ॥

## गीताभाष्येऽपि मिथ्याज्ञानशब्दोऽध्यासपर्यायः

२१. एवं तावत् सूत्रभाष्ये 'मिथ्याज्ञाननिमित्तो लोकव्यवहारः' इत्यत्र मिथ्याज्ञानशब्दो विषयविषयिणोरन्योन्याध्यासं ब्रूते इति प्रसाधितम् । यथा चायं शब्दः सर्वेषु वेदान्तेषु गीताभाष्ये चैवमर्थ एव मिथ्याज्ञान-शब्दः, तथा परिशिष्टे दर्शयिष्यत इत्यवोचाम (पु. २२) । इदानीं तावत् परमप्रकृताध्यासभाष्यसंवादितया एकमेव गीताभाष्यवाक्यं समुद्धृत्यात्र दीयते, यथा अस्मद्व्याख्यानमेव भाष्यसंमतं न तु टीका इत्येतज्जिज्ञासुजन-हृदयमागच्छेत् –

(१) क्षेत्रक्षेत्रज्ञयोर्विषयविषयिणोः, भिन्नस्वभावयोः, इतरेतरतद्धर्माध्यास-लक्षणः संयोगः, क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबन्धनः, रज्जुशुक्तिकादीनां तद्विवेकज्ञानाभावादध्यारोपितसर्परजतादिसंयोगवत् । सोऽयम् अध्यासस्वरूपः क्षेत्रक्षेत्रज्ञसंयोगो मिथ्याज्ञानलक्षणः ॥ गी भा. १३-२६. पा. २१३.

अत्र 'क्षेत्रम्' इति अनात्मा, 'क्षेत्रज्ञः' इति जीवात्मा च समुद्दिष्टौ ; 'भिन्नस्वभावयोः' इति अध्यासभाष्यस्थस्य 'विरुद्धस्वभावयोः' इत्यस्य स्थाने प्रयुक्ता वचनव्यक्तिः ; 'क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबन्धनः' इति तु 'इतरेतराविवेकेन' इत्यस्य स्थाने ; 'अध्यासस्वरूपः', 'मिथ्याज्ञानलक्षणः' – इति च व्याख्यानव्याख्येयभावेन प्रयुक्ते वचनव्यक्ती – इति स्पष्टम् । अत्रापि पञ्चपादिकोक्तम् अनिर्वचनीयाज्ञानम् अध्यासोपादानत्वेन न परामृष्टम्, प्रत्युत विवेकाभावनिबन्धनमेव मिथ्याज्ञानम्[1] अध्यासापराभिधानमिति सुस्फुटमुद्घोषितमित्यवधेयमेतत् ॥

---

1. भामतीटीकायां तु "मिथ्याज्ञानम् अध्यासः, तन्निमित्तः । तद्भावाभावानु-विधानाद् व्यवहारभावाभावयोः – इत्यर्थः ।" इति ऋज्वर्थ एव स्वीकृतः । तदेवम् अध्यासस्वरूपं फलं च व्यवहारम् उक्त्वा तस्य निमित्तमाह–इतरेतराविवेकेन । विवेकाग्रहेण इत्यर्थः ॥ वा. भा पा. १६.

लोकव्यवहारः–लोकानां व्यवहारः, स चायमहम् इति व्यपदेशः, इतिशब्दसूचितश्च शरीराद्यनुकूलं प्रतिकूलं च प्रमेयजातं प्रमाणेन प्रमाय, तदुपादानपरिवर्जनादिः॥ वा.भा.पा.१५.

## मिथ्यार्थावभासः

२२. अथ मिथ्यार्थावभासोपपत्त्यर्थम् 'अविद्याशक्तिरङ्गीकरणीया' इति टीकामधिकृत्य चिन्ता करणीया। तदर्थं तावत् 'कोऽयमध्यासो नाम?' इत्यादिभाष्यस्याभिप्रायो निर्णेयः। अत्र **टीका** –

(१) 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इति प्रश्नवाक्यस्थितम् अध्यासम् उद्दिश्य लक्षणम् अभिधीयते। तत्र 'परत्र' इत्युक्ते अर्थात् परस्य अवभासमानता सिद्धा। तस्य विशेषणं 'स्मृतिरूपत्वम्'। स्मर्यत इति स्मृतिः। असंज्ञायामपि अकर्तरि कारके घञादीनां प्रयोगदर्शनात्। स्मर्यमाणरूपमिव रूपम् अस्य; न पुनः स्मर्यत एव; स्पष्टं पुरोऽवस्थितत्वावभासनात्। 'पूर्वदृष्टावभासः' इत्युपपत्तिः स्मृतिरूपत्वे। न हि पूर्वम् अदृष्टरजतस्य शुक्तिसंप्रयोगे रजतम् अवभासते। यतोऽर्थात् तद्विषयस्य अवभासस्यापि इदमेव लक्षणम् उक्तं भवति। कथम्? तदुच्यते – स्मृते रूपमिव रूपम् अस्य; न पुनः स्मृतिरेव। पूर्वप्रमाणविषयविशेषस्य तथा अनवभासकत्वात्। कथं पुनः स्मृतिरूपत्वम्? पूर्वप्रमाणद्वारसमुत्थत्वात्। न हि असंप्रयुक्तावभासिनः पूर्वप्रवृत्ततद्विषयप्रमाणद्वारसमुत्थत्वमन्तरेण समुद्भवः सम्भवति॥

पं. पा. १५७-१६३.

अत्रेदमवधेयम् – 'विषयिणि विषयस्य तद्धर्माणां च अध्यासः, तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषये अध्यासो मिथ्या' इत्याशङ्क्य "तथापीतरेतराविवेकेन अन्योन्यात्मकताम् अन्योन्यधर्मांश्च अध्यस्य 'अहमिदम्', 'ममेदम्' इति नैसर्गिकोऽयं लोकव्यवहारः" इति न दूषितम्। ततोऽयमुत्थितः प्रश्नः 'कोऽयमध्यासो नाम?' इति। तदेवं स्थिते 'अध्यस्य' इति ल्यबन्तबलात् अध्यसनम् अध्यासः – इत्येव भावे व्युत्पत्तिर्ग्रहीतुं युक्ता। न पुनः 'अध्यस्यत इत्यध्यासः' इति कर्मसाधनत्वेन। एवं च 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इतीदमुत्तरम् अध्यसनरूपाध्यासस्यैव लक्षणं समर्पयितुं प्रवृत्तम् इत्येव युज्यते, न पुनरध्यस्तपदार्थलक्षणं समर्पयितुमिति। अथ चायं टीकाकारः व्याकरणस्मृतिं प्रमाणयन् भावार्थतां व्याकरणाविरुद्धामप्यनादृत्यैव किमिति स्मृतिशब्दं 'स्मर्यत इति स्मृतिः' इति प्राधान्यतः

कर्मसाधनत्वेनैव स्वीचकारेति चिन्त्यमेतत्[1]; न ह्यत्र 'शुक्तिरजतादिमिथ्यार्थानां कथमवभासः शुक्त्यादौ ?' इति प्रश्न उपन्यस्तः शङ्कावादिना, किं तर्हि, 'किं नाम अध्यसनम्, किं परत्र परस्य निक्षेपः, किं वा मिथ्यैव तथा प्रत्ययः' इत्येतदेव तेन बुभुत्सितमिति ॥

## अख्यातिवादादीनां विमर्शः

२३. 'तं केचिदन्यत्र अन्यधर्माध्यास इति वदन्ति' इत्यादिना भाष्ये अध्यासलक्षणविषये मतान्तरोपन्यासः कृतः; परं तु तत्र मतान्तरम् अविमृश्यैव पर्यवसाने उपसंहृतम् 'सर्वथापि तु अन्यस्य अन्यधर्मावभासतां न व्यभिचरति' इति । तत्र च सर्वतन्त्रसिद्धान्तत्वेनोपदर्शिते स्वमते निदर्शितम् "तथा च लोके अनुभवः 'शुक्तिका हि रजतवदवभासते' 'एकश्चन्द्रः सद्वितीयवत्' इति" इति । अत्रापि शुक्तिकाविषयं रजतत्वप्रकारकं ज्ञानम्, एकचन्द्रविषयकं च द्विचन्द्रविषयकमिव – इति ज्ञानमेवोदाहृतम् इति स्पष्टम् । अथ च टीकायाम् रजतलक्षणार्थगतैव चिन्ता प्रतानिता –

> (१) कारणदोषः कार्यविशेषे तस्य (इन्द्रियस्य) शक्तिं निरुन्धन्नेव संस्कारविशेषमपि उद्बोधयति; कार्यगम्यत्वात् कारणदोषशक्तेः । अतः संस्कार-दुष्टकारणसंवलिता एका सामग्री । सा च एकमेव ज्ञानम् एकफलं जनयति । तस्य च दोषोत्थापितसंस्कारविशेषसहितसामग्रीसमुत्पन्नज्ञानस्य उचितमेव 'शुक्तिगतमिथ्यारजतम्' आलम्बनम् अवभासते । तेन मिथ्यालम्बनं ज्ञानं मिथ्याज्ञानम् । न स्वतो ज्ञानस्य मिथ्यात्वमस्ति; बाधाभावात् ॥
>
> पं. पा. १९५–२००.

---

1. भामत्यां तु – "अवसन्नोऽवमतो वा भासोऽवभासः । प्रत्ययान्तरबाधश्च अस्यावसादः, अवमानो वा । एतावता 'मिथ्याज्ञानम्' इत्युक्तं भवति (पा. १८)। 'स्मृतेः रूपमिव रूपमस्य इति स्मृतिरूपः । असंनिहितविषयत्वं च स्मृतिरूपत्वम् संनिहितविषयं च प्रत्यभिज्ञानं समीचीनमिति नातिव्याप्तिः' (पा. १९–२०) इति ज्ञानपरत्वमेव यद्यप्युपात्तम्, तथापि "तस्येदम् उपव्याख्यानम् 'पूर्वदृष्टः' इत्यादि । पूर्वदृष्टस्य अवभासः, पूर्वदृष्टावभासः । मिथ्याप्रत्ययश्च आरोपविषयारोपणीयस्य मिथुनमन्तरेण न भवतीति पूर्वदृष्टग्रहणेन अनृतम् आरोपणीयम् उपस्थापयति । तस्य च दृष्टत्वमात्रमुपयुज्यते न वस्तुसत्ता इति दृष्टग्रहणम् । तथापि वर्तमानं दृष्टं दर्शनम् नारोपोपयोगीति पूर्वेत्युक्तम् । तत्र पूर्वदृष्टं स्वरूपेण सदपि आरोपणीयतया अनिर्वाच्यम् इत्यनृतम्" (पा. १८) इत्यादिना अर्थस्याप्यनिर्वचनीयता समानीता ॥ बा. भा. पा. १८, १९. २०.

(२) लैङ्गिकज्ञानप्रत्यभिज्ञाचित्रज्ञानानाम् अदुष्टकारणारब्धत्वात् यथार्थमेव अवभासः । इह तु कारणदोषादतथाभूतार्थावभासः — इति विशेषः । एवं च सति नानुभवविरोधः, प्रतिभासमानस्य रजतस्यैवालम्बनत्वात् ॥

पं. पा. २०३-२०५.

(३) तदिह निद्रादिदोषोपप्लुतं मनः, अदृष्टादिसमुद्बोधितसंस्कारविशेषं सहकार्यनुरूपं मिथ्यार्थविषयं ज्ञानमुत्पादयति, तस्य च तदवच्छिन्नापरोक्षचैतन्यस्था अविद्याशक्तिः आलम्बनतया विवर्तते ॥ पं. पा २१८.

(४) नापि अध्यस्तमपि असदेव ; तथात्वे प्रतिभासायोगात् । ननु सर्वमेवेदम् असत् — इति भवतो मतम् । क एवमाह ? अनिर्वचनीयानाद्यविद्यात्मकम् इत्युद्घोषितमस्माभिः[1] ॥ पं. पा. २४४-२४५.

इति । एवं मिथ्याज्ञानस्य अध्यासलक्षणत्वं प्रदर्शयितुं भाष्ये लोकानुभवनिदर्शनम् इति स्थिते यन्निगमनं टीकायाम् —

(५) अतो मायामयं रजतम् । अथ पुनः पारमार्थिकं स्यात्, सर्वैरेव गृह्येत, .... मायामात्रत्वे तु मन्त्राद्युपहतचक्षुष इव दोषोपहतज्ञानकरणा एव पश्यन्ति इति युक्तम् । किं च 'नेदं रजतम्' इति बाधोऽपि मायामयत्वमेव सूचयति । कथम् ? तेन हि तस्य निरुपाख्यतापादनपूर्वक मिथ्यात्वं ज्ञाप्यते 'नेदं रजतम् मिथ्यैव अभासिष्ट' इति । न च तत् केनचिद् रूपेण रूपवत्त्वे अवकल्पते ; संप्रयुक्तशुक्तिवत्, निरस्यमानविषयज्ञानवच्च[2] ॥

पं. पा. २०५, २१३

इति । तत् अप्रकृतानुचितविषये कारणादिगवेषणायासमात्रम् इति स्पष्टम् ॥

---

1. भामत्यां तु "तस्मात्, न सत् नाप्यसत्, नापि सदसत्, परस्परविरोधात् — इति अनिर्वाच्यमेवारोपणीयं मरीचिषु तोयम् आस्थेयम् । तदनेन क्रमेण अध्यस्तं तोयं परमार्थतोयमिव, अत एव पूर्वदृष्टमिव । तत्त्वतस्तु न तोयम्, न च पूर्वदृष्टम्, किं तु अनृतमनिर्वाच्यम् ( वा. भा. २३, २४ )" इत्यारोपितस्यानिर्वाच्यत्वमेवोपपादितम् । तस्यानिर्वचनीयाविद्यात्मकत्वं तु इह स्पष्टतया नोक्तमिति विशेषः । पूर्वदृष्टत्वविशेषणविवरणेऽप्यस्ति किञ्चित् पञ्चपादिकातो वैलक्षण्यम् ॥

2. विवरणे तु — "ननु सम्प्रतिपन्नोऽर्थाभावः । न । यथाप्रतिभासमेव मिथ्यारजतस्य उत्तरज्ञानेन निरसनयोग्यस्य उपगमात्, लौकिकपरमार्थदृष्टरजतप्रतियोगिकाभावविषयत्वाद् रजते त्रैकाल्याभावज्ञानस्य इति संविद्द्वयानुरोधेन व्यवस्थासिद्धेरन्यतरसंविदपह्नवायोगात् । तथा च — उभयसंविद्विषयानुभवो 'नास्त्यत्र रजतम्', 'मिथ्यैव रजतम् अभात्" (पं. वि. १६०-१६१) इति लिखितमस्ति । तत्र दृष्टान्ते 'मिथ्यैव अभात्' इति ज्ञानमेव असमीचीनतया अपह्नूयते, न तु 'मिथ्यारजतमेवाभात्' इति मिथ्यारजतमवधार्यते इति स्पष्टम् ॥

अपि चात्र किं पञ्चपादिकाकारो मिथ्यारजतस्योत्पत्तिमेव साक्षादभ्युपगच्छति, आहोस्वित् तदाभासमात्रम् – इति सूक्ष्मेक्षिकया परिशीलयितव्यमिति भाति । यतोऽयमाह –

(अ) 'नेदं रजतम्' इति बाधेन 'मिथ्यैव अभासिष्ट' इति रजतस्य निरुपाख्यतापादनपूर्वकं मिथ्यात्वं ज्ञाप्यते । न तत् केनचिद्रूपेण रूपवत्त्वे अवकल्पते'

इत्येकत्र (अधस्तादुदाहृते पञ्चमे वाक्ये) ॥

(आ) दोषोत्थापितमिथ्याज्ञानस्य शुक्तिगतं मिथ्यारजतमालम्बनम् – इत्यन्यत्र (अधस्तादुदाहृते प्रथमवाक्ये) ॥

(इ) स्वप्ने चैतन्यस्था अविद्याशक्तिः मिथ्याज्ञानस्यालम्बनतया विवर्तते– इत्यपरत्र (तृतीयोदाहरणे) ॥

[ व्याख्यातं चेदं विवरणकृता –

"निद्रादिदोषसंस्कारोपप्लुतेनान्तःकरणेन मिथ्याध्यासनिमित्तकारणेनावच्छिन्नचैतन्यस्था अविद्याशक्तिः पुष्कलनिमित्तकारणसंसर्गात् अध्यासं प्रति पुष्कलकारणतामापद्यमाना मिथ्यार्थालम्बनाकारेण विवर्तत इति चैतन्यमेव स्वाविद्यया विवर्तते । अतः सत्यस्य वस्तुनो मिथ्यावस्तुसंभेदावभासलक्षणः परत्र परावभासो विद्यत इति भावः । तथा जागरणेऽपि बाह्याधिष्ठानांशसंसृष्टान्तःकरणावच्छिन्नतया बाह्याधिष्ठानांशसंसृष्टचैतन्यस्थाविद्याशक्तिः, बाह्याधिष्ठानसंसृष्टरजताद्याकारेण विवर्तत इति शुक्तिकाद्यवच्छिन्नं चैतन्यं रजताद्यालम्बनमिति बाह्यालम्बनं रजतादि कथ्यते ॥ " (पं॰ वि॰ २१८–२१९) इति ॥ ]

अन्यत्र पुनः –

(ई) शुक्तिकाग्रहणम् उपरितनसम्यग्ज्ञानसिद्धं परमार्थतः शुक्तिकात्वमपेक्ष्य, वतिग्रहणं तु संप्रयुक्तस्य अरजतस्वरूपस्य मिथ्यारजतसंभेद इवावभासनमङ्गीकृत्य । मिथ्यात्वमपि रजतस्य आगन्तुकदोषनिमित्तत्वात्, अनन्तरबाधदर्शनाच्च कथ्यते, न पुनः परमार्थामिमताद् रजतादन्यत्वमाश्रित्य । तत्रासंप्रयुक्तत्वाद् रजतस्य नेदन्तावभासस्तद्गतः, किं तु संप्रयुक्तगत एव । अपरोक्षावभासस्तु संस्कारजन्मनोऽपि रजतोल्लेखस्य दोषबलात् इन्द्रियजज्ञानान्तर्भावाच्च इति द्रष्टव्यम् ॥ पं॰ पा॰ २५३, २५४.

तदेवं 'मिथ्यारजतं मिथ्याज्ञानस्यालम्बनम्', 'मिथ्यालम्बनं मिथ्याज्ञानम्' इत्येवञ्जातीयकवचनव्यक्त्याश्रयदर्शनात्, मिथ्यारजतस्य

उत्पत्तिमेवावलम्बते टीकाकार इति भाति' । 'मिथ्यात्वमपि रजतस्य आगन्तुकदोषनिमित्तत्वात्, अनन्तरबाधदर्शनाच्च न पुनः परमार्थरजतादन्यत्वमाश्रित्य' इति वदन् केवलमाभासमात्रं रजतं न तूत्पन्नम् इत्यभिप्रैतीत्यपि भाति । अतः सूक्ष्मेक्षिकया परिशीलयितव्यमेवेदं तदभिप्रायविशेषनिर्धारणार्थमिति सिद्धम् ॥

## अध्यासोत्पत्तिचिन्ता

२४. तत्र 'शुक्तिका हि रजतवदवभासते' इत्यादिनिदर्शनेन परमार्थसतो वस्तुनो भ्रान्त्यैव वस्त्वन्तरत्वेनाकलनम् अध्यास इत्येषोऽर्थो भाष्ये हृदयंगमितः । स्पष्टमेवोक्तं चान्यत्र भाष्यकारेण –

> (१) '**शुक्तिकां रजतमिति प्रत्येतीत्यत्र शुक्तिवचन एव शुक्तिकाशब्दः ; रजतशब्दस्तु रजतप्रतीतिलक्षणार्थः ; प्रत्येत्येव हि केवलं रजतमिति न तु तत्र रजतमस्ति ॥' ४-१-५, पा. ४६७.**

इति । प्रयोजनं चाध्यासस्य ज्ञानरूपत्वस्वीकारे – एकस्मिन्नेव ब्रह्मणि स्वरूपेणावस्थिते जीवत्वकल्पनं चेतनाचेतनविभक्तजगद्रूपेणाकलनं च मिथ्याज्ञानत्वात् ब्रह्मात्मैकत्वज्ञानमात्राद् विनश्येतेति ॥

---

**विवरणे तु –**

'अविद्यैव बाह्यदोषनिमित्तकारणापेक्षया रजताकारेण साक्षिचैतन्यस्य रजतावच्छेदज्ञानाभासाकारेण च परिणममाना स्वकार्येण सह साक्षिचैतन्यस्य विषयभावं प्रतिपद्यत इति ते मतम् ॥' (पं. वि. १९७–१९८) इति पञ्चपादिकामतं व्याख्यातम् । तदेतत् इष्टसिद्धिमनुसृत्येति भाति ; यत्कारणम् **इष्टसिद्धौ लिखितमस्ति –**

कादाचित्कत्वाच्च तयोः (शुक्तिरूप्यज्ञानयोः) कारणं मृग्यम् । न च निमित्तकारणमात्रात् कार्यसिद्धिः । अत उपादानं च मृग्यम् । न च असत्यस्य साक्षात् सत्यमुपादानं दृष्टम्, सत्योपादानत्वे च घटादिवत् सत्यत्वं मानगम्यत्वं च स्यात् । तच्च नेष्टम् । अतः तदनुरूपम् अनिर्वचनीयमेव उपादानम् एष्टव्यम् । तच्च नान्यदज्ञानात् अनादि समस्ति । न च सादेरुपादानता । अनन्वयात् अनवस्थानाच्च ॥ " इ. सि. १–९, पा. ४८.

इति । अत्र भ्रान्तितत्संस्कारादिकारणं भवेदिति मण्डनादिमतनिराकरणार्थम् अनादित्वमुक्तम् ॥

अथ चायं **टीकाकारः** "स्मृतिरूपः परत्र पूर्वदृष्टावभासः" इति भ्रान्तिज्ञानपरत्वेनावस्थितमपि अध्यासलक्षणं प्राधान्यतोऽध्यस्तपरत्वेनैव वर्णयति। "सर्वथापि तु अन्यस्यान्यधर्मावभासतां न व्यभिचरति" इति भाष्योक्तं "पूर्वदृष्टत्वस्मृतिरूपत्वयोः सर्वत्राव्यभिचारान्न विवाद इत्यभिप्रायः" (पं. पा. २३९) इति पूर्वदृष्टार्थपरत्वेनैव नयति। प्रकृतं मिथ्याज्ञानस्य सम्यग्ज्ञानबाध्यत्वविचारं प्रविहाय 'कारणदोषादौ असति कथं मिथ्यावस्त्ववभासः, तदनुपपत्तौ च कथमध्यासः?' इत्यध्यासोत्पत्तिसामग्रीविचारमेवाप्रकृतम् अभ्यर्हितत्वेन समादत्ते। तथा हि –

(१) ननु बहिरर्थे कारणदोषः, अर्थगतः सादृश्यादिः, इन्द्रियगतश्च तिमिरादिः – उपलभ्यते; तन्निमित्तश्च अर्थस्य सांशत्वात् अंशान्तराग्रहेऽपि अंशान्तरप्रतिबन्धो युज्येत[1]; न त्विह कारणान्तरायत्ता सिद्धिः, येन तद्दोषादनवभासोऽपि स्यात्, निरंशस्य चैतन्यस्य स्वयञ्ज्योतिषस्तदयोगात्॥

पं पा. २५६.

इति। जीवस्य ब्रह्मणः सकाशाद् व्यतिरिक्तत्वे ब्रह्मस्वरूपाग्रहणात् अनवभासविपर्यासौ स्याताम्, ब्रह्मानन्यत्वे तु विद्यात्मके ब्रह्मणि सुतरां तस्मिन् अविद्याया असम्भवः इति विकल्प्य आह –

(२) उच्यते – विद्यत एवात्रापि अग्रहणाविद्यात्मको दोषः, प्रकाशस्य आच्छादकः। कथं गम्यते? श्रुतेः, तदर्थापत्तेश्च। श्रुतिस्तावत् 'अनृतेन हि प्रत्यूढाः', 'अनीशया शोचति मुह्यमानः' इत्येवमाद्या। तदर्थापत्तिरपि–विद्यैव सर्वत्र श्रुतिषु ब्रह्मविषया मोक्षाय निर्दिश्यते; तेन अर्थादिदमवगम्यते जीवस्य ब्रह्मस्वरूपतामवगमोऽविद्यात्मको बन्धो निसर्गत एवास्तीति। ननु न जीवो ब्रह्मणोऽन्य इत्युक्तम्। बाढम्, अत एवार्थात् जीवे ब्रह्मस्वरूपप्रकाशाच्छादिका अविद्या कल्प्यते। अन्यथा परमार्थतः तत्स्वरूपत्वे तदवबोधोऽपि यदि नित्यसिद्धः स्यात्, तदा तादात्म्योपदेशो व्यर्थः स्यात्। अतोऽनादिसिद्धाविद्यावच्छिन्नानन्तजीवनिर्भासास्पदमेकरसं ब्रह्म – इति श्रुतिस्मृतिन्यायकोविदै-

---

1. एवम् 'अधिष्ठानगतदोषः, द्रष्टृदोषः, प्रमाकरणदोषश्च' इति कारणत्रितयजन्यत्वमध्यासस्य विवरणेऽप्युक्तम् (पं. वि. २५६)। तत्रापि कारणदोषोऽनुमतः – 'तत्राद्वितीयाधिष्ठानब्रह्मात्मनि प्रमाणस्य चैतन्यस्य, अविद्याकारणदोषसंसर्गं प्रथमं दर्शयति' (पं. वि. २६३) इति। तत्र 'सुतरामविद्यायास्तत्रासंभवः' (पं. पा. २६२), 'अत एवार्थाज्जीवे ब्रह्मस्वरूपप्रकाशाच्छादिका अविद्या कल्प्यते' (पं. पा. २६८) इति च टीकामतम् अनादृतमेवेति स्फुटम्॥

रभ्युपगन्तव्यम् । तथा च स्मृतिः 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि' इति क्षेत्रक्षेत्रज्ञत्वनिमित्ताम् अनादिसिद्धाम् अविद्यां प्रकृतिशब्देनाऽऽह ; 'मायां तु प्रकृतिं विद्यात्' इति श्रुतेः । अतो मायावच्छिन्नरूपत्वात्, अनन्यदपि ब्रह्मरूपम् आत्मनो न वेत्ति । तथा चोक्तम् – 'अनादिमायया सुप्तो यदा जीवः प्रबुध्यते । अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा' ॥ पं. पा. २६२-२७४ इति ॥

अत्र बहु वक्तव्यमस्ति । (१) दृष्टान्तत्वेनोपात्ते शुक्तिरजतद्विचन्द्रादौ मिथ्यावभासे अर्थगतं करणगतं च दोषं निमित्तीकृत्यैव अर्थैकदेशप्रतिभासप्रतिबन्धो जायते इत्यतः प्रकृतेऽपि ब्रह्मस्वभावाप्रतिभासे तथैव भाव्यम् – इति शङ्का प्रथमा ; (२) जीवस्य ब्रह्मानन्यत्वे ब्रह्मण्येवाविद्येति प्राप्नोति, तच्चानुपपन्नम्, विद्यात्मकत्वात् ब्रह्मणः – इति शङ्का द्वितीया ; (३) जीवस्य परमार्थतो ब्रह्मस्वरूपत्वे तदवबोधोऽपि यदि नित्यसिद्धः स्यात्, तदा तादात्म्योपदेशो व्यर्थः स्यात् इति तृतीया – इति शङ्कात्रयसमाधानाय, विद्यत एवात्रापि अग्रहणाविद्यात्मको दोषः प्रकाशस्याच्छादकः – इति टीकोक्तिः श्रुतिभाष्योपदेशविसंवादिनीति भाति । तथा प्रकृतिशब्देन गीतासु अनादिसिद्धा अविद्या परामृश्यत इत्युक्तिरपि न गीतार्थं गीताभाष्यार्थं वा यथावदनुवदतीति भाति । एवम्, मायावच्छिन्नरूपत्वात् अनन्यदपि ब्रह्मस्वरूपं न वेत्ति जीवः – इत्यत्र समुदाहृता 'अनादिमायया' इति कारिका न स्थाने इत्यस्मन्मतिः । शुक्तिकारजताद्यध्यासवदेव सर्वत्राप्यत्राध्याससामान्यं कारणदोषं नियमेन काङ्क्षत इति लिखता टीकाकारेण स्वाभ्युपगताविद्याशक्तिम् अर्थापत्तिप्रमाणेन प्रसाधयितुं यत्नः क्रियत इति स्पष्टमेव । न चात्र श्रुतिं भाष्यं युक्त्यनुभवौ वा पश्यामो वयम् । अतः 'अविद्याशक्तिरभ्युपगन्तव्या', 'ब्रह्मस्वरूपप्रकाशाच्छादिका कल्प्यते' इति चोक्तिर्निर्युक्तिकैवेति मन्महे[1] ॥

---

1. अत्र यदुच्यते विवरणे अध्यासस्य कारणापेक्षास्ति, सर्वं च कार्यं सोपादानकम्, भावकार्यत्वात्, घटादिवत् – इत्यनुमानात् (पं. वि. ९०-९१) इति मिथ्यार्थतज्ज्ञानात्मकं मिथ्याभूतमध्यासमुपादानकारणसापेक्षम् (पं. वि. ९२-९३) इत्यादि । तत्रेदं वक्तव्यम्– अतस्मिंस्तद्बुद्धिरेव मिथ्याज्ञानम् अध्यासाख्यम् इति स्थिते तत्र कार्यत्वादिकमारोप्य कारणादिगवेषणा वृथाऽऽयासमात्रम् । विकल्पमात्रं हि शुक्तिरजतरज्जुसर्पादिकं न तत्र कारणादि संभवति । यथोक्तमभियुक्तैः – 'अनिश्चिता यथा रज्जुरन्धकारे विकल्पिता । सर्पधारादिभिर्भावैस्तद्वदात्मा विकल्पितः' (गौ. का. २-१-७) इति ॥

## अविद्यायां प्रमाणोपन्यासः किं समञ्जसः ?

२५. 'अविद्याशक्तिः बाह्याध्यात्मिकेषु वस्तुषु तत्स्वरूपसत्तामात्रानुबन्धिनी अभ्युपगन्तव्या' (पं. पा. ९६-१०२) इत्युक्तिः, यथोक्ताविद्यासद्भावे दृष्टार्थापत्तिं प्रमाणत्वेनानयति, 'अन्यथा मिथ्यार्थावभासानुपपत्तेः' इति हेतूपन्यासात् । अत्र मिथ्यार्थावभासाः किं नियमेनापेक्ष्य किञ्चित् कारणम् उत्पद्यन्ते, आहोस्वित् कारणापेक्षामन्तरेणैव तथा स्वात्मानमाविर्भावयन्ति – इत्येतदेव प्रथमं चिन्तनीयम् । वयं तु पश्यामो मिथ्यार्थावभासा न हेतुमपेक्षन्त इति । कुतः ? मिथ्यात्वादेव । न हि मिथ्या च तस्य जातिगमागमप्रवेशनिर्गमादिकं विद्यते च इति न विप्रतिषिद्धं भवेदिति । अत्रैतेऽभियुक्तश्लोका भवन्ति –

(१) अलाते स्पन्दमाने वै नाभासा अन्यतोभुवः ।
न ततोऽन्यत्र निस्पन्दान्नालातं प्रविशन्ति ते ॥
न निर्गता अलातात्ते द्रव्यत्वाभावयोगतः ।
विज्ञानेऽपि तथैव स्युराभासस्याविशेषतः ॥ गौ. का. ४-४९, ५०.

[ आभासानामसत्त्वादेव गमनागमनोत्पत्तिविनाशादिकं न मृग्यमित्यर्थः ॥ ]

भाष्यकारोऽप्याह –

(२) तस्य तु (अप्रसिद्धवस्तुभेदस्य) अन्यत्रान्यशब्दप्रत्ययौ भ्रान्तिनिमित्तावेव भवतो न गौणौ । यथा मन्दान्धकारे 'स्थाणुरयम्' इत्यगृह्यमाणविशेषे पुरुषशब्दप्रत्ययौ स्थाणुविषयौ, यथा वा शुक्तिकायां अकस्मात् 'रजतम्' इति निश्चितौ शब्दप्रत्ययौ ॥ १-१-४, पा. २२.

अथाभ्युपगम्यापि मिथ्यार्थावभासस्य कारणम् किमर्थापत्त्या अध्यासकारणत्वेनाविद्याशक्तिकल्पनं समञ्जसम् ?–इत्येतद् विचारमर्हति । यत्कारणम् अध्यास एव तावत् स्वयम् अविद्याख्यः, स च सर्वप्रमाणप्रमेयव्यवहारनिर्वोढा –इत्याह भाष्यकृत् सोपपत्तिकम् –

(३) तमेतमविद्याख्यम् आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः ॥ अध्यासभा. पा. २.

तदेवं सर्वस्यापि प्रमाणस्य यदा आविद्यकत्वम्, तदा प्रमाणबलेन अविद्यायाः कल्पनम् तस्याश्च अध्यासोपपादकत्वस्वीकरणं न कथञ्चिदपि प्रमाणवृत्तज्ञानां शोभते ॥

इति । अत इयं कारिका अवस्थात्रयात्मत्वेन अवभासो माया, मिथ्यैव आत्मनः – इत्याह ; न तु अनाद्यविद्या माया काचित् आत्मसत्तानुबन्धिनी अनादिकालात् तमाच्छाद्य तिष्ठतीति, तया अवच्छिन्नत्वादेव जीवः स्वं रूपं न वेत्ति – इति वा । अतो यत्किञ्चिदेतत् ॥

तदेवं मिथ्यार्थावभासे वस्तुतत्त्वविवेकाभावं मुक्त्वा हेत्वन्तरस्य कारणदोषादेरन्वेषणम्, तत्रार्थापत्त्या कारणाविद्याया दोषत्वेन कल्पनं च समपेक्षत इत्युक्तिष्टीकाकारस्य न भाष्यादृतविचारसरणिमनुरुन्द्धे इति सिद्धम् ॥

## भाष्यानुसारेण प्रातिभासिकरजतादिविचारः

२६. एवं तावत् प्राक्प्रदर्शितानां (खं. १६) विकल्पानां मध्ये मिथ्याज्ञाननिमित्त इत्यत्र मिथ्याज्ञाननिर्वचनम् अनिर्वचनीयम् अज्ञानं इतीदं टीकाकारस्य स्वोपज्ञम्, सम्प्रदायान्तरादागतं वा, न भाष्यानुसारीति स्फुटीकृतम् । अथैतदुपोद्बलकत्वेनैव यत्र कुत्रचित् प्रातिभासिकपदार्थोदाहरणं भाष्यकारस्य, तत्राविद्याशक्तिर्न क्वचिदपि कथञ्चिदपि परामृष्टा – इति प्रदर्शयितुं सूत्रभाष्यवाक्यानि तावत् सङ्कलयामः –

(१) तथा च लोके अनुभवः – 'शुक्तिका हि रजतवदवभासते', 'एकश्चन्द्रः सद्वितीयवत्' इति ॥ अध्यास पा. २.

(२) ननु वस्तुमात्रकथनेऽपि 'रज्जुरियं नायं सर्पः' इत्यादौ भ्रान्तिजनितभीतिनिवर्तनेन अर्थवत्त्वं दृष्टम् ॥ १-१-४, पा. १३.

[भ्रान्तिजनितैव भीतिः – इत्युक्तम्, न तु अविद्याशक्तिहेतुकसर्पदर्शनोत्पन्नेति ॥]

(३) यथा मन्दान्धकारे 'स्थाणुरयम्' इत्यगृह्यमाणविशेषे पुरुषशब्दप्रत्ययौ स्थाणुविषयौ, यथा वा शुक्तिकायाम् अकस्मात् 'रजतम्' इति निश्चितौ शब्दप्रत्ययौ, तद्वत् देहादिसङ्घाते 'अहम्' इति निरुपचारेण शब्दप्रत्ययौ आत्मानात्माविवेकेनोत्पद्यमानौ कथं गौणौ शक्यौ वदितुम् ? ॥ १-१-४, पा. २२.

[उपोद्घाते इव अत्रापि अविवेक एव कारणं मिथ्याप्रत्ययोत्पत्तौ इत्युक्तमत्र न तु अविद्याशक्त्युत्पन्नप्रातिभासिकार्थविशेषः – इति ॥ ]

(४) सत्यम्, नेश्वरादन्यः संसारी, तथापि देहादिसङ्घातोपाधिसंबन्ध इष्यत एव घटकरकगिरिगुहाद्युपाधिसंबन्ध इव व्योम्नः; तत्कृतश्च शब्द-

प्रत्ययव्यवहारो लोकस्य दृष्टः 'घटच्छिद्रम्', 'करकादिच्छिद्रम्' इत्यादिः, आकाशाव्यतिरेकेऽपि; तत्कृता च आकाशे घटाकाशादिभेदमिथ्याबुद्धिर्दृष्टा ॥ १-१-५, पा. २८

[अत्रापि अविवेककृता मिथ्याबुद्धिरित्युक्तम् ॥]

(५) न हि बालैस्तलमलिनतादिभिर्व्योम्नि विकल्प्यमाने तलमलिनतादिविशिष्टमेव परमार्थतो व्योम भवति ॥ १-२-८, पा. ६९.

(६) यथा शुद्धस्य स्फटिकस्य स्वाच्छ्यं शौक्ल्यं च स्वरूपं प्राग् विवेकग्रहणात् रक्तनीलाद्युपाधिभिरविविक्तमिव भवति; प्रमाणजनितविवेकग्रहणात्तु पराचीनः स्फटिकः स्वाच्छ्येन शौक्ल्येन च स्वेन रूपेण अभिनिष्पद्यत इत्युच्यते। प्रागपि तथैव सन् .... ॥ १-३-१९, पा. ११३.

(७) एकस्मिन् असङ्गे परमात्मनि तद्विपरीतं जैवं रूपं व्योम्नीव तलमलादि परिकल्पितम् ॥ १-३-१९, पा. ११५.

(८) यथा कश्चित् सन्तमसे पतितां काञ्चिद् रज्जुम् अहिं मन्यमानो भीतो वेपमानः पलायते; तं च अपरो ब्रूयात् 'मा भैषीः, नायमहिः, रज्जुरेव' इति; स च तदुपश्रुत्य अहिकृतं भयम् उत्सृजेत्, वेपथुं पलायनं च; न तु अहिबुद्धिकाले तदपगमकाले च वस्तुनः कश्चिद् विशेषः स्यात् – तथैवैतदपि द्रष्टव्यम् ॥ १-४-६, पा. १५४.

[अहित्वेनावभासकालेऽपि रज्ज्वां न कश्चिद्विशेषः इत्युक्तमत्र ॥]

(९) यथा च मृगतृष्णिकोदकादीनाम् ऊषरादिभ्योऽनन्यत्वम्; दृष्टनष्टस्वरूपत्वात्, स्वरूपेणानुपाख्यत्वात् ॥ २-१-१४, पा. १९७.

[मृगतृष्णिकोदकादीनाम् ऊषरादिभ्योऽनन्यत्वमेव न तु प्रतीतरूपेण किञ्चिद्रूपवत्त्वम् इत्युक्तमत्र ॥]

(१०) न हि तिमिरोपहतनयनेन अनेक इव चन्द्रमा दृश्यमानः, अनेक एव भवति ॥ २-१-२७, पा. २१३.

(११) यथा च, आकाशो घटादिषु गच्छत्सु गच्छन्निव विभाव्यमानोऽपि न परमार्थतो गच्छति, यथा च उदशरावादिकम्पनात् तद्गते सूर्यप्रतिबिम्बे कम्पमानेऽपि न तद्वान् सूर्यः कम्पते एवम् ॥ २-३-४६, पा. २९९.

(१२) आभास एव चैष जीवः परस्याऽऽत्मनः, जलसूर्यकादिवत् प्रतिपत्तव्यः, न स एव साक्षात्, नापि वस्त्वन्तरम्। अतश्च यथा नैकस्मिन्

जलसूर्यके कम्पमाने जलसूर्यकान्तरं कम्पते, एवं नैकस्मिन् जीवे कर्मफलसंबन्धिनि जीवान्तरस्य तत्संबन्धः ॥ २-३-५०, पा. ३०१.

[प्रसङ्गेनेदमप्यवधेयमत्र यद् बिम्बप्रतिबिम्बैक्यं टीकाकृदभिमतं निह्नुते इदं वचनमिति ॥ ]

(१३) 'शुक्तिकां रजतमिति प्रत्येति' इत्यत्र शुक्तिवचन एव शुक्तिकाशब्दः, रजतशब्दस्तु रजतप्रतीतिलक्षणार्थः । प्रत्येत्येव हि केवलं रजतमिति न तु तत्र रजतमस्ति ॥ ४-१-५, पा. ४६७.

यथोदाहृतेषु वचनेषु सूत्रभाष्यगतेषु नैकमपि विद्यते स्थानम् यत्र प्रातिभासिकवस्तुप्रतिभासार्थम् अविद्याशक्तिरपेक्ष्यते इति वचनं लक्ष्यते । प्रत्युत स्पष्टोक्तिरेव दृश्यते सर्वत्र एकमेव वस्तु स्वेनैव रूपेण अवतिष्ठमानं केनचित् कारणेन स्वरूपविशेषेणागृह्यमाणं तथा तथा विकल्प्यते । तत्तत्प्रतीतिरेव तु तत्तच्छब्दप्रत्यययोर्गोचरीक्रियते भ्रान्त्यैव केवलेति च । यथा च गीताभाष्ये, उपनिषद्भाष्येष्वपि च एष एवाभिप्राय आविष्क्रियते तथा परिशिष्टे (३) प्रदर्शयिष्यत इत्यलमिह बहुप्रपञ्चेन ॥

## सुषुप्तावविद्याशक्तिसद्भावः किं भाष्यसम्मतः ?

२७. एवं तावत्, टीकायां अध्यासोपादानकारणत्वेन कल्पिता अविद्याशक्तिः, भाष्याक्षरानारूढा, यच्च मिथ्यार्थावभासान्यथानुपपत्त्या तत्कल्पनं टीकायां तदपि न भाष्यानुमतम् – इत्येतत् प्रतिपादितम् । अथेदानीं सुषुप्तौ तादृशाविद्यासद्भावः किं भाष्याभिमतः, उत न ? – इत्येतद् विमृश्यते । तत्र टीकायां तावल्लिखितमस्ति –

(१) सा (अविद्याशक्तिः) प्रत्यक्चिति ब्रह्मस्वरूपावभासं प्रतिबध्नाति, अहङ्काराद्यतद्रूपप्रतिभासनिमित्तं च भवति ; सुषुप्तादौ च अहङ्कारादिविक्षेपसंस्कारमात्रशेषं स्थित्वा पुनरुद्भवति ॥ पं. पा. १२१-१३१.

इति । उदाहृतमेतद् वाक्यं प्राक् (खं. १६, पा. २१) । चित्स्वरूपसत्तानुबन्धित्वम् अहङ्कारादिमिथ्यार्थावभासोपादानत्वं च विमृष्टप्रायम् ; 'सुषुप्तौ विक्षेपसंस्कारमात्ररूपेणावशेषः' पुनरत्रैव विमर्शनीयः । वक्ष्यति चोत्तरत्र पुनरप्येकवारं टीकाकृत् –

(२) "येयं........चैतन्यस्य स्वत एवावस्थितलक्षणब्रह्मस्वरूपतावभासं प्रतिबध्य जीवत्वापादिका........सुषुप्ते प्रकाशाच्छादनविक्षेपसंस्कारमात्रस्वरूप-स्थितिः, अनादिरविद्या ॥" पं. पा. ३२८.

इति। अत्र 'संस्कारमात्रशेषं स्थित्वा' इति यथाश्रुता टीका संस्कारस्यैवाविद्यात्वं प्रसञ्जयेत् इति शङ्कया स्याद् व्याख्यातारो विवरणकाराः स्वाभिप्रायमित्थ-माविष्कुर्वन्ति –

(३) तत्रापि अविद्याशक्तिः संस्कारमात्रशेषं तिष्ठतीति न संस्कारादय एव अज्ञानम् इत्यर्थः। कथम् ? न तावत् सुषुप्तादौ स्वयंप्रकाशब्रह्मस्वरूपा-नवभासः पुरुषान्तरसंवेदनवत् द्रष्टुर्भिन्नत्वादिति शक्यं वक्तुम्; एकत्वश्रुतेः। नापि मिथ्याज्ञानप्रतिबन्धात्; तत्र तस्याभावात्। नापि तत्संस्कारप्रतिबन्धात्; भ्रान्तिसंस्काराणां तत्त्वावभासप्रतिबन्धकत्वाभावात्, सत्स्वपि रजतभ्रम-संस्कारेषु शुक्तिकावबोधदर्शनात्। नाप्यग्रहणप्रतिबन्धात्, स्वरूपग्रहणस्य नित्यत्वात्। स्वयंप्रकाशमाने संवेदने तद्विषयकादाचित्काग्रहणस्य अप्रतिबन्धक-त्वात्। नापि कर्मणां स्वरूपावभासविरोधिता; सर्वदा अणुमात्रस्यापि चैतन्यस्य अनवभासप्रसङ्गात्। अज्ञानेऽपि तुल्यम् इति चेत्। न। तस्य स्वविषय-चैतन्यावभासं प्रति अप्रतिबन्धकत्वात्। ...तस्मात्, सुषुप्तादौ स्वरूपानवभास-व्यवहारोऽग्रहणमिथ्याज्ञानतत्संस्कारकर्मभ्योऽन्यदेव किञ्चित् प्रतिबन्धकम् अज्ञानं कल्पयति इत्यर्थः॥ पं. पा. १२२-१२४.

अत्रेदं तावदवधेयम्– (१) टीकायाम् अविद्या ब्रह्मस्वरूपाच्छादिका प्रत्यक्चिति निसर्गत एवास्तीति, सा च सुषुप्ते प्रकाशाच्छादनविक्षेपसंस्कार-मात्रस्थितिः– इति चोच्यते। (२) विवरणे तु अग्रहणमिथ्याज्ञानतत्संस्कार-व्यतिरिक्तैव सा – इति, ब्रह्मस्वरूपानवभासव्यवहारान्यथानुपपत्त्या कल्प-नीया इति चोच्यत इति ॥

भाष्ये पुनर्ब्रह्मस्वरूपप्रकाशाच्छादिकाया अविद्याया नामापि न श्रूयते। सुषुप्ते जीवस्य ब्रह्मणि संपत्तिरेव श्रुत्यभिमता, संपत्तिनिमित्त एव तु

---

1. अत्र तत्त्वदीपनकारः (अखण्डानन्दमुनिः) टीकाम् एवं व्याचष्टे-"अहङ्कारादि-विक्षेपस्य विपरीतरूपस्य संस्कारमात्रस्य शेषो यस्मिन् तत् तथोक्तम्, शेषशब्दो भावप्रधानः। तच्छेषत्वं यथा स्यात् तथा सुषुप्त्यादौ स्थित्वा जागरादौ कर्मवशाद् विक्षेपरूपेण प्रादुर्भवति। ततश्च अनवभासविक्षेपहेत्वज्ञानम् एष्टव्यम्। इतरथा संस्कारमात्राद् विक्षेपप्रादुर्भावासम्भवात सुषुप्त्यादौ मुक्त्यापत्तेश्च इति टीकार्थः॥" त. दी. पा. १२२. विवरणे तत्त्वदीपने च टीकागतो मात्रशब्दो व्यर्थ इति स्पष्टम् ॥

तत्राऽऽत्मनो विशेषज्ञानाभावः – इति चासकृदुच्यते । एतदर्थकवाक्यानि समाहृत्योदाहरिष्यामो भाष्यतद्व्याख्यानप्रस्थानयोः परस्परवैलक्षण्यस्फोरणाय–

(१) मनःप्रचारोपाधिविशेषसंबन्धात् इन्द्रियार्थान् गृह्णन् तद्विशेषापन्नो जीवो जागर्ति । तद्वासनाविशिष्टः स्वप्नान् पश्यन् मनःशब्दवाच्यो भवति । स उपाधिद्वयोपरमे सुषुप्तावस्थायाम् उपाधिकृतविशेषाभावात् स्वात्मनि प्रलीन इव–इति 'स्वं ह्यपीतो भवति' इत्युच्यते । .... अतो यस्मिन्नप्ययः सर्वेषां चेतनानां तच्चेतनं सच्छब्दवाच्यम् जगतः कारणम्, न प्रधानम् ॥ १-१-९, पा. ३३.

(२) तथा हि अहरहर्जीवानां सुषुप्तावस्थायां ब्रह्मविषयं गमनं दृष्टं श्रुत्यन्तरे 'सता सोम्य तदा संपन्नो भवति' इत्येवमादौ ॥ १-३-१५, पा. १०९.

(३) संप्रसादशब्दोदितो जीवः, जागरितव्यवहारे देहेन्द्रियपञ्जराध्यक्षो भूत्वा तद्वासनानिर्मितांश्च स्वप्नान् नाडीचरोऽनुभूय श्रान्तः शरणं प्रेप्सुः, उभयरूपादपि शरीराभिमानात् समुत्थाय सुषुप्तावस्थायां परञ्ज्योतिराकाशशब्दितं परं ब्रह्मोपसंपद्य विशेषविज्ञानवत्त्वं परित्यज्य स्वेन रूपेण अभिनिष्पद्यते ॥ १-३-२०, पा. ११६.

(४) सुषुप्तिकाले च परेण ब्रह्मणा जीव एकतां गच्छति, परस्माच्च ब्रह्मणः प्राणादिकं जगज्जायत इति वेदान्तमर्यादा ॥ १-४-१८, पा. १६८.

(५) यथा हि सुषुप्तिसमाध्यादावपि सत्यां स्वाभाविक्याम् अविभागप्राप्तौ मिथ्याज्ञानस्य अनपोदितत्वात् पूर्ववत् पुनः प्रबोधे विभागो भवति.... ॥ २-१-९, पा. १९१.

(६) यत्तु सुप्तादयो न चेतयन्त इति, तस्य श्रुत्यैव परिहारोऽभिहितः सुषुप्तं प्रकृत्य 'यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद् द्वितीयमस्ति ततोऽन्यद् विभक्तं यत् पश्येत्' इत्यादिना । एतदुक्तं भवति – विषयाभावादियमचेतयमानता न चैतन्याभावादिति ॥ २-३-१८, पा. २८०, २८१.

[नापि आच्छादकाविद्याशक्तिसद्भावहेतोरित्युक्तमेव भवति, 'न तु तद् द्वितीयमस्ति' इति वचनात् ॥]

(७) ननु सुषुप्तप्रलययोर्न शक्यते बुद्धिसंबन्ध आत्मनोऽभ्युपगन्तुम्, 'सता सोम्य तदा संपन्नो भवति, स्वमपीतो भवति' – इति वचनात् । कृत्स्नविकारप्रलयाभ्युपगमाच्च । तत् कथं यावदात्मभावित्वं बुद्धिसंबन्धस्येति ? अत्रोच्यते – यथा लोके पुंस्त्वादीनि बीजात्मना विद्यमानान्येव बाल्यादिषु

**अनुपलभ्यमानानि अविद्यमानवदभिप्रेयमाणानि यौवनादिषु आविर्भवन्ति; नाविद्यमानान्युत्पद्यन्ते, षण्ढादीनामपि तदुत्पत्तिप्रसङ्गात्, एवम् अयमपि बुद्धिसंबन्धः शक्त्यात्मना विद्यमान एव सुषुप्तिप्रलययोः पुनः प्रबोधप्रसवयोराविर्भवति। एवं हि एतद् युज्यते। न हि आकस्मिकी कस्यचिदुत्पत्तिः सम्भवति। अतिप्रसङ्गात्। दर्शयति च सुषुप्तादुत्थानम् अविद्यात्मकबीजसद्भावकारितम् 'सति संपद्य न विदुः सति संपद्यामहे' इति, 'त इह व्याघ्रो वा सिंहो वा' (छां. ६-९-३)[1] इत्यादिना। तस्मात् सिद्धमेतत्, यावदात्मभावी बुद्ध्याद्युपाधिसंबन्धः – इति ॥ २-३-३१, पा. २८८-२८९.**

[अत्र नैव टीकासम्मतोऽविद्याशक्तिसद्भावः, तदभावो वा विचार्यते। अप्रकृतत्वात् अविद्यायाः। किं तर्हि मिथ्याज्ञानपुरःसरो बुद्धिसंबन्धः आत्मनः यावन्मिथ्याज्ञाननिवृत्ति शक्त्यात्मना (बीजात्मना) विद्यमान एव सुषुप्तिप्रलययोः प्रबोधसृष्टिकाल्योराविर्भवति – इत्येतावदुच्यते इति प्रकरणबलादवगम्यते। तथा हि समनन्तरपूर्वसूत्रभाष्ये कण्ठरवेणोक्तम्। अत्र च भाष्ये बीजस्याविद्यात्मकत्वमिति तावदेवोक्तं भवति यावदुक्तं भवति मिथ्याज्ञानपुरःसरमिति – इति स्फुटम्। अथ च, अविद्याशक्तिवादिनः पदे पदे एतां श्रुतिं सुषुप्तादौ तत्सद्भावप्रमाणत्वेनोदाहरन्तीत्येतावता इदमपि वाक्यमत्र विचारितमिति वेदितव्यम् ॥]

**(८) यथा तु तक्षा लोके वास्यादिकरणहस्तः कर्ता दुःखी भवति, स एव स्वगृहं प्राप्तो विमुक्तवास्यादिकरणः स्वस्थः, निर्वृतः, निर्व्यापारः सुखी भवति; एवम् अविद्याप्रत्युपस्थापितद्वैतसंपृक्त आत्मा स्वप्नजागरितावस्थयोः कर्ता दुःखी भवति; स तच्छ्रमापनुत्तये स्वमात्मानं परं ब्रह्म प्रविश्य विमुक्तकार्यकरणसङ्घातः, अकर्ता सुखी भवति संप्रसादावस्थायाम्। तथा मुक्त्यवस्थायामपि अविद्याध्वान्तं विद्याप्रदीपेन विधूय आत्मैव केवलः, निर्वृतः सुखी भवति ॥ २-३-४०, पा. २९३.**

[इदमपि वाक्यं कार्यकरणसङ्घातनिवृत्त्या अकर्तृत्वमात्मनः सुषुप्तौ, मुक्तौ च – इत्येतदाचष्टे। कर्तृत्वं च अविद्याप्रत्युपस्थापितकार्यकरणसङ्घातलक्षणोपाधिकृतम् – इतीयन्मात्रमेवाह, न त्वेवाविद्याशक्तिसद्भावं किञ्चिदपि परामृशति इति न प्रस्मर्तव्यम्। सुषुप्तौ सङ्घातवियोगः स्वाभाविकोऽवस्थाविशेषनिबद्धः, मुक्तौ तु नित्याशरीरताज्ञापकश्रुतिवाक्यजन्यविद्याप्रयुक्त आत्यन्तिकः – इति विशेषः ॥]

**(९) सर्वत्र च विशेषविज्ञानोपरमलक्षणं सुषुप्तं न विशिष्यते ॥ ३-२-७, पा. ३४९.**

---

1. छान्दोग्यभाष्येऽपि स्पष्टं दृश्यते वाक्यम् – 'यस्माच्चैवम् आत्मनः सद्रूपताम् अज्ञात्वैव सत्संपद्यन्ते, अतस्ते इह लोके यत्कर्मनिमित्तां यां यां जातिं प्रतिपन्ना आसुर्व्याघ्रादीनां 'व्याघ्रोऽहम्, सिंहोऽहम्' इत्येवम्, ते तत्कर्मज्ञानवासनाङ्किताः सन्तः सत्प्रविष्टा अपि तद्भावेनैव पुनराभवन्ति' इति ॥ छां. भा. ६-९-३, पा. ५२९.

(१०) एवम् एतासु श्रुतिषु त्रीण्येव सुषुप्तिस्थानानि सङ्कीर्तितानि नाड्यः पुरीतत्, ब्रह्म च इति । तत्रापि द्वारमात्रं नाड्यः पुरीतच्च. ब्रह्मैव त्वेकं सुषुप्तिस्थानम् ॥ ३-२-७, पा. ३५०.

(११) ब्रह्माधारत्वमपि अस्य सुषुप्ते नैवाधाराधेयभेदाभिप्रायेणोच्यते, कथं तर्हि तादात्म्याभिप्रायेण । यत आह – 'सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति' इति ॥ ३-२-७, पा. ३५१.

(१२) अपि च न कदाचित् जीवस्य ब्रह्मणा संपत्तिर्नास्ति, स्वरूपस्य अनपायित्वात् । स्वप्नजागरितयोस्तु उपाधिसंपर्कवशात् पररूपापत्तिमिव अपेक्ष्य तदुपशमात् सुषुप्ते स्वरूपापत्तिर्वक्ष्यते ॥ ३-२-७, पा. ३५१.

[जाग्रत्स्वपीदृशेषु बहुषु भाष्यवाक्येषु **विवरणकारः** प्राह–ब्रह्माविद्यादिसाङ्कर्यपरिहाराय 'सुषुप्त्यादावपि अस्त्येव जीवब्रह्मविभागः' इति कल्प्यते (पं. वि. पा. ३५०) इति । अहो, अविद्यमानाविद्याशक्तिपक्षपातव्यसनिता ! ]

(१३) अपि च स्थानविकल्पाभ्युपगमेऽपि विशेषविज्ञानोपशमलक्षणं तावत् सुषुप्तं न क्वचिद् विशिष्यते । तत्र सति संपन्नस्तावत् तदेकत्वात् न विजानातीति युक्तम्, 'तत्केन कं विजानीयात्' इति श्रुतेः । नाडीषु (पुरीतति च शयानस्य न किञ्चिद्‌विज्ञाने कारणं शक्यं विज्ञातुम् । भेदविषयत्वात् ॥ ३-२-७, पा. ३५१.

[अत्र सुषुप्ते 'सदेकत्वात्' न विजानातीत्युक्तम्, न पुनरविद्याच्छन्नस्वरूपत्वादिति ॥]

(१४) उपाधिगतमेव अतिदूरादिकारणम् अविज्ञाने इति यद्युच्येत, तथापि उपाधेरुपशान्तत्वात् सत्येव सम्पन्नो न विजानातीति युक्तम् ॥ ३-२-७, पा. ३५१.

[अत्र सर्वोपाध्युपशान्तिरविज्ञाने हेतुत्वेनोक्ता, न त्वविद्याशक्त्युपाधिशेषता ॥]

(१५) न च वयम् इह तुल्यवन्नाड्यादिसमुच्चयं प्रतिपादयामः ; न हि नाड्यः सुप्तिस्थानम्, पुरीतद् वा – इत्यनेन विज्ञानेन किञ्चित् प्रयोजनमस्ति । न ह्येतद्विज्ञानप्रतिबद्धं किञ्चित् फलं श्रूयते । नाप्येतद्विज्ञानं फलवतः कस्यचिदङ्गम् उपदिश्यते । ब्रह्म तु अनपायिसुप्तिस्थानम् – इत्येतत् प्रतिपादयामः । तेन तु विज्ञानेन प्रयोजनमस्ति । जीवस्य ब्रह्मात्मत्वावधारणम्, स्वप्नजागरितव्यवहारविमुक्तत्वावधारणं च । तस्मात्, आत्मैव सुप्तिस्थानम् ॥ ३-२-७, पा. ३५१.

[ब्रह्मैव सुप्तिस्थानम् इत्यनेन विज्ञानेन जीवस्य ब्रह्मात्मत्वावधारणं फलं भवतीत्युक्तम् अविद्याशक्तिशेषवादे तदेतन्न भवेदिति न पृथग् वक्तव्यम् ॥ ]

(१६) यस्माच्च, आत्मैव सुप्तिस्थानम् । अत एव च कारणात् नित्यवदेव अस्मादात्मनः प्रबोधः स्वापाधिकारे शिष्यते । .... विकल्प्यमानेषु तु सुषुप्ति-

**स्थानेषु कदाचिन्नाडीभ्यः प्रतिबुध्यते, कदाचित् पुरीततः, कदाचिदात्मनः इत्यशासिष्यत् । तस्मादपि आत्मैव सुप्तिस्थानमिति ॥ ३-२-८, पा. ३५२.**

[अविद्योपाधिकरूपत्वे ब्रह्मणः सुप्तिस्थानत्वं वा, ततः प्रबोधो वा नाशासिष्यत – इति स्पष्टम् । अत्र भाष्ये वाक्यमस्ति 'इह तु विद्यते विवेककारणं कर्म च अविद्या च इति वैषम्यम्' इति । अत्रापि अविद्याशब्दो मिथ्याज्ञानवाचक एव, सप्तमोदाहरणे इव । न हि सुषुप्ते कर्मास्तीति कस्यचित् संमतम्; तत्साहचर्यात् 'अविद्या' मिथ्याज्ञानमेव; तत्कृत-बुद्धिसंबन्धो बीजात्मना सुषुप्तेऽनुवर्तेत इति सर्वं सप्तमोदाहरणे इव नेयम् ॥]

**(१७) न च सुखित्वप्रत्ययो दुःखित्वप्रत्ययो वा सुषुप्ते विद्येते । मुग्धेऽपि तौ प्रत्ययौ नैव विद्येते । तस्मात् उपाध्युपशमात् सुषुप्तवन्मुग्धेऽपि कृत्स्न-संपत्तिरेव भवितुमर्हति, नार्धसंपत्तिरिति । अत्रोच्यते । न ब्रूमो मुग्धे अर्धसंपत्ति-र्जीवस्य ब्रह्मणा भवतीति; किं तर्हि, अर्धेन सुषुप्तपक्षस्य भवति मुग्धत्वम्, अर्धेन तु अवस्थान्तरपक्षस्येति ब्रूमः ॥ ३-२-१०, पा. ३५५.**

[अविद्यावशेषपक्षे तु नैव कृत्स्नसंपत्तिः स्यात् ॥]

**(१८) येन ब्रह्मणा सुषुप्त्यादिषु जीव उपाध्युपशमात् संपद्यते तस्य इदानीं स्वरूपं श्रुतिवशेन निर्धार्यते ॥ ३-२-११, पा. ३५५.**

[जीवस्य ब्रह्मणा संपत्तिः सुषुप्तिमूर्छादिषु – इत्यसकृदुच्यते भाष्ये । अविद्याशेष-वादिनस्तु जीवब्रह्मविभागमेव स्वीकुर्वन्ति – इत्यवधेयमेतत् ॥]

**(१९) 'स्वमपीतो भवति' इति हि स्वरूपसम्बन्धमेनम् आमनन्ति । स्वरूपस्य चानपायित्वात् न नरनगरन्यायेन संबन्धो घटते । उपाधिकृतस्वरूप-तिरोभावात्तु 'स्वमपीतो भवति' इत्युपपद्यते ॥ ३-२-३५, पा. ३७२.**

तदेवं यथोदाहृतसूत्रभाष्यवाक्येभ्योऽयमभिप्रायोऽवसीयते आचार्यस्य यत् सुषुप्ते ब्रह्मणा सम्पन्नो जीवः तदेकत्वादेव न किञ्चित् तत्र विजानाति, द्वितीयस्य स्वात्मचैतन्यतो विभक्तस्याभावाच्चेति । न तु क्वचिदपि कश्चन परामर्श उपलभ्यते ब्रह्मस्वरूपाच्छादिकाया अविद्याशक्तेः[1] । सुषुप्ते ब्रह्म-

1. अत्र भामतीकारो वाचस्पतिमिश्रस्तु लिखति स्म –

(1) "यद्यपि प्राणमात्रावशेषतातन्निःशेषते सुषुप्तप्रलयावस्थयोर्विशेषः तथापि कर्मविक्षेपसंस्कारसहितलयलक्षणाविद्यावशेषतासाम्येन स्वापप्रलयावस्थयोरभेद इति द्रष्टव्यम् ॥" वा. भा. १-३-३०, पा. ३३५.

(2) "स्वच्छतारूपमिव रूपमस्य इति स्वच्छतारूपः, न तु स्वच्छतैव: लयविक्षेपसंस्कारयोस्तत्र भावात् ॥" वा. भा. १-४-१८, पा. ४०९.

यद्यपि पञ्चपादिकायामिवात्र 'अविद्याशक्तिरस्ति' इति नोक्तम्, तथापि मण्डनानुसारेण लयलक्षणाविद्या अभ्युपगता; तथा च भाष्यविरोधः स्फुट एव । अधिकं तु अस्मदीय'वेदान्तप्रक्रियाप्रत्यभिज्ञा'याम् ॥

स्वरूपाच्छादिकायाः इति । गीताभाष्यवाक्यानि, उपनिषद्वाक्यानि चैतद्विषये परिशिष्टे (४) द्रष्टव्यानि ॥

## सौषुप्ताविद्याविषये विवरणकारयुक्तयः

२८. अत्र विवरणकारो यद्यपि पञ्चपादिकामेव व्याख्यातुं प्रवृत्तः, तथापि मूलग्रन्थतोऽधिका अपि युक्तीरानयति स्वोपज्ञास्तत्र तत्र । तत्र सौषुप्ताविद्याविषये तस्य कतिचिदभिप्रायान् अत्र सङ्कलयामो जिज्ञासुजनोपकाराय –

(१) न चान्तःकरणम् अवच्छेदकम् । अर्थतो विदारणाभावात् । अवच्छेदस्य विभ्रममात्रत्वात् । अज्ञानस्यैव तदुपादानत्वात्, अन्तःकरणस्य च सम्यग्ज्ञाननिरस्यतया अविद्याध्यासत्वात् स्वकारणावच्छिन्नस्यैवावच्छेदकत्वसंभवात्, सत्यत्वेऽपि सादेरनाद्यविद्योपाधित्वाभावात् सुषुप्तादौ चान्तःकरणाभावादनवच्छेदप्रसङ्गात् । तदापि सूक्ष्मावस्थम् अन्तःकरणमवच्छेदकम् इति चेत् किं तावन्निरवयवत्वापत्तिः सूक्ष्मता ? सावयवस्यावयवाभावे स्वरूपनाशात् । अथावयवापचयमात्रं सूक्ष्मता ? न । अवस्थितावयविनोऽकार्यत्वप्रसङ्गात् । कारणात्मना स्थितिः इति चेत्; किं कारणमेव स्थितम् इत्यर्थः; कार्यमपीति वा ? पूर्वस्मिन् अन्तःकरणाभावात्, इतरस्मिन् स्थित्यवस्थातो न विशेषः । तस्मात् कार्यसंस्कारविशिष्टशक्तिमत्कारणावस्थानमेव सूक्ष्मतापत्तिः । अतो नान्तःकरणमवच्छेदकमस्ति । तस्मात् क्लृप्ताविद्यासामर्थ्यादेव जीवब्रह्मविभागसिद्धौ नातिरिक्तकल्पनावकाशः ॥ पं. वि. पा. २७० – २७१.

[ श्रुतिविरुद्धम्, तद्गुणसारत्वाधिकरणभाष्यविरुद्धं चेदमिति स्पष्टम् ॥ ]

(२) अज्ञानगतचैतन्याभासजन्मोपाधित्वादज्ञानसुखसाक्षिविकल्पानुभवस्य, अज्ञानावस्थाभेदेन चैतन्याभासानां भिन्नत्वात्, तद्विनाशसंस्कारजस्मरणम् अज्ञानसुखसाक्षिचैतन्याकारम् अज्ञानविशिष्टात्माश्रयमेव सम्भाव्यते, नान्तःकरणाश्रयमिति । सर्वथापि सुषुप्ते अज्ञानसुखानुभवसंभवात् असम्बद्धमिदं टीकाकारेणोक्तमिति । सत्यम्, परमतमाश्रित्येदमुक्तम्, न स्वमतम् इति न दोषः ॥ पं. वि ३२५, ३२६.

[ 'सुषुप्ते सुखमहमस्वाप्सम्. न किञ्चिदवेदिषम्' इति स्मरणोपपादकत्वेनाभिमतायुक्तय इमे । 'सुखावमर्शो दुःखाभावनिमित्तः' (पं. पा. ३२२) इति टीकामधिकृत्य लिखिताः । अत्र निरुपमा कल्पनाचातुरी । अज्ञानकल्पनमेव तावत् मिथ्याज्ञाननिबद्धम्, लोकवेदासिद्धत्वात्, किमु वक्तव्यं तदवस्थाभेदकल्पनम् तद्गतचैतन्याभासभेदकल्पनम्,

तद्विनाशसंस्कारकल्पनं तच्च संस्कारस्मरणकल्पनं चेति । अतः सर्वमेवेदममितिचित्रम्, श्रुतिभाष्यविरुद्धं च । तथा हि – उदाहृतपूर्वमेव भाष्यं सुषुप्ते सत्संपत्तिनिमित्तकत्वादेव तत्राज्ञानमिति वदत्, व्यवहारदृष्ट्या मिथ्याज्ञानप्रत्युपस्थापितबुद्धिसंबन्धस्य शक्त्यात्मना सुषुप्ते अवस्थानं वदच्च । सुषुप्तावस्थायां दर्शनादिव्यवहारः, सुखं च श्रूयमाणं आत्मन एवासङ्गत्वविवक्षया सुखरूपत्वविवक्षया चेति भूमाधिकरणभाष्यवचने अपीहानुसंधेये ॥]

**(३) निर्विकल्पकं चैतन्यमात्रैकरसम् अविद्यासंबन्धादीषद्विकल्पव्यवहारालम्बनं भवति सुषुप्ते ; तदुत्तदुपादानान्तःकरणावच्छेदात् तदेव स्थूलतरव्यवहारालम्बनं भवति स्वप्ने ; पुनरन्तःकरणसंसृष्टस्थूलशरीरोपरागात् स्थूलतमं भवति जागरणे । न चोपाधिभेदाज्जीवभेदप्रसङ्गः । पूर्वपूर्वोपाध्यवच्छिन्नस्यैवोत्तरोत्तरेणावच्छेदात् । निरपेक्षोपाधिभेदे हि जीवभेदः ॥ पं वि. ३४९.**

[तदभावाधिकरणभाष्यविरुद्धम्, तत्रोदाहृतश्रुतियुक्तिविरुद्धं चेदं सर्वम् । माण्डूक्यश्रुतिस्तु जागराद्यवस्थागतात्मनो जीवत्वापह्नवेन वैश्वानरत्वादिसमारोपानन्तरं सर्वेश्वरत्वाद्यध्यारोपपूर्वकमभ्युपगतप्राज्ञत्वमपि अपोद्य सर्वावस्थारहिततुरीयत्वमेव प्रतिपादयत्यात्मन इति सुप्रसिद्धमेतत् ॥ ]

**(४) ननु स्थूलशरीरोपादानभूतसूक्ष्मरूपसहितेन लिङ्गशरीरसंस्कारेण उपरक्तम् अज्ञानम् सुषुप्ते न जीवम् अवच्छेत्तुमर्हति ; तत्र भ्रान्त्यभावात्, तल्लक्षणत्वाच्च विभागस्य । अथ भ्रान्तिज्ञानमनपेक्ष्यैव अर्थगत एव विभागः कल्प्यते, तत्र विभागस्य कार्यत्वे सुषुप्तिप्रलयादौ अभावात् ब्रह्मण्येव अविद्यादिसाङ्कर्यं स्यात् । अकार्यत्वे विभागस्य अनादित्वात् अविद्यानिमित्तत्वं न स्यात् । उच्यते – ब्रह्मण्यविद्यादिसाङ्कर्यपरिहाराय सुषुप्त्यादावपि अस्त्येव जीवब्रह्मविभाग इति कल्प्यते । .... अज्ञानस्यानादित्वाच्च आत्माविद्यासंबन्धस्य नाविद्योपादानता ॥ पं. वि. ३४९–३५०.**

[सुषुप्तौ जीवस्य ब्रह्मणा संपत्तिं वदन्तीनां श्रुतीनां भाष्योक्तीनां च दत्तोऽयं जलाञ्जलिः । अनाद्यज्ञानस्य सुषुप्ते सत्त्वात्, तत्र चावस्थायाम् अज्ञाननिवर्तकविद्यायाः समुत्पत्तेरप्रतीक्ष्यत्वात्, हता बतेयं तपस्विनी मोक्षप्रत्याशा च ॥ ]

# अविद्यास्वरूपम्

२९. अथ कासौ अविद्या यन्निमित्तोऽयमहङ्काराद्यवभास इति ? तत्र टीकाकृदाह –

**(१) येयं श्रुतिस्मृतीतिहासपुराणेषु 'नामरूपम्', 'अव्याकृतम्', 'अविद्या', 'माया', 'प्रकृतिः', 'अग्रहणम्', 'अव्यक्तम्', 'तमः', 'कारणम्', 'लयः', 'शक्तिः', 'महासुप्तिः', 'निद्रा', 'अक्षरम्', 'आकाशम्' – इति च तत्र तत्र**

बहुधा गीयते चैतन्यस्य स्वत एवावस्थितलक्षणब्रह्मस्वरूपतावभासं प्रतिबध्य जीवत्वापादिका विद्याकर्मपूर्वप्रज्ञासंस्काररचित्रभित्तिः, सुषुप्ते प्रकाशाच्छादनविक्षेपसंस्कारमात्ररूपस्थितिः अनादिरविद्या, तस्याः परमेश्वराधिष्ठितत्वलब्धपरिणामविशेषो विज्ञानक्रियाशक्तिद्वयाश्रयः, कर्तृत्वभोक्तृत्वैकाधारः कूटस्थचैतन्यसंवलनसञ्जातज्योतिः स्वयंप्रकाशमानः अपरोक्षोऽहङ्कारः, यत्सम्भेदात् कूटस्थचैतन्योऽनिदमंशः आत्मधातुरपि मिथ्यैव 'भोक्ता' इति प्रसिद्धिमुपगतः, स च सुषुप्ते समुत्खातनिखिलपरिणामायाम् अविद्यायां कुतस्त्यः ? ॥ पं ३२८–३२९.

अत्र समवधेया विषया इमे टीकोक्ताः –

1. नामरूपाव्याकृतादिशब्दवाच्यैव अविद्या नाम ॥
2. सा च प्रत्यक्चैतन्यस्य ब्रह्मस्वरूपतां प्रतिबध्नाति, तस्य जीवत्वं चापादयति ॥
3. तस्याः परिणामविशेष एव अहङ्कारो नाम ॥
4. अहङ्कारसम्भेदादेव चिद्वस्तु 'भोक्ता' इति प्रसिद्धिं गतम् ॥
5. सुषुप्ते च नास्त्येष परिणामविशेषः ॥

तत्रैषां मध्ये अहङ्कारस्य चित्स्वरूपसत्तामात्रानुबन्ध्यविद्यापरिणामत्वम् – इत्येतद् भाष्ये कुत्रापि नोपलभ्यत इति प्राङ्निवेदितम् । स च परिणामविशेषो नास्ति सुषुप्ते, अस्ति तु संस्कारमात्रशेषा अविद्याशक्तिः – इत्येतदपि भाष्याभिप्रायवर्णनेन प्रत्युक्तप्रायम् । अथेदानीम् अविद्या यथोक्तविविधाभिधानभागिनीति किं भाष्यसम्मतम् ? – इत्येतदेव तावद् विमृशामः । प्रप्रथमं तावत् सूत्रभाष्ये अविद्याविषये स्पष्टतराणि वाक्यानीमानि दृश्यन्ते –

(२) तमेतम् एवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते ॥

(३) तमेतम् अविद्याख्यम् आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि ॥ अध्यासभाष्यम् , पा. २.

[ अत्राध्यासशब्दो नाहङ्कारलक्षणाध्यस्तपदार्थवाचकः, किं तु आत्मानात्मनोरितरेतरत्वेन ज्ञानमेव वक्तीति स्पष्टम् ; स एवाविद्याशब्दवाच्यः इति च ॥ ]

1. अत्र यद्यपि मुद्रितपुस्तके 'अविद्या' इत्येव पाठ आदृतः, तथापि 'विद्या' इत्येष एव शुद्धः पाठः । द्रष्टव्यम् – सू. भा १–४–५, ११ ; बृ. भा. ४–४–२.

(४) देहादिषु अनात्मसु 'अहमस्मि' इत्यात्मबुद्धिरविद्या ॥ १-३-२, पा ९५.

(५) 'तमः' इति शोकादिकारणम् अविद्या उच्यते ॥ १-३-८, पा. १०१.

[अत्रापि अविद्या नाम मिथ्याबुद्धिरेवोच्यते ; समानप्रकरणे 'अविद्यायाः परं पारं तारयसि' (प्र. ६-८) इत्यत्र 'अविद्यायाः – विपरीतज्ञानात्' इति भाष्यदर्शनात् ॥]

एतान्येव तु वाक्यानि सूत्रभाष्ये समुपलभ्यमानानि, यत्राविद्याशब्दः प्रयुक्तः । उदाहृतान्येव तु प्राक् (खं. १७) मिथ्याज्ञानशब्दसंवलितानि वाक्यानि, यत्र सम्यग्ज्ञानप्रतिद्वन्द्वित्वेन मिथ्याज्ञानं परामृष्टम् ; न तु तत्र टीकाकृदभिमताविद्याशक्तिलिङ्गं किञ्चिदस्तीत्यवोचाम । एवं च मिथ्याज्ञानम्, अविद्या – इति च पर्यायत्वेनैव स्वीकृते भाष्ये इति फलति । तत्रैवं स्थिते नामरूपादिसमाख्यमप्यव्याकृतम् अविद्याशब्दवाच्यमिति, तत्परिणाम एव चाहङ्कारो यत्सम्भेदादेवात्मनोऽहङ्कर्तृत्वम् · इत्येतद् भगवतो भाष्यकारस्य मतमिति कुत आधारादवसितं टीकाकारेण ? – इति चित्रीयतेऽस्मन्मनः ॥

## अव्याकृतम् नामरूपादिशब्दवाच्यम् अविद्याविलक्षणमिति भाष्यमतम्

३०. अव्याकृतादिशब्दवाच्यम् अविद्यात्वेन न केवलम् न कचिदपि व्यवहृतम्, प्रत्युताविद्याकल्पितमेव तदिति स्पष्टोक्तिरपि दरीदृश्यते भाष्ये । तत्र कतिचिदेव वाक्यानि पाठकानां संज्ञार्थमुदाहरिष्यामः –

(१) किं पुनस्तत् कर्म यत् प्रागुत्पत्तेरीश्वरज्ञानस्य विषयो भवतीति ? तत्त्वान्यत्वाभ्याम् अनिर्वचनीये नामरूपे अव्याकृते – व्याचिकीर्षिते इति ब्रूमः ॥ १-१-५, पा. २७.

[ टीकायामिव 'नामरूपम्' इति न समाहारवाचकेन शब्देन व्यपदिष्टात्र जगतो बीजावस्था, नापि ते नामरूपे अनिर्वचनीयाविद्यात्वेन निर्दिष्टे ; कथं तर्हि, ईश्वरत्वतदन्यत्वाभ्याम् अनिर्वचनीये इति ॥ ]

(२) अक्षरम् अव्याकृतं नामरूपबीजशक्तिरूपं भूतसूक्ष्मं ईश्वराश्रयम् तस्यैवोपाधिभूतम् सर्वस्माद् विकारात् परो योऽविकारः, तस्मात् परतः परः – इति भेदेन व्यपदेशात् परमात्मानम् इह विवक्षितं दर्शयति । नात्र प्रधानं नाम किञ्चित् स्वतन्त्रं तत्त्वमभ्युपगम्य तस्माद् भेदव्यपदेश उच्यते ; किं तर्हि,

**यदि प्रधानमपि कल्प्यमानं श्रुत्यविरोधेन अव्याकृतादिशब्दवाच्यं भूतसूक्ष्मं परिकल्प्येत, परिकल्प्यताम् । तस्माद् भेदव्यपदेशात् परमेश्वरो भूतयोनिः – इत्येतदिह प्रतिपाद्यते ॥ १-२-२२, पा. ८५.**

[अत्र 'अक्षरम्', 'अव्याकृतम्', 'नामरूपबीजशक्तिरूपम्' इतीश्वरस्य उपाधित्वेन निर्दिश्यते, न तु ब्रह्मस्वरूपाच्छादनेन जीवत्वापादिकाविद्यात्वेन ॥]

(३) **नामरूपयोरपि निर्वहणं निरङ्कुशं न ब्रह्मणोऽन्यत्र संभवति ॥ १-३-४१, पा. १४२.**

(४) **परमेश्वराधीना तु इयमस्माभिः प्रागवस्था जगतः अभ्युपगम्यते, न स्वतन्त्रा । सा च अवश्याभ्युपगन्तव्या । अर्थवती हि सा । न हि तया विना परमेश्वरस्य स्रष्टृत्वं सिध्यति । शक्तिरहितस्य तस्य प्रवृत्त्यनुपपत्तेः । मुक्तानां च पुनरनुत्पत्तिः । कुतः ? विद्यया तस्या बीजशक्तेर्दाहात् । अविद्यात्मिका हि बीजशक्तिः, अव्यक्तशब्दनिर्देश्या, परमेश्वराश्रया मायामयी महासुप्तिः यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः । तदेतदव्यक्तं क्वचित् आकाशशब्दनिर्दिष्टम् । 'एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च' इति श्रुतेः । क्वचित् अक्षरशब्दोदितम्, 'अक्षरात्परतः परः' इति श्रुतेः । क्वचिन्माया इति सूचितम् ; 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इति मन्त्रवर्णात् ॥ १-४-३, पा. १४९.**

[अत्र जगतः प्रागवस्था अविद्यात्मिका – प्रथमोदाहरणरीत्या अविद्याकल्पिता – इत्युक्तम् । तस्या एव 'शक्तिः', 'बीजशक्तिः', 'अव्यक्तम्', 'आकाशः', 'अक्षरम्', 'माया' – इति च विविधशब्दैर्निर्देशः । तस्यामेव 'महासुप्ति'संज्ञिकायां जीवाः स्वरूपबोधरहिताः शेरते इत्युक्तम् । तां तु परं परमेश्वराश्रयामेव मन्यते आचार्यः, न तु तत्स्वरूपाच्छादिकां यथा मन्यते टीकाकारः । जीवानां प्रलये स्वरूपप्रतिबोधराहित्यं तु अविद्यायाः – अध्यासमिथ्याज्ञानाद्यपराभिख्यायाः – विद्यया अविनाशितत्वात् ; यथा ते सुषुप्तौ सति संपद्यापि न विदुरेवम्, इत्यन्यदेतत् । सर्वथापि तु अत्र अविद्याशक्तेः संस्कारमात्रशेषत्वम्, मायाभिधानीयकत्वं वा न परामृश्यत इत्यवधेयमेतत् ॥]

(५) **अव्यक्ता हि सा माया, तत्त्वान्यत्वनिरूपणस्य अशक्यत्वात् ॥ १-४-३, पा. १४९.**

[माया परमेश्वरत्वतदन्यत्वाभ्याम् अनिर्वचनीया इत्युक्तमत्र ॥]

(६) **तान्येवेह तेजोऽबन्नानि प्रत्यभिज्ञायन्ते । रोहितादिशब्दसामान्यात् । रोहितादीनां च शब्दानां रूपविशेषेषु मुख्यत्वात् । भाक्तत्वाच्च गुणविषयत्वस्य । असन्दिग्धेन च सन्दिग्धस्य निगमनं न्याय्यं मन्यन्ते । तथा इहापि 'ब्रह्मवादिनो वदन्ति किं कारणं ब्रह्म' (श्वे. १-१) इत्युपक्रम्य**

'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढम्' (श्वे· १-३) इति पारमेश्वर्याः शक्तेः समस्तजगद्विधायिन्या वाक्योपक्रमेऽवगमात्, वाक्यशेषेऽपि 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इति, 'यो योनिं योनिमधितिष्ठत्येकः' (श्वे· ४-१०, ११) इति च तस्या एवावगमात्, न स्वतन्त्रा काचित् प्रकृतिः प्रधानं नाम अजामन्त्रेणाम्नायत इति शक्यते वक्तुम्। प्रकरणात्तु सैव दैवी शक्तिः, अव्याकृतनामरूपा नामरूपयोः प्रागवस्था अनेनापि मन्त्रेणाम्नायत इत्युच्यते ॥ १-४-९, पा· १५६-१५७.

[अत्रापि जगतः प्रागवस्था 'शक्तिः', 'माया', 'अव्याकृतनामरूपा' इति च निर्दिश्यते, न त्वविद्याशक्तिरिति ॥]

(७) एकत्वैकान्त्यात् ईशित्रीशितव्याभावे ईश्वरकारणप्रतिज्ञाविरोधः - इति चेत्। न। अविद्यात्मकनामरूपबीजव्याकरणापेक्षत्वात् सर्वज्ञत्वस्य ॥ २-१-१४, पा· २००.

[अत्रापि नामरूपे एव (अव्याकृते) बीजम्, ते च अविद्यात्मिके इत्युक्तम्। न तु बीजमेवाविद्या इति, यथासम्मतं टीकाकारस्य ॥]

(८) सर्वज्ञस्येश्वरस्य आत्मभूते इव अविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य 'माया', 'शक्तिः', 'प्रकृतिः' - इति च श्रुतिस्मृत्योरभिलप्येते। ताभ्यामन्यः सर्वज्ञ ईश्वरः 'आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म' इति श्रुतेः। 'नामरूपे व्याकरवाणि', 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन् यदास्ते', 'एकं बीजं बहुधा यः करोति' इत्यादिश्रुतिभ्यश्च। एवम् अविद्याकृतनामरूपोपाध्यनुरोधी ईश्वरो भवति व्योमेव घटकरकाद्युपाध्यनुरोधि। स च स्वात्मभूतानेव घटाकाशस्थानीयान् अविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसङ्घातानुरोधिनो जीवाख्यान् विज्ञानात्मनः प्रतीष्टे व्यवहारविषये। तदेवम् अविद्यात्मकोपाधिपरिच्छेदापेक्षमेव ईश्वरस्येश्वरत्वं सर्वज्ञत्वं सर्वशक्तित्वं च ॥ २-१-१४, पा· २०१.

[अत्र 'नामरूपे' एव 'माया' 'शक्तिः', 'बीजम्', 'प्रकृतिः'-इति च नामान्तरेण श्रुतिस्मृतिषु अभिलप्येते इत्युक्तम्। ते च 'अविद्याकल्पिते', 'अविद्याकृते', 'अविद्याप्रत्युपस्थापिते', 'अविद्यात्मके', इति च विशेषिते। 'नामरूपम्', इति एकवचनेन व्यपदेशो वा, नामरूपमेवानादिरविद्या इति वा टीकोक्तप्रक्रियानुमतिर्न दृश्यतेऽत्र॥]

(९) अविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसङ्घातोपाध्यविवेककृता हि भ्रान्तिः हिताकरणादिलक्षणः संसारः ॥ २-१-२२, पा· २०९.

[अत्रापि नामरूपे अविद्याप्रत्युपस्थापिते इत्युक्तम् ॥]

**(१०) अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादि सर्वव्यवहारास्पदत्वं प्रतिपद्यते ॥ २-१-२७, पा. २१३.**

[अत्रापि नामरूपलक्षणो रूपभेदो ब्रह्मणः, अविद्याकल्पित इत्युक्तम् । तच्च रूपं व्याकृतम् अव्याकृतं वा अविद्याकल्पितमेव इति च । न तु अव्याकृतमेव अनादिरविद्येति ॥]

**(११) प्रतिषिद्धसर्वविशेषस्यापि ब्रह्मणः सर्वशक्तियोगः सम्भवति – इत्येतदपि अविद्याकल्पितरूपभेदोपन्यासेन उक्तमेव ॥ २-१-३१, पा. २१५.**

**(१२) एकत्वात् प्रवर्त्याभावे प्रवर्तकत्वानुपपत्तिः – इति चेत्, न । अविद्याप्रत्युपस्थापितनामरूपमायावेशवशेन असकृत् प्रत्युक्तत्वात् ॥ २-२-२, पा. २२३.**

[अत्र नामरूपे एव मायाशब्दिते, ते च अविद्याप्रत्युपस्थापिते इत्युक्तम् । न तु अविद्यैव माया इति, यथा टीकाकृदाह ॥]

अथ यान्युपनिषत्सु गीतासु च वाक्यानि अव्याकृतादिशब्दवाच्यजगत्प्रागवस्थाविषयाणि, तानि परिशिष्टे (५) प्रदर्शयिष्यन्त इत्यलमिहप्रपञ्चेन ॥

तदेवं टीकाकारपरिगणितेषु अभिधानेषु 'अविद्या', 'अग्रहणम्', 'तमः' – इत्येतानि अव्याकृतनामरूपवाचकत्वेन नैव प्रथितानि श्रुत्यन्तेषु भाष्ये वा ; मायादयस्तु शब्दाः यद्यपि जगद्बीजशक्तिवाचका इति श्रुतिभिर्भाष्यवाक्यैश्चावगम्यन्ते, तथापि सा बीजशक्तिरविद्याशक्तित्वेन नैव परिभाषिता तत्र ; अविद्याकल्पितमेव तु मायां मन्यन्ते भगवत्पादा इति बहुभिर्भाष्यवाक्योदाहरणैरादर्शितम् । तथा च अनिर्वचनीयाविद्याशक्त्युपादानकोऽहङ्काराध्यास इति, तत्सम्भेदादेव प्रत्यगात्मनो भोक्तृत्वम् इत्यस्मिन्नंशे भाष्यप्रस्थानतो भिन्नमेव टीकाप्रस्थानमिति सिद्धम् ॥

## इष्टसिद्ध्यादिग्रन्थेषु मायासतत्त्वविचारः

३१. भगवत्पादीयसिद्धान्तं व्याख्यातवद्भिराचार्यैः, अविद्यामाययोर्विषये भिन्नभिन्ना अभिप्रायाः प्रकाशिताः । ते चाभिप्रायभेदा यद्यपि वेदान्तप्रक्रियाप्रत्यभिज्ञातो विस्तरेणाधिगन्तव्याः, तथापि सङ्क्षेपेच्छूनां कृते किञ्चिदिहोच्यते –

**(१) ब्रह्मणस्तु इयमविद्याशक्तिः, मायादिशब्दवाच्या न शक्या तत्त्वेन अन्यत्वेन वा निर्वक्तुम् । इदमेवास्याः अव्यक्तत्वं यदनिर्वाच्यत्वं नाम । सोऽयमव्याकृतवादस्य प्रधानवादाद् भेदः ॥ वा. भा. पा. ३७७.**

(२) न वयं प्रधानवदविद्यां सर्वजीवेषु एकामाचक्ष्महे येनैवम् उपालभ्येमहि, किं त्वियं प्रतिजीवं भिद्यते । .... अविद्यात्वमात्रेण च एकत्वोपचारः, अव्यक्तमिति च अव्याकृतमिति च ॥ बा. भा. पा. ३७७-३७८.

[अत्र सुस्फुटमिदं यद् भामतीकारोऽपि पञ्चपादिकाकार इव अव्याकृतमेवाविद्याशक्तिशब्दवाच्यं मन्यत इति । सा प्रतिजीवं नाना इति त्वधिकं भामत्याम् ॥]

(३) माया, अविद्या, तमः, कारणम्, लयः, शक्तिः, सुप्तिः, महासुप्तिः, निद्रा, अक्षरम्, आकाशम् – इत्यादिशब्दैः 'मायां तु प्रकृतिं विद्यात्' इत्यादिश्रुतिस्मृतीतिहासपुराणादिवाक्येषु उक्ता या माया सैव महदादेः समस्तस्य जगतः प्रकृतिः – इति यदुक्तमाद्यश्लोके तदुपपन्नमेव, यतो लोकेऽपि शुक्तिरूप्यादिविभ्रमाः सविषया मायामयाः प्रदर्शिताः । तस्मात्, रूप्यादिभ्रमवत् आत्मनोऽब्रह्मताभ्रमस्यापि ज्ञानमात्रापनोद्यत्वं सिद्धम् ॥ इ. सि. पा. १४४.

[अविद्यादिशब्दैरुच्यमाना मायैव दृश्यभ्रमबीजम् इत्युक्तमत्र । टीकाकारमतसमानयोगक्षेममेतन्मतमपीति स्पष्टम् ॥]

(४) अध्यासोपादानाविद्याक्लृप्तिवत् कादाचित्कमायोपादानानिर्वचनीयानादिवस्तुकल्पना । तत्र च 'मायां तु प्रकृतिम्' इति श्रुतौ प्रकृतौ मायाशब्दप्रयोगात् प्रकृतिभूतयोर्मायाविद्ययो, तद्विकारयोश्च अध्यासमाययोः लक्षणाभेदात् एकत्वमवगम्यते ॥ पं. वि. पा. २०८.

[मायाविद्ययोरभेद इहाप्यूरीकृतः । शास्त्रव्यवहारात् वृद्धव्यवहारे चैकत्वावगमात् विक्षेपप्राधान्येन 'माया', आच्छादनप्राधान्येन 'अविद्या' इति व्यवहारभेदः (पा.२११) इत्युपपादितम्, तन्मूलत एवावगन्तव्यम् ॥]

तदेवम् मायाविद्ययोरैक्यम्, तत्र च प्रकृतिशब्दवाच्यजगद्बीजस्यैव प्राधान्यतोऽविद्याशब्दवाच्यत्वं च स्वीकृतं व्याख्यानप्रस्थाने इति सिद्धम् ॥

## अविद्याश्रयः, अविद्याविषयश्च

३२. आत्मानात्मनोरितरेतराध्यास एवाविद्या – इति भाष्यकारमतम् । तत्र कस्य किंविषया इयमविद्या ? – इत्यत्र विशिष्य चिन्ता न प्रतानिता सूत्रभाष्ये । यथाप्रसिद्धे एव तु जीवे व्यवहारदृष्ट्या सा इति तु भाष्यकारहृदयमिति गम्यते उदाहरिष्यमाणवाक्येभ्यः –

(१) मिथ्याज्ञाननिमित्तः शारीरस्योपभोगः, न तेन परमार्थरूपस्य ब्रह्मणः संस्पर्शः ॥ १-२-८, पा. ६९.

[अत्र मिथ्याज्ञानमविद्या]

(२) जीवो हि अविद्यावेशवशात्, देहाद्यात्मभावमिव गत्वा तत्कृतेन दुःखेन 'दुःख्यहम्' इत्यविद्यया कृतं दुःखोपभोगं अभिमन्यते। नैवं परमेश्वरस्य देहाद्यात्मभावो दुःखाभिमानो वा अस्ति। जीवस्यापि अविद्याकृतनामरूपनिर्वृत्तदेहेन्द्रियाद्युपाध्यविवेकभ्रमनिमित्त एव दुःखाभिमानो न तु पारमार्थिकोऽस्ति ॥ २-३-४६, पा. २९९.

[अविद्या, तदाश्रयत्वम्, तत्कृतत्वं नामरूपयोः, तन्निर्वृत्तत्वं देहेन्द्रियादीनां तादृशोपाधिविवेकविभ्रमः, तन्निमित्तो दुःखाभिमानश्च – इत्येतत् सर्वम् अविद्ययैव न पारमार्थिकम् इत्युक्तमत्र ॥]

(३) कः पुनर्देहसंबन्धः ? देहादिरयं सङ्घातोऽहमेव इत्यात्मनि विपरीतप्रत्ययोत्पत्तिः। दृष्टा च सा सर्वप्राणिनां 'अहं गच्छामि', 'अहमागच्छामि', 'अहमन्धः', 'अहमनन्धः', 'अहं मूढः', 'अहममूढः' इतीत्येवमात्मिका। न ह्यस्याः सम्यग्दर्शनादन्यत् निवारकमस्ति। प्राक्तु सम्यग्दर्शनात् प्रततैषा भ्रान्तिः सर्वजन्तुषु। तदेवम् अविद्यानिमित्तदेहाद्युपाधिसंबन्धकृताद् विशेषात्, ऐकात्म्याभ्युपगमेऽपि अनुज्ञापरिहारौ अवकल्पेते ॥ २-३-४८, पा. ३०१.

[विपरीतप्रत्ययोत्पत्तिः, भ्रान्तिः – इति चाविद्यैवोच्यते। सा च 'सर्वजन्तुषु' इति जीवाश्रिता इति च ॥ ]

(४). आभास एव चैष जीवः परस्यात्मनो जलसूर्यकादिवत् प्रतिपत्तव्यः, न स एव साक्षात्, नापि वस्त्वन्तरम्। .... आभासस्य चाविद्याकृतत्वात् तदाश्रयस्य संसारस्याविद्याकृतत्वोपपत्तिः ॥ २-३-५०, पा. ३०२.

[जीवस्याभासरूपत्वमविद्याकृतम्, परमात्मत्वं तु पारमार्थिकम् इत्युक्तमिह ॥]

(५) किं पुनर्जीवस्य ईश्वरसमानधर्मत्वं नास्त्येव ? न नास्त्येव; विद्यमानमपि तत् तिरोहितम्, अविद्यादिव्यवधानात्। .... ततो हीश्वराद् हेतोः, अस्य जीवस्य बन्धमोक्षौ भवतः। ईश्वरस्वरूपापरिज्ञानात् बन्धः, तत्स्वरूपपरिज्ञानात्तु मोक्षः ॥ ३-२-५, पा ३४७.

[जीवाश्रिताविद्यानिमित्त एव जीवेश्वरविभागबुद्धिः, बन्धमोक्षादिव्यवहारश्च इत्यर्थः ॥]

(६) सोऽपि तु जीवस्य ज्ञानैश्वर्यतिरोभावो देहयोगात् देहेन्द्रियमनोबुद्धिविषयवेदनादियोगाद् भवति। .... अस्ति चात्रोपमा यथाग्नेर्दहनप्रकाशनसंपन्नस्यापि अरणिगतस्य दहनप्रकाशने तिरोहिते भवतः, यथा वा भस्मच्छन्नस्य, एवम् अविद्याप्रत्युपस्थापितनामरूपकृतदेहाद्युपाधियोगात् तदविवेकभ्रमकृतो जीवस्य ज्ञानैश्वर्यतिरोभावः ॥ ३-२-६, पा. ३४७.

[अत्रापि पञ्चमोदाहरणवत् अविद्याश्रयत्वादिकं सर्वमनुसंधेयम् ॥]

(७) कस्य पुनरयमप्रबोधः-इति चेत् । यस्त्वं पृच्छसि तस्य ते इति वदामः । ननु अहमीश्वर एवोक्तः श्रुत्या ! यद्येवं प्रतिबुद्धोऽसि, नास्ति कस्यचिदप्यप्रबोधः ॥ ४-१-३, पा. ४६५.

एवं व्यवहारावस्थायां जीवस्याविद्या, परमार्थतस्तु नैव कस्यचित् इत्यस्मिन्नर्थे गीताभाष्योक्तयः, उपनिषद्भाष्योक्तयश्च परिशिष्टाद् (६) अधिगन्तव्याः । अत्र व्याख्यानप्रस्थानेषु विविधानि मतानि । तद्यथा टीकाकारमते एव तावत् –

(१) ननु ब्रह्मस्वरूपम् अनवभासमानम् अस्त्येव । न तदनवभासना-ऽजीवे अनवभासविपर्यासौ भवतः । न हि शुक्तेरग्रहणात् स्थाणौ अग्रहणम्, विपर्यासो वा । ननु न ब्रह्मणोऽन्यो जीवः । 'अनेन जीवेनात्मना' इति श्रुतेः । अतः तदग्रहणम् आत्मन एव तत् । एवं तर्हि सुतराम् अविद्यायास्तत्र असम्भवः । तस्य विद्यात्मकत्वात् । 'तस्य भासा सर्वमिदं विभाति' इति तच्चैतन्येनैव सर्वस्य भासमानत्वात् ॥

उच्यते । विद्यत एवात्रापि अग्रहणाविद्यात्मको दोषः प्रकाशस्याच्छादकः । कथं गम्यते ? श्रुतेः, तदर्थापत्तेश्च । श्रुतिस्तावत् 'अनृतेन हि प्रत्यूढाः', 'अनीशया शोचति मुह्यमानः' इत्येवमाद्या । तदर्थापत्तिरपि – विद्यैव सर्वत्र श्रुतिषु ब्रह्मविषया मोक्षाय निवेद्यते । तेन अर्थात् इदमवगम्यते जीवस्य ब्रह्मस्वरूपतानवगमः अविद्यात्मको बन्धः निसर्गत एवास्तीति । ननु न जीवो ब्रह्मणोऽन्य इत्युक्तम् । बाढम्, अत एवार्थात् जीवे ब्रह्मस्वरूपप्रकाशाच्छादिका अविद्या कल्प्यते । अन्यथा परमार्थतस्तत्स्वरूपत्वे तदवबोधोऽपि यदि नित्यसिद्धः स्यात् तदा तादात्म्योपदेशो व्यर्थः स्यात् । अतः अनादिसिद्धाविद्यावच्छिन्नानन्त-जीवनिर्भासास्पदम् एकरसं ब्रह्म इति श्रुतिस्मृतिन्यायकोविदैरभ्युपगन्तव्यम् ॥ पं. पा. २५६-२७४.

[उदाहृतपूर्वमिदं वाक्यम् (खं. २४) । अत्राविद्यावच्छिन्नानन्तजीवाः किमेकाविद्या-श्रयभूताः उत प्रत्येकम् अविद्या नाना-इति स्पष्टतया नोक्तम् ॥ ]

भामत्यां तु

(२) अनाद्यविद्यावच्छेदलब्धजीवभावः पर एवात्मा स्वतो भेदेनाव-भासते । तादृशानां जीवानाम् अविद्या न तु निरुपाधिनो ब्रह्मणः । न चाविद्यायां सत्यां जीवात्मविभागः, सति च जीवात्मविभागे तदाश्रया अविद्या इत्यन्योन्याश्रयमिति (इति ?) साम्प्रतम्, अनादित्वेन जीवाविद्ययोर्बीजाङ्कुर-वदनवक्लृप्तेरयोगात् ॥ बा. भा. २३५.

[बीजाङ्कुरन्यायेनानादित्वप्रतिपादनं पद्मपादिकाकारस्यापि नासम्मतम् अहङ्कर्तृता-तत्संस्कारयोः, बीजाङ्कुरयोरिव अनादेः कार्यकारणभावस्य वक्ष्यमाणत्वात् तत्संस्कारो विभ्रमहेतुर्विद्यते' (पं.पा. पा. ३५३ इत्युक्तिदर्शनात् ॥ ]

## इष्टसिद्धिकारस्त्वाह –

(३) स्वाश्रयाज्ञानजस्यापि रूप्यस्य शुक्तिसामानाधिकरण्यख्यातिः, खस्थस्येव अर्कस्य कूपे ख्यातिवन्न विरुध्यते ॥ इ. सि. पा. ५७.

[बाह्यवस्तुष्वपि तत्स्वरूपसत्तानुबन्धिनी अविद्याशक्तिरस्ति इति पञ्चपादिकोक्तम् (खं १६) न सम्मतं प्रकृतग्रन्थकारस्य ॥]

(४) जाड्यान्न कल्पितस्येष्टाविद्या प्रागुक्तहेतुभिः ।
नाजडं कल्प्यते सिद्धेर्नात एव जडाजडे ॥ इ. सि ६–४.

[जीवानां कल्पितत्वे तेषां जडत्वापत्त्या नाविद्याश्रयत्वं स्यात्, न चाचैतन्यमेव जीवो नाम कल्प्यते, नापि जडाजडरूपः – इत्यर्थः ॥]

(५) न स्याद् ब्रह्मण्यविद्या सा नेष्टा चेद् ब्रह्मणस्तदा ।
न ब्रह्मधीर्न सा मुक्त्यै तन्मोहान्न हि संसृतिः ॥ ६–५.

न चेद् ब्रह्म अज्ञम्, नाज्ञातं च तत् स्यात् तस्याविद्यानिष्टेः, अन्यस्य चेतनस्याभावात् 'नान्योऽतोऽस्ति द्रष्टा' इत्यादिश्रुतेः, दृष्टियुक्तिभ्यां च चितो भेदासिद्धेः । तदा 'ब्रह्मास्मि' इति श्रौती ब्रह्मधीर्न स्यात्, ब्रह्मणोऽज्ञत्वाज्ञातत्वाभावात् ज्ञातृत्वज्ञेयत्वासिद्धेः, अन्यस्य अज्ञस्य ज्ञातुरभावात् 'अस्मि' इति ज्ञानायोगाच्च । अतोऽभावान्न सा मुक्त्यर्था । ब्रह्माज्ञानाभावाच्च न तज्जः संसारः । न चाज्ञानतत्कार्ये मुक्त्वा अन्यद् वस्तु नाशयेत् धीः । अतोऽपि सा न मुक्त्यर्था । न चान्यतोऽपि मुक्तिः । वस्तुनोऽनाशात् आत्मवत् । अतो ज्ञानान्मुक्तिश्रुतेर्बाधः स्यात् ॥ इ. सि. पा. ३२४, ३२५.

[ब्रह्मैवाविद्याश्रयविषयभूतम् इति सोपपत्ति प्रसाधितम् अविद्याया जीवाश्रयत्वं तद्विषयत्वं चेति मतं खण्डितं च अस्मिन्प्रस्थाने ॥ ]

## विवरणे –

(६) न तावदज्ञानम् आश्रयविषयभेदापेक्षम्. किं तु एकस्मिन्नेव वस्तुनि आश्रयत्वम् आवरणं च इति कृत्यद्वयं सम्पादयति । स्वाश्रयापवरकप्रदेशे कृत्यद्वयसम्पादितमोवत्, अक्रियात्मकत्वात्, आवरणत्वाच्च । न हि तमो वस्तुद्वयापेक्षमवभासते । 'अज्ञानम्' इति च द्वयापेक्षज्ञानपर्युदासेनाभिधानात् द्वयसापेक्षवदवभासते । यथा स्थितिरगमनशब्देनाभिधीयमाना कस्य ? किंविषयम् अगमनम् ? – इति कर्मसापेक्षवद् भाति, तद्वत् । तमोवच्च स्वाश्रयावरणमज्ञानम्, स्वाश्रयैकत्वेन न विरुध्यते ॥ पं. वि. पा. २६६.

(७) नापि स्वाश्रयचित्प्रकाशेन विरुध्यते अज्ञानम् । स्वाभासकेन संवेदनेन चित्प्रकाशेन अज्ञानस्याविरुद्धत्वात् । साक्षिचैतन्यस्य चाज्ञानावभासकत्वात् । अतो न चिदाश्रयत्वविरोधः ॥ पं वि २६६–२६७.

(८) किञ्च-जन्यज्ञानेनात्मनि अवस्थात्रये अवभासमान एव स्वपरविषयाज्ञानाश्रयत्वं सर्वैरेवोपगन्तव्यम् इति नावभासमाने अज्ञानाश्रयत्वविरोधः। न च प्रकाशमात्रम् अज्ञानविरोधि, स्वज्ञानेऽभावात् । न च स्वयंप्रकाशमाने अज्ञानसंसर्गविरोधः क्वचिद् दृष्टः। विषयाणां परप्रकाश्यानामेव तत्संसर्गविरोधात् । संवेदनस्य आत्मस्वरूपत्वादेव तदाश्रयाज्ञानोपगमात् न तदुदाहरणम् ॥ पं. वि. पा. २६७-२६८.

(९) अथ ब्रह्मणः सर्वज्ञत्वविरोधात् ऐक्ये सति नाज्ञानमुपपद्यत इति, न। जीवाश्रयत्वोपगमात् । ननु, ऐक्यमुक्तम् । सत्यम् । सत्यप्यैक्ये प्रतिबिम्बात्मनि अध्यस्तश्यामत्वादेः बिम्बेऽदर्शनात् । अवदाततायाश्च अविरोधदर्शनात् । एवं सर्वज्ञत्वाविद्याश्रयत्वयोः सत्यप्यैक्ये अविरोधात् । तस्मात्, नैक्यम् अविद्याश्रयत्वेन विरुध्यते । किं तु अविद्यामेवोपपादयति इत्याह 'बाढम्, अत एवार्थात्' इति । ऐक्ये – स्वयंप्रकाशत्वे सर्वज्ञत्वे च सत्येव अनवभासदर्शनात् आच्छादिका अविद्या कल्प्यते। अन्यथा भेदजाड्यकिञ्चिज्ज्ञत्वे ग्रहणाभावमात्रमेव स्यात् । ततश्च तमोऽनृतनीहाराज्ञानावृतत्वादिशब्दा अनवभासाध्यासनिमित्तभावरूपाज्ञानप्रतिपादका बाध्येरन् इति ॥ पं. वि. २६८-२६९.

[अत्र स्वेष्टसिद्धिनिबन्धना वस्तुस्थितिरिति न्यायमनुसृत्य श्रुतेरर्थः प्रकल्प्यत इति स्पष्टम् । न हि स्वेष्टभावरूपाविद्या सर्ववादिसंप्रतिपन्ना, अद्यापि प्रसाधिता वा। श्रुत्यर्थापत्तिकल्पनं तु न युक्तमित्यवोचाम ॥ ]

संक्षेपशारीरके पुनः –

(१०) 'आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला'

इत्येकत्र – सं. शा. १-३१९.

(११) तस्माद् ब्रह्माविद्यया जीवभावं
प्राप्याऽऽसित्वा तावके तु स्वरूपे।
स्वच्चित्तेन स्पन्दितं जीवजात-
माकाशादि क्ष्मावसानं च पश्येत् ॥ २-१६२.

इति चान्यत्र कथनात् ब्रह्माश्रिताविद्यापक्ष एव कक्षीक्रियते इति वक्तव्यम् ॥

तदेवम् अविद्याया अध्यासोपपादकत्वेनैव कल्पितत्वाद् व्याख्यानेषु, स्वस्वोत्प्रेक्षानुगुणमेव केवलयुक्तिमाश्रित्य अविद्याश्रयविषयनिर्धारणं दृष्टान्तबलेनैव निरूप्यत इति न चित्रम् । अत्र पञ्चपादिका तावदत्यन्तप्राचीनत्वेनोपलभ्यमाना अविद्याशक्तिं मिथ्यार्थावभासान्यथानुपपत्तिश्रुतार्थापत्तिभ्याम्

अवश्याभ्युपगन्तव्यत्वेन प्रतिजज्ञे । तामेवानुसृत्य ततः परम् इतरव्याख्यानप्रस्थानग्रन्थेषु बहुधा विकल्पनाः प्रतानिता इति भाष्याद् विप्रकृष्टत्वं तेषामनिवार्यमापन्नम् । विमतिस्थानत्वं च सम्प्राप्तम् अविद्याया आश्रयविषयत्वमधिकृत्य इत्येतावदिह संक्षेपतो दर्शितम् ॥

## अविद्यापुरःसरत्वं व्यवहाराणाम्

३३. 'आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः' इत्यादिभाष्यं व्यवहारमात्रस्य अविद्यापूर्वकं प्रवृत्तिमाचष्टे । तत्रोपपत्तिस्तु 'कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि ?' इति प्रश्ननिर्णयव्याजेनोपन्यस्यते 'देहेन्द्रियादिषु अहंममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः' इति – इति स्थितिः । तत्र **टीकाकारमतम्** –

(१) न देहेन्द्रियादिषु अहंममाभिमानवत एव प्रमातृत्वप्रदर्शनमात्रेण तस्याध्यासात्मकता सिध्यति । तत् कस्य हेतोः ? लोके शुक्तिरजतद्विचन्द्रादिवदध्यासानुभवाभावात् । बाधे हि सति स भवति ; नेह स विद्यते । तस्मात्, अध्यासस्य लक्षणमभिधाय तल्लक्षणव्यासस्य सद्भावः कथनीयः ॥ पं. पा. १३८-१४१.

व्याख्यातं चेदं **विवरणकृता** –

(२) तत्र द्रष्टुरन्यस्य दृश्येनान्यात्मना अवभासो विद्यते इत्येतावति प्रमाणं वक्ष्यते । न तस्याविद्याभ्रान्त्यध्यासमिथ्यात्वे ; अतः तत् प्रमाणेन न सिध्यतीति परिहरति–'उच्यते–न देहेन्द्रियादिषु' इत्यादिना ॥ पं. वि. पा. १३९.

(३) बाधानुपपत्तिर्मिथ्यात्वे प्रमाणम् ; प्रत्यक्षानुमानव्यवहारानुपपत्त्यागमा आत्मन्यनात्मावभासे प्रमाणम् इति भावः ॥ पं. वि. १४१.

तत्सम्भावनापि कथनीया – इत्यत्रोपपत्तिमाह **टीकाकृत्** –

(४) विषयविशेषस्तु प्रयत्नेनान्विच्छद्भिरपि अनुपलभ्यमानकारणदोषे विज्ञाने अवभासमानोऽपि पूर्वप्रवृत्तेन सकललोकव्यापिना निश्चितेन प्रमाणेन असम्भाव्यमानतया अपोद्यमानो दृश्यते । तद्यथा औत्पातिकः सवितरि सुषिः । यथा वा माहेन्द्रजालकुशलेन, प्रासादादेर्निगरणम् । एवं अविषये असङ्गे, केनचिदपि गुणादिना अध्यासहेतुना रहिते निष्कलङ्कचैतन्यतया अन्यगतस्यापि

अध्यासस्य अपनोदनसमर्थे अध्यासावगमः, अविभाव्यमानकारणदोषो विभ्रम इत्याशङ्क्येत, तन्मा शङ्कि इति सद्भावातिरेकेण सम्भवोऽपि पृथक् कथनीयः ॥ पं. पा. १४३-१४५.

इति । तत्सद्भावाक्षेपत्वेनाभिमतं तु भाष्यम् एवं व्याचष्टे –

(५) बाढम्, उक्तलक्षणा अविद्या प्रत्यग्दृश्यपि सम्भवेत्, नैतावता तत्सद्भावः सिध्यति ; तेन निदर्शनीयः सः । प्रमातारमाश्रयन्ति प्रमाणानि ; तेन प्रमाता प्रमाणानामाश्रयः, नाविद्यावान् । अनुपयोगात्, इत्यभिप्रायः । अथवा कथमविद्यावद्विषयाणि प्रत्यक्षादीनि शास्त्राणि च प्रमाणानि ? – इति संबन्धः । अविद्यावद्विषयत्वे सति आश्रयदोषानुगमात् अप्रमाणान्येव स्युः – इत्याक्षेपः ॥ पं. पा. ४२८-४३१.

इति ॥

अत्र यद्यपि लक्षणेन सम्भाविते एव वस्तुनि तत्सद्भावोपपादनं युक्तमिति सर्वसम्मतम् – अन्यथा अनिर्धारितस्वरूपे, विचारारम्भे एवासम्भावनाकलङ्किते तत्सद्भावकथनम् अस्थाने एव स्यादिति – तथापि प्रकृते विषये ‘अविभाव्यमानकारणदोषत्वात् यथोक्तलक्षणाध्याससद्भावोपपादकं भाष्यम् अध्यासं साधयितुं नालम्’ इति तु न मर्षणीयम् । एवम्, प्रमाणव्यवहारसामान्यस्य अविद्यापुरःसरत्वमुपपादयितुं तान्येव विवादपदाध्यासीनानि प्रत्यक्षादीनि तत्र प्रमाणत्वेनोदाहरति भाष्यकृत् इत्यसमीक्षितकारित्वारोपणं व्याख्यातॄणां भगवति नतरां मर्षणीयम् । प्रमाणानां प्रमाणत्वं कथमुपपादनीयम् ? – इति तु नैव सङ्गतं प्रकृतेन भाष्येण । न हीदं प्रमाणवृत्तनिरूपणाय प्रवृत्तं शास्त्रम् न्यायमीमांसादिशास्त्रवत्, येन प्रमाणानां प्रामाण्यमप्याशङ्क्य परिह्रियेत । न चाध्यासलक्षणामविद्यां प्रमाणैः सिषाधयिषत्याऽऽचार्यः, येन प्रत्यक्षादीनि तत्र प्रमाणत्वेनोपन्यसितुमीहेत । परमप्रकृतं हीदमत्र यद् विरुद्धस्वभावयोश्चिदचितोः परस्परतादात्म्याध्यासस्तद्धर्म्याध्यासश्च युक्तिविरुद्धत्वेनासम्भाव्यमानोऽपि सर्वलोकव्यवहारसिद्धत्वात् नापह्नोतुं शक्यते–इत्यनुभवप्रदर्शनम् । तदनुसारेणैवेह सर्वप्रमाणप्रवृत्तीनामपि अविद्यापुरःसरत्वं प्रपञ्च्यत इति सर्वं समञ्जसमेव । यत्पुनरिह बाधो न दृश्यत इति, तत्तु पश्वादिप्रवृत्तिवत् प्रवृत्तिकाले तथैवेति न चित्रम् । न चाध्यासानां

क्वचिदप्यध्याससमसमये बाधो दृश्यते । विवेकिनां तत्त्वभावविवेचने प्रवृत्तानां बाध्यत एव देहेन्द्रियादिषु अहंममाभिमानः । तथा चोपपादितमत्रैव भगवता आचार्येण ' न चैतस्मिन् सर्वस्मिन्नसति असङ्गस्याऽऽत्मनः प्रमातृत्वमुपपद्यते ' इत्यादिना । प्रपञ्च्यते चेदं समन्वयसूत्रभाष्ये ' सशरीरत्वस्य मिथ्याज्ञान-निमित्तत्वात् ' इति प्रतिज्ञापूर्वकम् " न त्वात्मनो धनदानादिवच्छरीरादिभिः स्वस्वामिसंबन्धनिमित्तं किञ्चिच्छक्यं कल्पयितुम् । मिथ्याभिमानस्तु प्रत्यक्षः संबन्धहेतुः " (१-१-४, पा. २२) इत्यन्तेन – इत्यलमतिप्रपञ्चेन ॥

## अस्मत्प्रत्ययगोचरात्मनामानि

३४. कथमविषये प्रत्यगात्मनि विषयतद्धर्माणामध्यासः ? – इत्याक्षिप्य परिहारभाष्यम् ' न तावदयमेकान्तेनाविषयः, अस्मत्प्रत्ययविषयत्वात् ' इति । तदेतद् विवृण्वन्नाह टीकाकृत् –

(१) तदेवम् अहङ्कारग्रन्थिरस्मच्छब्दसंशब्दितः ; प्रत्ययश्चासौ, आदर्श इव प्रतिबिम्बस्य अनिदंचित्संवलितत्वेन तस्याभिव्यक्तिहेतुत्वात् । अतः तस्य विषयवद् भवति – इत्युपचारेण अनिदञ्चिदात्मधातुः अस्मत्प्रत्ययविषय उच्यते । स पुनरेवम्भूतो जाग्रत्स्वप्नयोरहमुल्लेखरूपेण सुषुप्ते तत्संस्काररञ्जिताग्रहणाविद्या-प्रतिबद्धप्रकाशत्वेन च गतागतमाचरन् 'संसारी', 'जीवः', 'विज्ञानघनः' 'विज्ञानात्मा', 'प्राज्ञः', 'शरीरी', 'शारीरः', 'आत्मा', 'संप्रसादः', 'पुरुषः', 'प्रत्यगात्मा', 'कर्ता', 'भोक्ता', 'क्षेत्रज्ञः' – इति च श्रुतिस्मृतिप्रवादेषु गीयते ॥ पं. पा. ४०३-४०४.

अत्र भोक्तुरस्मत्प्रत्ययगोचरत्वविषये यद् वक्तव्यं तत् प्रागेव (खं. ११, पा. ९) उक्तम् । अथेदानीं तदभिधानत्वेन अनुक्रान्तेषु अत्र तिर्यग्रेखाङ्किता-न्यधिकृत्य इयदेव वक्तव्यं यत् तानि जीवस्य असाधारणनामत्वेन श्रुतौ, भाष्ये वा नोपलभ्यन्त इति । तत्र –

(१) 'विज्ञानघन'शब्दस्तावत्

'एवं वा अर इदं महद्भूतमनन्तमपारं विज्ञानघन एव ' बृ. २-४-१२.

इति परमात्मनि श्रूयमाणो न कुत्रापि जीवे प्रयुक्तो दृश्यते ॥

(२) प्राज्ञशब्दोऽपि श्रुतिषु, सूत्रे, भाष्ये च परमात्मन्येव प्रयुक्तः न क्वचिदपि जीवे । तत्र कतिचिदुदाहरणान्यत्र समाह्रियन्ते –

(1) 'भारूपः सत्यसङ्कल्पः' इति प्राज्ञमात्मानमामनन्ति ॥ १-३-२२, पा. ११७.

[अस्मिन् सूत्रे प्राज्ञशब्दपरामर्शाभावेऽपि भाष्ये प्राज्ञशब्दोऽसकृत् परमात्मनि प्रयुक्तः ॥]

(2) अपि च ईदृग्रूपत्वं प्राज्ञस्यैवात्मनः स्मर्यते भगवद्गीतासु 'न तद्भासयते सूर्यो न शशाङ्को न पावकः । यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥' इति ॥ १-३-२३, पा. ११८.

(3) परमेश्वरोपदेशपरमेवेदं वाक्यम्, न शारीरमात्रान्वाख्यानपरम् । कस्मात्? सुषुप्तौ उत्क्रान्तौ च शारीराद् भेदेन परमेश्वरस्य व्यपदेशात् । सुषुप्तौ तावद् 'अयं पुरुषः प्राज्ञेनाऽऽत्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्' इति शारीराद् भेदेन परमेश्वरं व्यपदिशति । तत्र पुरुषः शारीरः स्यात्, तस्य वेदितृत्वात् । बाह्याभ्यन्तरवेदनप्रसङ्गे सति तत्प्रतिषेधसम्भवात् । प्राज्ञः परमेश्वरः, सर्वज्ञत्वलक्षणया प्रज्ञया नित्यम् अवियोगात् । तथा उत्क्रान्तावपि 'अयं शारीर आत्मा प्राज्ञेनाऽऽत्मनाऽन्वारूढ उत्सर्जन् याति' इति जीवाद् भेदेन परमेश्वरं व्यपदिशति । तत्रापि शारीरो जीवः स्यात् । शरीरस्वामित्वात् । प्राज्ञस्तु स एव परमेश्वरः ॥ १-३-४२, पा. १४३.

(4) 'वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥ १-४-५.

इति सूत्रम् । तत्र भाष्यम् –

प्राज्ञो हीह परमात्मा निचाय्यत्वेन निर्दिष्ट इति गम्यते ॥ पा. १५१.

(5) प्राज्ञविज्ञानाद् हि शोकविच्छेद इति वेदान्तसिद्धान्तः ॥ १-४-६, पा. १५३. [अत्रापि प्राज्ञशब्दोऽसकृत् परमात्मनि प्रयुक्तः ॥]

(6) यावद् हि अविद्या न निवर्तते तावद् धर्मादिगोचरत्वम्, जीवस्य जीवत्वं च न निवर्तते; तन्निवृत्तौ तु प्राज्ञ एव 'तत्त्वमसि' इति श्रुत्या प्रत्याय्यते ॥ १-४-६, पा. १५४.

(7) एवं उपाधिगुणसारत्वात् जीवस्य अणुत्वादिव्यपदेशः, प्राज्ञवत् । यथा प्राज्ञस्य परमात्मनः सगुणेषूपासनेषु उपाधिगुणसारत्वात् अणीयस्त्वादिव्यपदेशः ॥ २-३-२९, पा. २८७.

(8) तथा स्वप्नजागरितयोरात्मन उपाधिसंपर्ककृतं श्रमं श्येनस्येवाकाशे विपरिपततः श्रावयित्वा तदभावं सुषुप्तौ प्राज्ञेनाऽऽत्मना सम्परिष्वक्तस्य श्रावयति ॥ २-३-४०, पा. २९३.

(9) प्राज्ञस्य हीदं प्रकरणम् 'अन्यत्र धर्मादन्यत्राधर्मात्' इत्यादि। तद्विषय एव च वाक्यशेषोऽपि 'तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते। तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन' इति। प्राज्ञकर्तृका च सृष्टिस्तथ्यरूपा समधिगता जागरिताश्रया, तथा स्वप्नाश्रयापि सृष्टिर्भवितुमर्हति॥ ३-२-२, पा. ३४४.

[पूर्वपक्षानुवादकमिदं भाष्यम्। प्राज्ञशब्दप्रयोगमात्रमालक्ष्येहोदाहृतम्॥]

(10) न चास्माभिः स्वप्नेऽपि प्राज्ञव्यवहारः प्रतिषिध्यते। तस्य सर्वेश्वरत्वात् सर्वास्ववस्थासु अधिष्ठातृत्वोपपत्तेः॥ ३-२-४, पा. ३४६.

(11) सत्प्राज्ञयोश्च प्रसिद्धमेव ब्रह्मत्वम्॥ ३-२-७, पा. ३५०.

अत्र सर्वत्रापि प्राज्ञशब्दः परमात्मवाचकत्वेनैव प्रयुक्तो दृश्यते। अथ च टीकाकारो जीववाचकोऽयम् इत्युत्सर्गत्वेनैव लिखति। तत्र को हेतुः स्यात् इति तु न विज्ञायते। केचित्तु अधुनातनाः 'प्राज्ञस्तृतीयः पादः' इति माण्डूक्यवचनमपि, 'प्राज्ञः कारणबद्धस्तु' इति गौडपादवचनं दृष्ट्वा स्यात्, जीवपरमेवेति भ्राम्यन्ति; 'प्रायेणाज्ञः प्राज्ञः' इति व्युत्पत्तिमप्युपस्थापयन्ति। तदेतदतिसाहसम्। वैश्वानरशब्दसाहचर्यात्तैजसप्राज्ञशब्दयोरपि ईश्वरवाचकत्वेनैव ग्रहीतुमुचितत्वात्, तथैव भाष्यकारेण व्याख्यातत्वाच्च। अस्यामेव श्रुतौ 'एष सर्वेश्वर एष सर्वज्ञः' इत्यादिना प्राज्ञस्य सर्वेश्वरत्वादिविशेषणैर्वर्णनाच्च। अत्रैव च भाष्यकारेण प्राज्ञशब्दस्य स्पष्टतरं व्युत्पत्तिकथनाच्च –

(12) सुषुप्तोऽपि हि भूतपूर्वगत्या प्राज्ञ उच्यते। अथवा प्रज्ञप्तिमात्रम् अस्यैव असाधारणं रूपम् इति प्राज्ञः। इतरयोर्विशिष्टमपि विज्ञानमस्तीति॥ मां. भा. ५, पा. १८१.

[भूतपूर्वगत्या स एवोपाधिवशात् पूर्वमपि ज्ञानकर्ता इति कृत्वा॥]

(३) आत्मशब्दः परमात्मन्यपि प्रयुज्यते 'आत्मा वा इदमेक एवाग्र आसीत्' इत्यादिस्थलेषु॥

(४) एवं पुरुषशब्दोऽपि –'पुरुष एवेदं सर्वम्' (मुं. २-१-१०), 'य एषोऽक्षिणि पुरुषो दृश्यते' (छां. ८-७-१), 'स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयो नैनेन किञ्चनानावृतं नैनेन किञ्चनासंवृतम्' (बृ. २-५-१८)

इत्यादिश्रुतिभिः परमात्मनिर्देशदर्शनात् । 'स यत् पूर्वोऽस्मात् सर्वस्मात् सर्वान्पाप्मन औषत्तस्मात् पुरुषः' (बृ. १-४-१) इत्यत्र प्रजापतिपरत्वेनापि प्रयुक्तोऽयं शब्दः । तथा क्वचित् कार्यकारणसङ्घातपरत्वेनापि 'याज्ञवल्क्य किंज्योतिरयं पुरुषः' (बृ. ४-३-२) इत्यादिस्थलेषु ॥

(५) प्रत्यगात्मशब्दस्तु प्राधान्यतः परमात्मानमेवाऽऽह । श्रुत्यन्तेषु तथैव प्रयोगदर्शनात् । 'कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्' (का. २-१-१) इत्यादिषु । भाष्ये च –

(1) **कथं पुनः प्रत्यगात्मनि अविषये अध्यासो विषयतद्धर्माणाम् ? सर्वो हि पुरोऽवस्थिते विषये विषयान्तरमध्यस्यति, युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वं ब्रवीषि । उच्यते – न तावदयम् एकान्तेनाविषयः, अस्मत्प्रत्ययविषयत्वात्, अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः । न चायमस्ति नियमः पुरोऽवस्थिते एव विषये विषयान्तरम् अध्यसितव्यमिति । अप्रत्यक्षेऽपि हि आकाशे बालास्तलमलिनतादि अध्यस्यन्ति । एवमविरुद्धः प्रत्यगात्मन्यपि अनात्माध्यासः ॥ अध्यास, पा. २.**

[अत्र अस्मत्प्रत्ययस्यैव प्रत्यगात्मत्वमङ्गीकृत्य तस्मिन् अध्यासः कथम् ?-इत्यक्षिप्तम् । समाधाने तु प्रत्यगात्मा यद्यप्येकान्तेन विषयी भवत्येव सर्वदा, तथापि अस्मत्प्रत्ययविषयोऽपि भवतीत्युक्तम्, विषये एव विषयान्तरमध्यसितव्यमिति नियममङ्गीकृत्य । परेण तु तमङ्गीकारं परित्यज्याऽऽह – 'अपरोक्षत्वाच्च' इत्यादि ॥]

(2) **एवम् अहंप्रत्ययिनम् अशेषस्वप्रचारसाक्षिणि प्रत्यगात्मनि अध्यस्य तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेण अन्तःकरणादिषु अध्यस्यति ॥ अध्यास. पा. ४.**

[अत्र शुद्धस्यैव प्रत्यगात्मनः अन्तःकरणादिषु, शुद्धे एव च प्रत्यगात्मनि अहंप्रत्ययिनः अध्यासः प्रदर्शितः ॥ ]

(3) **'स म आत्मेति विद्यात्' इति चोपसंहारः प्रत्यगात्मपरिग्रहे साधुः, न पराचीनपरिग्रहे । 'अयमात्मा ब्रह्म सर्वानुभूः' इति च श्रुत्यन्तरम् । तस्मात् अध्यात्मसंबन्धबाहुल्यात् ब्रह्मोपदेश एवायं न देवतात्मोपदेशः ॥ १-१-२९, पा. ५९.**

(4) **ज्ञानक्रियाशक्तिद्वयाश्रययोर्बुद्धिप्राणयोः प्रत्यगात्मोपाधिभूतयोर्भेदनिर्देशोपपत्तेः । उपाधिद्वयोपहितस्य तु प्रत्यगात्मनः स्वरूपेणाभेद इत्यतः 'प्राण एव प्रज्ञात्मा' इत्येकीकरणम् अविरुद्धम् ॥ १-१-३१, पा. ६१.**

[अत्र 'अध्यात्मसंबन्धभूमा' इति सूत्रस्थं पदं प्रत्यगात्मसंबन्धबाहुल्यम् इति व्याख्यातं भाष्ये ॥ ]

## अहमध्यासः

३५. आत्मनि 'अहम्' इत्यनुभवः कथम्? – इति जिज्ञासामारभ्य 'तदेवं नायं नीलादिप्रत्ययादन्य एव आत्मविषयोऽहंप्रत्ययः'[1] नापि विषयानुभवादेव अहमुल्लेखः' (पं. पा. ३२६) इति पक्षान्तरनिशातनपूर्वकम् भाष्यकारमतत्वेनोपन्यस्तमिदं **पञ्चपादिकाकारेण** –

(१) स च (अनाद्यविद्या)परिणामविशेषः, अनिदञ्चिदात्मनो बुद्ध्या निष्कृष्य वेदान्तवादिभिः 'अन्तःकरणम्', 'मनः', 'बुद्धिः', 'अहंप्रत्ययी' इति च विज्ञानशक्तिविशेषमाश्रित्य व्यपदिश्यते, परिस्पन्दशक्त्या च 'प्राणः' इति। तेन अन्तःकरणोपरागनिमित्तं मिथ्यैव अहङ्कर्तृत्वमात्मनः, स्फटिकमणेरिव उपधाननिमित्तो लोहितिमा ॥ पं. पा. ३३०–३३३.

इति ॥

अहङ्काराध्याससम्भावनार्थं च लिखितमस्ति तेनैव स्थलान्तरे –

(२) तदेवं स्वयंज्योतिष एव सतो जीवस्य कार्यकरणसङ्घातव्यतिरिक्ततायास्तथाऽनवभासदर्शनात् 'मनुष्योऽहम्' इति चाध्यासोपलब्धेर्ब्रह्मात्मैकत्वस्यापि तत्स्वरूपस्यानवभासनं पूर्वकालकोटिरहितप्रकाशाच्छादितमोनिमित्तं श्रुतितदर्थापत्तिसमर्पितं तन्निमित्ताहङ्काराध्यासश्च सम्भाव्यते। अनादित्वाच्च पूर्वदृष्टत्वं स्मृतिरूपत्वं च। पृथग्भोक्तृविषयानुभवफलाभावात्, भोक्तृचैतन्यसंवलितैकानुभवफलत्वाच्च परत्र परावभासस्य अन्योन्यसंभेदस्य विद्यमानत्वात् अध्यासलक्षणव्याप्तिरिहापि उपपद्यते ॥ पं. पा. २८२–२८३.

तत्र अहङ्कारपरिणामोपादानभूता अनाद्यविद्या भाष्ये कुत्रापि न परामृष्टा – इति पूर्वमेवावेदितम्। कर्तृत्वभोक्तृत्वयोस्तु भाष्ये न कुत्रापि अविद्यापरिणामविशेषोपरागनिमित्तत्वमङ्गीक्रियते। एवं हि भाष्यवचनानि –

(1) तेनैव हि अहङ्कर्त्रा अहम्प्रत्ययविषयेण प्रत्ययिना सर्वाः क्रिया निर्वर्त्यन्ते। तत्फलं च स एवाश्नाति 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' इति मन्त्रवर्णात्। 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इति च ॥ १-१-४, पा. १७–१८.

[ शरीराद्यध्यासनिमित्तमेव भोक्तृत्वमित्युक्तमत्र ॥ ]

---

1. अहंप्रत्ययविषये विचारः पूर्वमेव (खं. ११, १२, पा. ९–१२) गतः ॥

(2) नित्यशुद्धबुद्धमुक्तस्वभावे कूटस्थनित्ये एकस्मिन् असङ्गे परमात्मनि तद्विपरीतं जैवं रूपं व्योम्नीव तलमलादि परिकल्पितम्। तदात्मैकत्वप्रतिपादनपरैर्वाक्यैर्न्यायोपेतैर्द्वैतवादप्रतिषेधैश्च अपनेष्यामि – इति परमात्मनो जीवादन्यत्वं द्रढयति। जीवस्य तु न परस्मादन्यत्वं प्रतिपिपादयिषति, किं तु अनुवदत्येव अविद्याकल्पितं लोकप्रसिद्धं जीवभेदम्। एवं हि स्वाभाविककर्तृत्वभोक्तृत्वानुवादेन प्रवृत्ताः कर्मविधयो न विरुध्यन्त इति मन्यते॥ १-३-१९, पा. ११५.

[ 'नैसर्गिकोऽयं लोकव्यवहारः' इति यत् प्रतिज्ञातमध्यासभाष्ये, तदेवात्रानूदितम्, न तु कर्तृत्वमविद्यापरिणामविशेषनिमित्तमित्युक्तम्। तेन अहमिति प्रत्ययस्तु स्वाभाविक एव लोकसिद्ध इत्युक्तं भवति॥]

(3) मिथ्याज्ञानपुरःसरोऽयमात्मनो बुद्ध्युपाधिसंबन्धः॥ २-३-३०, पा २८८.

[आध्यासिक एव संबन्ध इत्युक्तमत्र। न पुनरविद्यापरिणामविशेषोपरागनिमित्तोऽध्यास इति॥]

(4) तच्च, आत्मन उपाधिभूतम् अन्तःकरणम् 'मनः', 'बुद्धिः', 'विज्ञानम्', 'चित्तम्' – इति च अनेकधा तत्र तत्राभिलप्यते। क्वचिच्च वृत्तिविभागेन संशयादिवृत्तिकं 'मनः' इत्युच्यते, निश्चयादिवृत्तिकं 'बुद्धिः' इति। तच्चैवंभूतम् अन्तःकरणम् अवश्यमस्तीत्यभ्युपगन्तव्यम्। अन्यथा हि, अनभ्युपगम्यमाने तस्मिन् नित्योपलब्ध्यनुपलब्धिप्रसङ्गः स्यात्॥ २-३-३२, पा. २८९.

[अत्रापि अन्तःकरणसत्त्वं स्वतन्त्रमेव प्रसाधितम्, न तु अविद्यापरिणामविशेषत्वेन॥]

(5) न हि विवेकिनां परस्मादन्यो जीवो नाम कर्ता भोक्ता वा विद्यते। 'नान्योऽतोऽस्ति द्रष्टा' इत्यादिश्रवणात्। पर एव तर्हि संसारी कर्ता भोक्ता च प्रसज्येत। परस्मादन्यश्चेत् चितिमान् जीवः कर्ता बुद्ध्यादिसङ्घातव्यतिरिक्तो न स्यात्। न। अविद्याप्रत्युपस्थापितत्वात् कर्तृत्वभोक्तृत्वयोः॥ २-३-४०, पा. २९२.

[अविद्या चात्राध्यास एव। स्थलान्तरे तथा स्पष्टमभिहितत्वात्॥]

## अहमध्यासे दृष्टान्तः

३६. यथोक्तान्तःकरणोपरागनिमित्तत्वम् अहङ्कारस्य निदर्शयितुं स्फटिकादिदृष्टान्ता आनीताष्टीकायाम् –

(१) तदेवं स्फटिकमणौ उपधानोपराग इव चिदात्मन्यपि अहङ्कारोपरागः । ततः सम्भिन्नोभयरूपत्वाद् ग्रन्थिरिव भवतीति अहङ्कारो 'ग्रन्थिः' इति गीयते । तत्र जडरूपत्वात् उपरक्तस्य न तद्बलादुपरागस्य साक्षाद्भावः, चिद्रूपस्य पुनरुपरागः तद्विषयव्यापारविरहिणोऽपि तद्बलात् प्रकाशते । तेन लक्षणत इदमंशः कथ्यते, न व्यवहारतः ॥ पं. पा. ३३५–३३७.

नैवम् अहङ्कारग्रन्थिर्वर्णिता भाष्ये कुत्रचित् । जीवस्य शरीरात् समुत्थानं स्वरूपेणाभिनिष्पत्तिश्च विवेकमात्रात् इत्यस्मिन्नर्थे स्फटिकदृष्टान्त उपात्तः –

(1) यथा शुद्धस्य स्फटिकस्य स्वाच्छ्यं शौक्ल्यं च स्वरूपं प्राग् विवेकग्रहणात् रक्तनीलाद्युपाधिभिरविविक्तमिव भवति, प्रमाणजनितविवेकग्रहणात्तु पराचीनः स्फटिकः स्वाच्छ्येन शौक्ल्येन च स्वेन रूपेणाभिनिष्पद्यत इत्युच्यते प्रागपि तथैव सन् ; तथा देहाद्युपाध्यविविक्तस्यैव सतो जीवस्य श्रुतिकृतं विवेकविज्ञानं शरीरात् समुत्थानम्, विवेकविज्ञानफलं स्वरूपेणाभिनिष्पत्तिः केवलात्मस्वरूपावगतिः । तथा विवेकाविवेकमात्रेणैव आत्मनोऽशरीरत्वं सशरीरत्वं च । मन्त्रवर्णात् 'अशरीरं शरीरेषु (का.)' इति, 'शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते' (गी) इति च सशरीरत्वाशरीरत्वविशेषाभावस्मरणात् ॥ १–३–१९, पा. ११३.

(२) यत् पुनर्दर्पणजलादिषु मुखचन्द्रादिप्रतिबिम्बोदाहरणम्, तदहङ्कर्तुरनिदमंशो (इदमंशो ?) बिम्बादिव प्रतिबिम्बं न ब्रह्मणो वस्त्वन्तरम्, किं तु तदेव तत् । पृथगवभासविपर्ययस्वरूपतामात्रं मिथ्या – इति दर्शयितुम् ॥ पं. पा. ३३८.

इति टीका । भाष्ये तु –

(2) आभास एव चैष जीवः परस्याऽऽत्मनो जलसूर्यकादिवत् प्रतिपत्तव्यः ; न स एव साक्षात्, नापि वस्त्वन्तरम् । अतश्च यथा नैकस्मिन् जलसूर्यके कम्पमाने जलसूर्यकान्तरं कम्पते, एवं नैकस्मिन् जीवे कर्मफलसंबन्धिनि जीवान्तरस्य तत्संबन्धः । एवमपि अव्यतिकर एव कर्मफलयोः । आभासस्य च अविद्याकृतत्वात्, तदाश्रयस्य संसारस्य अविद्याकृतत्वोपपत्तिरिति तद्व्युदासेन च पारमार्थिकस्य ब्रह्मात्मभावस्योपदेशोपपत्तिः ॥ २–३–५०, पा. ३०२.

इति तत्त्वान्यत्वाभ्यामनिर्वचनीयत्वमेव बिम्बात् प्रतिबिम्बस्य स्वीकृतम् । टीकायां बिम्बप्रतिबिम्बयोरैक्यावधारणात्, भाष्यविरोधेन यथावभासमानजीवस्य ब्रह्मस्वरूपतैवाङ्गीकरणीया जाता ॥

(३) ननु 'तत्त्वमसि' वाक्याद् बाधो दृश्यते। मैवम्। 'तत् त्वम्' इति बिम्बस्थानीयब्रह्मस्वरूपता प्रतिबिम्बस्थानीयस्य जीवस्य उपदिश्यते। अन्यथा न 'तत्त्वमसि' इति स्यात्, 'न त्वमसि' इति भवेत्; 'न रजतमस्ति' इतिवत्। किञ्च, शास्त्रीयोऽपि व्यवहारः प्रतिबिम्बस्य पारमार्थिकमिव बिम्बैकरूपत्वं दर्शयति। 'नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन। नोपरक्तं न वारिस्थं न मध्यं नभसो गतम्' इति। यस्तु मन्यते न पराक्प्रवण प्रवृत्तनायनरश्मिभिर्बिम्बमेव भिन्नदेशस्थं गृह्यते, किं तु दर्पणप्रतिस्फालितैः परावृत्य प्रत्यङ्मुखैः स्वदेशस्थमेव बिम्बं गृह्यते, – इति, तमनुभव एव निराकरोतीति न पराक्रम्यते॥ पं. पा. ३४२–३४३.

[अत्र 'आभासस्याविद्याकृतत्वात्, तदाश्रयस्य संसारस्य अविद्याकृतत्वोपपत्तिरिति तन्निरासेन च पारमार्थिकब्रह्मभावस्योपपत्तिः' (२–३–५, पा. ३०२) इति सूत्रभाष्येण विरोधः स्फुटः। तत्त्वमसिवाक्याभिप्रायम् उत्तरत्र विचारयिष्यामः, तत्र बाधो दृश्यते न वा – इत्येतन्निर्धारणार्थम्॥

भामत्यां तु – 'एवं विज्ञातृपुरुषाभिमुखेषु आदर्शोदकादिषु स्वच्छेषु चाक्षुषं तेजो लग्नमपि बलीयसा सौर्येण तेजसा प्रतिस्रोतः प्रवर्तितं मुखसंयुक्तं मुखं ग्राहयत् (!) दोषवशात् तद्देशताम् अनभिमुखतां च मुखस्याग्राहयत्, पूर्वदृष्टाभिमुखादर्शोदकदेशताम् आभिमुख्यं च मुखस्य आरोपयति इति प्रतिबिम्बविभ्रमोऽपि लक्षितो भवति (वा. भा. पा. २१) इति वर्णितम्॥]

(४) ननु तत्र विभ्राम्यतो विभ्रमहेतुर्दर्पणालक्तकादिपरमार्थवस्तु संनिहितमस्ति; न तथा इह किञ्चित् सर्वत्रैव चिद्रिलक्षणे विभ्रमविलासाभिमानिनः – इति मा भूदाशङ्का इति रज्जुसर्पमुदाहरन्ति। ननु तत्रापि यदि नाम इदानीम् असंनिहितः सर्पः, तथापि पूर्वनिर्वृत्ततदनुभवसंस्कारः समस्त्येव। बाढम्, इहापि अहङ्कृतितत्संस्कारयोः, बीजाङ्कुरयोरिव अनादेः कार्यकारणभावस्य वक्ष्यमाणत्वात् तत्संस्कारो विभ्रमहेतुर्विद्यते॥ पं. पा. ३४९–३५३.

[अत्रानाद्यध्यासलक्षणविभ्रमेऽपि हेतुगवेषणप्रयासः स्फुटः। अनेन विचारक्रमेण 'संसारो नाम विभ्रममात्रं तत्त्वज्ञानबाध्यम्' इति सिद्धान्तः कार्यकारणभावविचारानयनेन कदर्थित इति नालोचितम्॥]

(५) तत्र यद्यप्यनिर्वचनीयतयैव अरुणादिना स्फटिकादेः सावयवत्वेन सम्भेदयोग्यस्यापि असम्भेदावभासः सिद्धः, तथापि तदासक्तीव स्फटिकप्रतिबिम्बम् उत्प्रेक्षते; रज्ज्वां पुनः सर्पबुद्धिरेव न तत्सम्भिन्नत्वम् असम्भिन्नत्वं वा तस्याम्। तेन 'असङ्गो न हि सज्जते', 'असङ्गो ह्ययं पुरुषः' इत्यादिश्रुतिसमर्पिता असङ्गता आत्मनो न स्पष्टं दर्शिता इति तदर्थं घटाकाशोदाहरणम्।

**तत्र हि तत्परामर्शात् ऋते न भेदरूपकार्यसमाख्याः स्वगता दृश्यन्ते ॥ पं. पा. ३५३-३५४.**

[ 'अनिर्वचनीयतया अरुणादेरसम्भेदावभासः सिद्ध इत्यन्वयः' इति विवरणम् । तत्रारुणादेरनिर्वचनीयत्वं भाष्ये कुत्रापि नोक्तम् ॥ ]

(५) **एतच्च सर्वं उदाहरणजातं श्रुतितन्न्यायानुभवसिद्धस्य तदसम्भावनापरिहाराय बुद्धिसाम्यार्थं च, न वस्तुन एव साक्षात्सिद्धये ॥ पं. पा. ३५४.**

[अत्र दृष्टान्तैरसंभावना परिह्रियते इति स्वाभिप्रायेण ; बुद्धिसाम्यार्थम् इति तु सर्वसम्प्रतिपन्नम् । न हि प्रत्युदाहरणविशेषेण असंभावनापि न दृढीकृता भवेदिति ॥ ]

अत्र सर्वत्रापि **विवरणे** दृष्टान्ताना वेदान्तविहितत्वम् अभ्यासेनोच्यते –

(अ) **यदि स्फटिकोदाहरणेनैव आत्मन्यनात्माध्यासः सिद्धः, न तर्हि दर्पणजलाद्युदाहरणेन वेदान्तविहितेन कृत्यम् ॥ पं. वि. पा. ३३८.**

(आ) **अहङ्कारोपाधिनिमित्तो जीवब्रह्मविभागोऽनात्माध्यासश्च दृष्टान्तद्वयेन सिद्धः, तत्र किं रज्जुसर्पोदाहरणेन वेदान्तविहितेन ? पं. वि. पा. ३५२.**

(इ) **आत्मनि सोपाधिकस्य निरुपाधिकस्य चाध्यासस्य उदाहरणत्रयेणैव सिद्धत्वात्, न घटाकाशेदाहरणेन वेदान्तविहितेन कृत्यमस्ति ॥ पं. वि. पा. ३५३.**

इत्यध्यासदृष्टान्तगताशङ्कासमुद्भावने । तत्र किं नामेदम् 'वेदान्तविहितत्वम्' ? – इति न विज्ञायते । न ह्येतादृशा दृष्टान्ताः कचिदप्युपनिषदि दृष्टचराः । यत्रापि हि शास्त्रप्रणीतो दृष्टान्तः, तत्रापि तस्य प्रयोजनमात्रं दर्शयितव्यं परीक्षकैः । यथाऽऽह भगवान् **भाष्यकारः** सूर्यकादिदृष्टान्तप्रयोजनचिन्तावसरे –

(3) **न हि दृष्टान्तदार्ष्टान्तिकयोः कचित् कञ्चिद्विवक्षितांशं मुक्त्वा सर्वसारूप्यं केनचिद् दर्शयितुं शक्यते । सर्वसारूप्ये हि दृष्टान्तदार्ष्टान्तिकभावोच्छेद एव स्यात् । न चेदं स्वमनीषया जलसूर्यकादिदृष्टान्तप्रणयनम् । शास्त्रप्रणीतस्य त्वस्य प्रयोजनमात्रमुपन्यस्यते ॥ ३-२-२०, पा. ३५९.**

इति । भाष्ये बहुत्र ब्रह्मणि जीवत्वभ्रान्तिं विशदयितुमेव दृष्टान्ता आनीताः । तद्यथा, –

(4) **'एवं परमार्थतोऽविकृतमेकरूपमपि सद्ब्रह्म देहाद्युपाध्यन्तर्भावाद् भजत इवोपाधिधर्मान् वृद्धिह्रासादीन् ॥ ३-२-२०, पा. ३५९.**

[ इदं सूर्यकदृष्टान्तविशदीकरणम् ]

(5) यावद् हि अविद्या न निवर्तते तावद् धर्मादिगोचरत्वं जीवस्य जीवत्वं च न निवर्तते । तन्निवृत्तौ तु प्राज्ञ एव 'तत्त्वमसि' इति श्रुत्या प्रत्याय्यते । न चाविद्यावत्त्वे तदपगमे च वस्तुनः कश्चिद् विशेषोऽस्ति । यथा कश्चित् संतमसे पतितां काञ्चिद् रज्जुमहिं मन्यमानो भीतो वेपमानः पलायते, तं च अपरो ब्रूयात् 'मा भैषीः, नायम् अही रज्जुरेव' इति । स च तदुपश्रुत्य अहिकृतं भयम् उत्सृजेत् वेपथुं पलायनं च । न तु अहिबुद्धिकाले तदपगमकाले च वस्तुनः कश्चिद् विशेषः स्यात् । तथैवैतदपि द्रष्टव्यम् ॥ १-४-६, भा. १५४.

[ इदं सर्पदृष्टान्तप्रयोजनवर्णनम् ॥ ]

(6) सत्यम्, नेश्वरादन्यः संसारी । तथापि देहादिसङ्घातोपाधिसंबन्ध इष्यत एव, घटकरकगिरिगुहाद्युपाधिसंबन्ध इव व्योम्नः । तत्कृतश्च शब्दप्रत्ययव्यवहारो लोकस्य दृष्टः घटच्छिद्रम्, 'करकादिच्छिद्रम्' इत्यादिः आकाशाव्यतिरेकेऽपि । तत्कृता च आकाशे घटाकाशादिभेदमिथ्याबुद्धिः दृष्टा । तथा इह देहादिसङ्घातोपाधिसम्बन्धाविवेककृता ईश्वरसंसारिभेदमिथ्याबुद्धिः ॥ १-१-५, पा. २८.

[ इदमाकाशदृष्टान्ते विवक्षितांशसमर्पणम् ॥ ]

टीकायां तु अन्तःकरणोपरागनिमित्तमहङ्कर्तृत्वम् – इत्युपक्रम्य तत्र स्फटिकादिदृष्टान्ता आनीयन्ते । स्फटिके जपाभानोपरागः कथमुपजायते, बिम्बात् प्रतिबिम्बं नान्यत् किं तु तदेव, रज्जुसर्पाध्यासे पूर्वनिर्वृत्ततदनुभवसंस्कारः समस्त्येव – इत्याद्युपपादकहेतून्यनायासः परिगृह्यत इति विशेषः ॥

विवरणे च दृष्टान्तानां वेदान्तविहितत्वं तत्र तत्राभिधाय

(7) ननु घटाकाशवदुपाध्यवच्छिन्नो जीवः किं न स्यात् ? न । सामान्यविशेषाभ्याम् उपाधिभिरण्डान्तर्वर्तिब्रह्मणः सर्वात्मना जीवभावेनावच्छिन्नत्वात् अनवच्छिन्नस्य ब्रह्मणोऽण्डाद् बहिरेव सद्भावप्रसङ्गात् । तत्र सर्वगतत्वसर्वनियन्तृत्वादि ब्रह्मणो न स्यात् । अवच्छिन्नप्रदेशेषु अनवच्छिन्नस्य द्विगुणीकृत्य वृत्त्ययोगात् । स्वरूपापेक्षया तत् सर्वम् । न बहिः स्थित ब्रह्मापेक्षया – इति चेत् । न । 'यो विज्ञाने तिष्ठन्' इत्यादौ जीवव्यतिरिक्तस्यैव ब्रह्मणो जीवसंनिधानेन विकारान्तरवस्थानश्रवणात् । प्रतिबिम्बपक्षे तु जलगतस्वाभाविकाकाशे सत्येव प्रतिबिम्बाकाशदर्शनात् एकत्रैव द्विगुणीकृत्य वृत्त्युपपत्तेः, जीवावच्छेदेषु ब्रह्मणोऽपि नियन्तृत्वादिरूपेणावस्थानम् उपपद्यत इति प्रतिबिम्बपक्ष एव श्रेयानिति ॥ पं. वि. पा. १४८.

इति घटाकाशदृष्टान्तवादिनां पक्षे दोषजालं वितानयन् दृष्टान्तानामेव वस्तुसिद्धिकर्तृत्वमनुजानाति इत्यपि भाति। घटाकाशदृष्टान्तमेव तु जीवेश्वर-भेदभ्रान्तिविषये पदे पदे (१-१-५, पा. २८; १-१-१७, पा. ३९; १-२-६, पा. ६७; १-३-७, पा. ९७; २-१-१४, पा. २०१; २-१-२२, पा. २०९; २-३-४६, पा. २९९; ४-४-१४, पा. ५०२) समुदाहरन्तं भगवन्तं भाष्यकारं वेदान्तसम्प्रदायविदश्च गौडपादाचार्यान् (गौ. का. ३-३, ४, ५, ६, ७, ८, ९, ११, १२) समुपेक्षमाणः कं लाभमुत्पश्यतीति न विज्ञायते ॥

## अविषये प्रत्यगात्मन्यध्यासः

३७. अविषये प्रत्यगात्मन्यध्यासः कथं विषयतद्धर्माणाम्? इत्याक्षिप्य प्रतिसमाधातुं भाष्यम् 'न तावदयमेकान्तेनाविषयः। अस्मत्प्रत्ययविषयत्वात्। अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः' इति। तत्र अस्मत्प्रत्ययविषयत्वं नाम अहङ्कारे व्यवहारयोग्यत्वम् इति टीकाकाराभिप्रायः प्रागेव (खं. ११, पा. ९) अनूद्य विमृष्टः। 'अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः' इति भाष्यभागव्याख्यानस्य तु विमर्शनम् अवशिष्यते। तत्र टीकाकारस्तावत् स्वीयां पूर्वहेतुव्याख्याम् उपसंहृत्य द्वितीयं हेतुमित्थं व्याचष्टे –

(१) तदेवम् अहङ्कारग्रन्थिः, अस्मच्छब्दसंशब्दितः; प्रत्ययश्चासौ आदर्श इव प्रतिबिम्बस्यानिदंचिद्संवलितत्वेन तस्याभिव्यक्तिहेतुत्वात्। अतस्तस्य विषयवत् भवति-इत्युपचारेण अनिदंचिदात्मधातुः अस्मत्प्रत्ययविषय उच्यते ॥ ........ (इति प्रथमहेतुव्याख्योपसंहारः ॥)

किञ्च न केवलम् अस्मत्प्रत्ययविषयत्वात् अध्यासार्हः, 'अपरोक्षत्वाच्च। तत्साधनार्थमाह – 'प्रत्यगात्मप्रसिद्धेः' इति। न हि आत्मनि अप्रसिद्धे स्वपर-संवेद्ययोर्विशेषः। न च संवेद्यज्ञानेनैव तत्सिद्धिः; अकर्मकारकत्वात्, अतिप्रसङ्गात्। न च ज्ञानान्तरेण; भिन्नकालत्वे संवेद्यसंबन्धानवगमात्। स्वपरसंवेद्याविशेषात्। न हि एककालं विरुद्धविषयद्वयग्राहिज्ञानद्वयोत्पादः। न हि देवदत्तस्य अग्रपृष्ठदेशस्थितार्थव्यापिगमनक्रियाद्वयावेशो युगपद् दृश्यते। आह-मा भूच्चलनात्मकं क्रियाद्वयं युगपत्; परिणामात्मकं तु भवत्येव। मैवम्, परिस्पन्दात्मकमपि भवत्यविरुद्धम्। यथा गायन् गच्छतीति। परिणामात्मक-

मपि न (?) भवति विरुद्धम्; यथा यौवनं स्थाविरहेतुः। तस्मात्, स्वयंप्रसिद्धः सर्वस्य हानोपादानावधिः स्वयमहेयोऽनुपादेयः स्वमहिम्नैव अपरोक्षत्वादध्यास-योग्यः .... ॥ पं. पा. ४०३-४०८.

अत्यन्तचित्रमेतद् यदत्र आपरोक्ष्यम् अध्यासे हेतूक्रियते, स एव च हेतुः 'प्रत्यगात्मप्रसिद्धेः' इत्यनेन सिषाधयिषित इति। न हि वस्तुन आपरोक्ष्यं भवति अथ च तस्य साधने हेतुराकाङ्क्ष्यते – इत्युक्तिः शोभते। आपरोक्ष्यमेव वस्तुनः सिद्धिर्नामेति। अतः सर्वोऽयमस्थाने संभ्रमो यदापरोक्ष्य-मात्मनो हेतुमपेक्षते इति कृत्वा तदुपपादने प्रयत्न इति ॥

भामत्यां तु पञ्चपादिकावदेव

(२) 'तस्मात् चिदात्मैव कार्यकारणसङ्घातेन ग्रथितो लब्धक्रियाभोग-शक्तिः स्वयंप्रकाशोऽपि बुद्ध्यादिविषयविच्छुरणात् कथञ्चित् अस्मत्प्रत्ययविषयः, अहङ्कारास्पदं जीव इति च जन्तुरिति च क्षेत्रज्ञ इति चाऽऽख्यायते। न खलु जीवश्चिदात्मनो भिद्यते। तथा च श्रुतिः 'अनेन जीवेनाऽऽत्मना' इति। तस्मात्, चिदात्मनोऽव्यतिरेकात्, जीवः स्वयंप्रकाशोऽपि अहंप्रत्ययेन कर्तृ-भोक्तृतया व्यवहारयोग्यः क्रियत इति अहंप्रत्ययालम्बनमुच्यते। न चाध्यासे सति विषयत्वम् विषयत्वे चाध्यासः – इत्यन्योन्याश्रयत्वम् इति साम्प्रतम्। बीजाङ्कुरवदनादित्वात्, पूर्वपूर्वाध्यासतद्वासनाविषयीकृतस्य उत्तरोत्तराध्यास-विषयत्वाविरोधात् .... इति ॥ वा. भा. पा. ३९.

इत्यस्मत्प्रत्ययत्वमुपपाद्योक्तम् –

(३) स्यादेतत् – न वयम् अपराधीनप्रकाशतया अविषयत्वेन अध्यासम् अपाकुर्मः, किं तु प्रत्यगात्मा न स्वतः, नापि परतः प्रथते इत्यविषय इति ब्रूमः। तथा च सर्वथा अप्रथमाने प्रत्यगात्मनि कुतोऽध्यास इति? अत आह – अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः। प्रतीच आत्मनः प्रसिद्धिः प्रथा; तस्या अपरोक्षत्वात्। यद्यपि प्रत्यगात्मनि नान्या प्रथा अस्ति। तथापि भेदोपचारः, यथा 'पुरुषस्य चैतन्यम्' इति। एतदुक्तं भवति – अवश्यं चिदात्मा अपरोक्षो-ऽभ्युपेतव्यः। तदप्रथायां सर्वस्याप्रथनेन जगदान्ध्यप्रसङ्गात् इत्युक्तम्। श्रुतिश्चात्र भवति 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' इति ॥ वा. भा. पा. ३९.

इति। एतदपि प्राचीनटीकायामिव 'आपरोक्ष्यमभ्युपगन्तव्यम्, अन्यथा अनिष्टप्रसङ्गात् श्रुतिविरोधप्रसङ्गाच्च' इत्यर्थापत्तिप्रमाणेनापरोक्ष्यमात्मनः

प्रसाधयद् व्याख्यानम् अध्याससाधनार्थं सर्वव्यवहाराधारं परमात्मापरोक्ष्यं विवादपदमारोप्य विचारं तनोतीति तद्वदेव दोषग्रस्तमिति वयं प्रतीमः ॥

कथं तर्हि व्याख्येयं भाष्यवाक्यम् 'अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः' इति ? अत्र ब्रूमः । 'नायमेकान्तेनाविषयः, अस्मत्प्रत्ययविषयत्वात्' इत्यनेन 'आत्मा व्यवहारदृष्ट्या अस्मत्प्रत्ययविषयोऽपि भवति, तेनाध्यासार्होऽसौ' इत्युक्तं प्रथमवाक्येन । 'अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः' इत्यनेन तु इदमुक्तं भवति – यद्यपि विषयिणि चिदात्मके अस्मत्प्रत्ययगोचरत्वसिद्ध्यर्थम् अहमोऽध्यासः, तदापि चिदात्मनोऽपरोक्षत्वादेव तस्य निरपवादा प्रसिद्धिर्भवति । तथा च प्रसिद्धत्वमेवालम् अध्यासं प्रयोजयितुम् । विषये विषयान्तराध्यासेऽपि यस्मिन् अध्यासः, तस्य प्रसिद्धिरेव प्राधान्येनापेक्ष्यते, न तु विषयत्वमपि । अस्मत्प्रत्ययविषयत्वं तु दर्शितमात्मन्यङ्गीकारवादेन । तदेवं प्रसिद्धे प्रसिद्धवस्त्वन्तरस्याध्यासोपपत्तेः, कृतं विषयत्वपर्यन्तानुधावनेनेति । तदुक्तमुपदेशसाहस्र्याम् – 'न हि कादाचित्कसिद्धावेव अध्यारोपणा न नित्यसिद्धौ इति नियन्तुं शक्यम्' (उप. गद्य. पा. ६६) इति ॥

## विद्याऽविद्याविवेकः

३८. **'तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते । तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः ।'** इति भाष्यम् । तत्राविद्याविषये टीका –

(१) यद्येवम्, 'अध्यासः' इति प्रकृत्य पुनस्तस्याविद्याभिधानव्याख्याने यत्नगौरवात्, वरम् 'अविद्या' इत्येव उपक्रमः कृतः । नैतत् सारम् । आदौ 'अविद्या' इत्येवोच्यमाने आच्छादकत्वं नाम यत् तस्यास्तत्त्वम्, तदेवाभिहितं स्यात् । नातद्रूपावभासितया अनर्थहेतुत्वम् ॥ पं. पा. ४२०.

इति । सूत्रभाष्ये अविद्याया आच्छादकत्वं कुत्रापि नोक्तमुपलभामहे । गीताभाष्ये तु इदं वाक्यं दृश्यते –

(1) तामसो हि प्रत्ययः आवरणात्मकत्वादविद्या, विपरीतग्राहकः, संशयोपस्थापको वा, अग्रहणात्मको वा । विवेकप्रकाशभावे तदभावात्, तामसे च

आवरणात्मके तिमिरादिदोषे सति अग्रहणादेरविद्यात्रयस्योपलब्धेः ॥ गी. भा. १३-२, पा. १९२.

इति । तत्र यद्यपि अविद्या आवरणात्मकत्वेन विशेषिता, तथापि विपरीत-ग्राहकादिप्रत्ययरूपैवेति विस्पष्टमुक्ता, न तु ब्रह्मस्वरूपाच्छादकाविद्या-शक्तित्वेन इति न सा टीकोपात्ताविद्यावादोपष्टम्भिका ॥

विद्या तु टीकाकारेणैवं विवृता –

(२) अध्यस्तातद्रूपसर्पविलयनं कुर्वद् वस्तुस्वरूपं रज्जुरेवेत्यवधारयद् विज्ञानं विद्या इति प्रसिद्धमेव लोके ब्रह्मविदो वदन्ति ॥ पं. पा. ४१९.

विवरणकारस्तु –

(३) न केवलमविद्यान्वयव्यतिरेकसामर्थ्यात् अविद्योपादानतया अविद्यात्वम्, किं तु विद्याविपरीतत्वाच्च ॥ पं. वि. पा. ४१७.

इति सुस्पष्टमेव अविद्याशक्तिमेवाविद्योपादानभूतामाह । टीकाकारोऽपि 'अध्यस्तविलयनमेव' विद्याकृत्यमाह 'परत्र पूर्वदृष्टावभासः' इति लक्षणवाक्य-स्याभिप्रायस्य स्वकृतवर्णनमनुसृत्येत्यनुसन्धेयमेतत् ॥

भाष्ये पुनरविद्याध्यस्तवर्णने 'अविद्याध्यस्तम्', 'अविद्याकल्पितम्', 'अविद्यालक्षणम्', 'अविद्याप्रत्युपस्थापितम्' – इत्यादिविशेषणानि नियमे-नोपादीयन्ते । न तु क्वचिदपि 'अविद्योपादानकम्' इति विशेषणमुल्लिखितम् – इति ज्ञापनार्थं कानिचिद् वाक्यानीह समाहरामः –

(1) अविद्याकल्पितभेदनिवृत्तिपरत्वात्, शास्त्रस्य ॥ १-१-४, पा. १६.

(2) अविद्याकल्पितसंसारित्वनिवर्तनेन नित्यमुक्तात्मस्वरूपसमर्पणान्न मोक्ष-स्यानित्यत्वदोषः ॥ १-१-४, पा. १६.

(3) देहादिसंहतस्यैवाविद्यागृहीतस्य आत्मनः संस्क्रियमाणत्वात् ॥ १-१-४, पा १७.

(4) परमेश्वरस्तु अविद्याकल्पितात् शारीरात् कर्तुर्भोक्तुर्विज्ञानात्माख्या-दन्यः ॥ १-१-१९, पा. ६९.

(5) अविद्याप्रत्युपस्थापितस्वभावत्वाच्च सत्त्वस्य (कर्तृत्वं भोक्तृत्वं च) सुतरां न संभवति ॥ १-२-१२, पा. ७४.

(6) अविद्याप्रत्युपस्थापितकार्यकरणोपाधिनिमित्तोऽयं शारीरान्तर्यामिणो-र्भेदव्यपदेशो न पारमार्थिकः ॥ १-२-२०, पा. ८१.

(7) एतदुक्तं भवति – न कार्यप्रपञ्चविशिष्टो विचित्र आत्मा विज्ञेयः, किं तर्हि, अविद्याकृतं कार्यप्रपञ्चं विद्यया प्रविलापयन्तः, तमेवैकरसम् आयतनभूतम् आत्मानं जानथ एकरसमिति ॥ १-३-१, पा. ९४.

(8) अविद्याप्रत्युपस्थापितम् अपारमार्थिकं जैवं रूपम् कर्तृभोक्तृ रागद्वेषादिदोषकलुषितम् अनेकानर्थयोगि । तद्विलयनेन तद्विपरीतम् अपहतपाप्मत्वादिगुणकं पारमेश्वरं स्वरूपं विद्यया प्रतिपाद्यते ॥ १-३-१९, पा. ११५.

(9) नित्यशुद्धबुद्धमुक्तस्वभावे कूटस्थनित्ये एकस्मिन् , असङ्गे परमात्मनि तद्विपरीतं जैवं रूपं व्योम्नीव तलमलादि परिकल्पितम् । तदात्मैकत्वप्रतिपादनपरैर्वाक्यैर्न्यायोपेतैर्द्वैतवादप्रतिषेधैश्च अपनेष्यामि इति परमात्मनो जीवादन्यत्वं द्रढयति । जीवस्य तु न परस्मादन्यत्वं प्रतिपिपादयिषति, किं तु अनुवदत्येव अविद्याकल्पितं लोकप्रसिद्धं जीवभेदम् ॥ १-३-१९, पा. ११५.

(10) मात्राभिस्तु अस्य भूतेन्द्रियलक्षणाभिरविद्याकृताभिः असंसर्गो विद्यया भवति । संसर्गाभावे च तत्कृतस्य विशेषविज्ञानस्य अभावात् न प्रेत्य संज्ञा अस्तीत्युक्तम् ॥ १-४-२२, पा. १७३.

(11) आभासस्य च अविद्याकृतत्वात् , तदाश्रयस्य संसारस्य अविद्याकृतत्वोपपत्तिः ॥ २-३-५०, पा ३०२.

टीकाकारसम्मतस्य, अव्याकृतनामरूपाद्यभिख्यस्य अविद्याकल्पितत्ववक्तृणि वाक्यानि प्रागेव (खं. ३०) उदाहृतानि । तान्यपीहानुसंधेयानि ॥

## अहंप्रत्ययिसाक्षिणोरन्योन्याध्यासः

३९. 'अध्यासो नाम अतस्मिंस्तद्बुद्धिरित्यवोचाम' इति पूर्वोक्तलक्षणवाक्यस्यार्थं शब्दान्तरेणानूद्य अध्यासप्रकारान् अनुक्रम्य अन्ते उपसमहार्षीद् भाष्यकारः 'एवमहंप्रत्ययिनम् अशेषस्वप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्य तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेण अन्तःकरणादिषु अध्यस्यति' इति । अत्र व्याख्यानं **टीकाकारस्य** –

(१) प्रत्ययाः कामादयोऽस्य इति प्रत्ययी । अहं च असौ प्रत्ययी च इति अहंप्रत्ययी । तम् 'अशेषस्वप्रचारसाक्षिणि प्रत्यगात्मनि अध्यस्य' इति स्वशब्देन अहङ्कारग्रन्थिः संसारनृत्यशालामूलस्तम्भोऽभिधीयते ; तस्य प्रचारः कामसङ्कल्पकर्तृत्वादिरनेकविधः परिणामः, यन्निमित्तं ब्रह्मादिस्थावरान्तेषु प्रदीप्त-

शिरा इव परवशो जन्तुर्बम्भ्रमीति । तं प्रचारम् अशेषम् असङ्गितया अविकारित्वेन च हानोपादानशून्यः साक्षादव्यवधानमवभासयति चितिधातुः । स एव देहादिषु इदन्तया बहिर्भावमापद्यमानेषु प्रातिलोम्येन अञ्चतीव उपलक्ष्यते इति प्रत्यगुच्यते । आत्मा च निरुपचरितस्वरूपत्वात् । तत्राध्यस्य 'तं च प्रत्यगात्मानम्' इति । यदि युष्मदर्थस्यैव प्रत्यगात्मन्यध्यासः स्यात्, प्रत्यगात्मा न प्रकाशेत; न हि शुक्तौ, रजताध्यासे शुक्तिः प्रकाशते । प्रकाशते चेह चैतन्यम् अहङ्कारादौ । तथा यदि चैतन्यस्यैव अहङ्कारादौ अध्यासो भवेत्, तदा नाहङ्कारप्रमुखः प्रपञ्चः प्रकाशेत । तदुभयं माभूत् इत्यनुभवमेव अनुसरन्नाह 'तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेण अन्तःकरणादिषु अध्यस्यति' इति । नात्र विवदितव्यम् इतरेतराध्यासे पृथगवभासनात्, न मिथ्या गौणोऽयम् इति । तथा अनुभवाभावान्मुख्याभिमानः । न हि दृष्टे अनुपपन्नं नाम ॥ पं· पा· ४७७–४८२.

व्याख्यातं चैतद् विवरणे –

(२) अयमर्थः – एकतराध्यासे अन्यतरस्य सामान्यावभासोऽन्यतरस्यैव विशेषावभासश्च स्यात्, अत्र चिज्जडरूपेण द्वयोर्विशेषावभासो द्वयोरितरेतराध्यासं गमयति ॥ पं· वि· वि· ४८२.

इति ॥

नेदं भाष्यकाराशयवर्णनम् इत्यस्मन्मतिः । कुतः ? अत्र हि भाष्यकारो विषयविषयिणोरन्योन्याध्यासं प्रतिज्ञालक्षणसम्भावनासद्भावोपपादनपूर्वकं प्रतिपाद्य कुत्र कुत्र कस्य कस्याध्यासो लोके प्रसिद्धः ?–इत्येतद्दर्शयितुकाम उदाहरति स्म 'तद्यथा' इत्यादिना । तत्रापि पुत्रभार्यादेहादिधर्मान् आत्मन्येवास्मत्प्रत्ययगम्ये अध्यस्यति – इत्येतत् प्रदर्शितम् 'अध्यवसायादीन्' इत्येतदन्तेन ग्रन्थेन; तेनैव ग्रन्थेन तद्विपर्ययेणान्तःकरणादिषु पुत्रभार्याद्यन्तेषु अहंप्रत्ययगम्यात्मत्वमध्यस्तं भवतीत्येतदपि प्रदर्शितमेव भवति । तदनन्तरम् एतद्वाक्यं लिखितम् 'एवम् अहंप्रत्ययिनम्' इत्यादि । अतः इत्थं वाक्यार्थः संपद्यते – यथैव 'पुत्रादिरेव अहम्', 'अहमेव पुत्रादिः' 'देह एवाहम्', 'अहमेव देहः', 'अहमेव इन्द्रियम्', 'इन्द्रियमेवाहम्', 'अहमेवान्तःकरणम्', 'अन्तःकरणमेवाहम्', इत्यविवेकेन इतरेतराध्यासं कृत्वा व्यवहरति, एवमेव अहंप्रत्ययिनं साक्षिणि, साक्षिणं चाहंप्रत्ययिनि अध्यस्य व्यवहरतीति ।

यद्यपि न कश्चन व्यवहरति 'अहमेव पुत्रः', 'अहमेव देहः', 'अहमेवेन्द्रियम्', 'अहमेवान्तःकरणम्' – इति वा । तथापि पुत्रादिधर्माः साकल्यवैकल्यजरारोगान्ध्यबाधिर्यकामसङ्कल्पादयः आत्मन एवेत्यभिमन्यमानः प्रवर्तत एवेति तत्तद्धर्माध्यासमङ्गीकृत्यैव तथा प्रवर्तत इति गम्यते । इयांस्तु विशेषः – पुत्रदेहेन्द्रियाद्यध्यासे पुत्रादीनामिदंप्रत्ययगम्यत्वमपि प्रत्येतीत्यतस्तेषामध्यस्तत्वमल्पेनैव विवेचनायासेन सुगमम् । अहंप्रत्ययी तु चिदाभासयुक्तत्वात्, स्वेतरापेक्षया प्रत्यक्त्वादिभिरात्मानुकारित्वाच्च न साक्षिणः सकाशात् सुविवेचन इति । अत एव तस्य पृथग्वचनम् 'एवमहंप्रत्ययिनम्' इत्यादिना – इति सर्वमनाकुलम् ॥

एवं च यदुच्यते **टीकायाम्** 'यदि युष्मदर्थस्यैव प्रत्यगात्मन्यध्यासः स्यात्' इत्यादि शुक्तिरजताध्यासनिदर्शनेन, यच्च तद्व्याख्यानं **विवरणे** 'अन्यतरस्य सामान्यावभासोऽन्यतरस्यैव विशेषावभासः' इत्यादि, तदनवसरदुःस्थम्, समीहितार्थविहन्तृ चेत्यवगम्यते । न हि प्रत्यगात्मा इदंप्रत्ययगम्यः शुक्त्यादिवत्, येनाध्यासाधारानवभासः, तत्सामान्यमात्रावभासो वा शङ्क्येत । य एव तु अध्यासकर्ता व्यवहारावस्थायां शुक्तिरजतादेः, तस्यैव हि परमार्थरूपं 'साक्षी' इति, 'प्रत्यगात्मा' इति चोच्यते वेदान्तेषु । न च तस्यानवभासः, सामान्यांशमात्रावभासो वा शक्यश्चिन्तयितुमपि ; तस्यैव हि भासा सर्वस्यावभासः, अनवभासो वा अध्यवसेयः । केवलं बाह्यविषयापहृतचित्तैः प्राकृतैरेव तु जनैः साक्ष्यहंप्रत्ययिनोर्विवेकाभावनिमित्तात् मिथ्याज्ञाननिमित्तं व्यवह्रियते 'अहमिदम्', 'ममेदम्' इति च । स च व्यवहारो स्वभाव एव लोकस्य न तत्र निमित्तमन्वेषणीयम् इति खलु भाष्यकारः प्रतिजानीते 'नैसर्गिकोऽयं लोकव्यवहारः' इत्युद्घोषयन् इति ॥

## किं नाम नैसर्गिकत्वं व्यवहारस्य ?

४०. अथ 'नैसर्गिकोऽयं लोकव्यवहारः' इति किं विवक्ष्यते भाष्यकारेण ? – इत्यपि विचिन्त्यमेतत् । यतोऽत्रापि टीकाकारोऽन्यादृशमेव व्याचष्टे भाष्यवाक्यम् –

(१) 'नैसर्गिकः', प्रत्यक्चैतन्यसत्तामात्रानुबन्धी अयं युष्मदस्मदोरितरेतराध्यासात्मकः 'अहमिदम्, ममेदम्' इति लोकव्यवहारः ॥ पं·पा· ८४

इति । विवरणकारश्च टीकामेवं व्याकृतवान् –

(२) भोक्तृत्वाध्यासः कर्तृत्वाध्यासमपेक्षते । अकर्तुर्भोगाभावात् । कर्तृत्वं च रागद्वेषसंयोगाध्यासमपेक्षते ; तद्रहितस्य कर्तृत्वाभावात् । दोषसंयोगश्च भोक्तृत्वमपेक्षते । अनुपभुक्ते अतज्जातीये वा रागाद्यनुपपत्तेः । एवं बीजाङ्कुरवत् हेतुपरम्परया अनादित्वात् अध्यासस्य नैसर्गिकत्वम् ॥ पं· वि· पा· ८४·

इति ॥

तदेतन्न भाष्यानुसारीति वयं पश्यामः । भाष्याक्षरानारूढत्वात्, नैसर्गिकशब्दस्य स्वाभाविकपर्यायत्वात् । स्वभावशब्दस्य भाष्ये अविचारस्वभावार्थकत्वेन भूयोभूयः प्रयोगदर्शनाच्च । तथा हि –

(1) यो हि बहिर्मुखः प्रवर्तते पुरुषः 'इष्टं मे भूयात्, अनिष्टं मा भूत्' इति न च तत्र आत्यन्तिकं पुरुषार्थं लभते । तं आत्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविककार्यकरणसङ्घातप्रवृत्तिगोचराद् विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि ॥ १-१-४, पा. १९.

(2) जीवस्य तु न परस्मादन्यत्वं प्रतिपिपादयिषति, किं तु अनुवदत्येव अविद्याकल्पितं लोकप्रसिद्धं जीवभेदम् । एवं हि स्वाभाविककर्तृत्वभोक्तृत्वानुवादेन प्रवृत्ताः कर्मविधयो न विरुध्यन्त इति मन्यते ॥ १-३-१९, पा. ११५.

(3) अतश्चेदं शास्त्रीयं ब्रह्मात्मत्वम् अवगम्यमानं स्वाभाविकस्य शारीरात्मत्वस्य बाधकं संपद्यते । रज्ज्वादिबुद्धय इव सर्पादिबुद्धीनाम् । बाधिते च शारीरात्मत्वे तदाश्रयः समस्तः स्वाभाविको व्यवहारो बाधितो भवति ॥ २-१-१४, १९७.

अन्यान्यप्येवञ्जातीयकानि वाक्यानि परिशिष्टे (७) उदाहर्तव्यानीतीह विरम्यते ॥

## साक्षिणोऽहम्यध्यस्तत्वेऽपि न मिथ्यात्वप्रसङ्गः

४१. 'सत्यानृते मिथुनीकृत्य' इति भाष्यं व्याचिख्यासुष्टीकाकार आह –

(१) सत्यम् अनिदंचैतन्यम् । अनृतं युष्मदर्थः स्वरूपतोऽपि अध्यस्तस्वरूपत्वात् ॥ पं· पा· ८५-८६·

इति । टीकाव्याख्यातृविवरणं च –

(२) सत्यस्य वस्तुनो मिथ्यावस्तुसंभेदावभासोऽविद्या-इति स्वसिद्धान्त-मङ्गीकृत्य 'सत्यानृते मिथुनीकृत्य' इत्युक्तम् । तद्व्याचष्टे सत्यम् अनिदंचैतन्यम् इत्यादिना ॥ पं. वि. पा ८५.

(३) न च द्वयोरपि मिथ्यात्वापातः, चेतनस्याचेतने स्वरूपाध्यासा-भावात्, संसृष्टतयैवाध्यात् ॥ पं. वि. पा. ४८२.

इति । एतदपि न सम्यगिति वयं प्रतीमः । यथैव हि अहमध्यासो निःसामान्य-विशेषरूपे चैतन्ये 'अहम्' इत्येवंमात्राकारेण, एवमेव चैतन्याध्यासोऽप्यहमि 'चैतन्यात्मकोऽहम्' इत्येवमाकारेण निरुपचरितं प्रथते । अत एव हि लोकोऽहंप्रत्ययगम्यमेवाऽऽत्मानं सर्वान्तरं चिद्रूपं सूक्ष्मतमं च मन्यते । न तु ततो विलक्षणं सर्वस्याऽऽत्मानं कूटस्थं साक्षिणं वेदान्तवेद्यं विजानाति । न चैवं स्वरूपतोऽप्यध्यस्तत्वे साक्षिणोऽपि मिथ्यात्वप्रसङ्गः शङ्कनीयः । न हि मिथ्यापदार्थे अध्यस्तः साक्षी, मिथ्यार्थश्चावगतः सत्यवस्तुत्वेन भ्रान्त्या – इत्येतावन्मात्रेण मिथ्यापदार्थस्य सत्यत्वम्, सत्यवस्तुनो मिथ्यात्वं वा प्राप्नोति । अविवेककृतभ्रान्तेर्वस्तुस्वाभाव्यवैपरीत्यापादनसामर्थ्याभावात् । तस्मात्, सर्वसाक्षिणोऽपि प्रत्यगात्मनोऽहमि समारोपितत्वेऽपि स्वेन पारमार्थिकेन रूपेण तदानीमप्यवस्थानं नैव विहन्यत इति ध्येयम् ॥

## अध्यासस्यानादित्वमानन्त्यं च

४२. "एवमयम् अनादिरनन्तो नैसर्गिकोऽध्यासः मिथ्याप्रत्यय-रूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः" इत्यध्यासस्वरूपवर्णनोप-संहारकं भाष्यम् । तत्र **टीका** –

(१) ननु, उपन्यासकाले 'नैसर्गिकोऽयं लोकव्यवहारः' इति लोक-व्यवहारो नैसर्गिक उक्तः, कथमिह अध्यासो निगम्यते, 'अनादिः' इति चाधिकावापः ? अत्रोच्यते – तत्रापि प्रत्यगात्मन्यहङ्काराध्यास एव नैसर्गिको लोकव्यवहारोऽभिप्रेतः । स च प्रत्यगात्मा अनादिसिद्धः । तस्मिन् नैसर्गिकस्य अनादित्वम् अर्थसिद्धम् । अतः प्रक्रमानुरूपमेव निगमनम्, न चाधिकावापः ॥ पं. पा. ४८४-४८५.

इति । अत्र व्यवहारपदार्थविवेचनम् (खं. २०) नैसर्गिकपदार्थविवेचनं च (खं. १५, पा. १७) पूर्वमेव कृतमितीहोपेक्ष्यते । अनाद्यनन्तता तु कथमिति चिन्ता अधुना कर्तव्या ॥

तत्र **टीकाप्रक्रिया** प्रत्यगात्मन्यध्यासस्य नैसर्गिकत्वात्– तत्स्वरूपसत्ता-निबन्धनत्वात् अनादित्वम्, अनादित्वादेव प्रत्यगात्मनः इति । 'नैसर्गिको मिथ्याज्ञाननिमित्तो व्यवहारः' इत्यन्वयं स्वीकृत्य (पा. १९) नैसर्गिकत्वं मिथ्यात्वे हेतुत्वेनोपपादयद्भिरस्माभिस्तु अनादित्वे तस्य हेतुत्वं भाष्यासम्मतम् इत्युक्तप्रायम् । **भाष्यदृष्ट्या हि –**

(1) **तमेतम् अविद्याख्यम् आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधि-प्रतिषेधमोक्षपराणि ॥**

इत्यनेनैव हि वाक्येन सर्वेषां व्यवहाराणाम् – अप्रविहाय अध्यासस्यानादित्व-व्यवहारमपि – अविद्यापुरःसरत्वं प्रतिज्ञातम् उपपादितं च भवति । लौकिक-दृष्ट्यैव खलु प्रपञ्चोऽयं प्रतिनियतदेशकालनिमित्तक्रियाफलात्मकः प्रतीयते । तस्य चोत्पत्तिस्थितिप्रलयाः शास्त्रदृष्ट्या परमात्मन इति कालस्याप्यात्मत एवोत्पत्तिरास्थीयते इति गम्यते । वक्ष्यति च भाष्यकृत् कण्ठरवेण **वियदधिकरणे –**

(2) **एतेन दिक्कालमनःपरमाण्वादीनां कार्यत्वं व्याख्यातम् ॥ २-३-७, पा. २६८.**

इति । तस्मात् कालस्याप्यध्यासलक्षणाविद्याप्रत्युपस्थापितत्वमेवेति नात्मनो-ऽनादित्वं हेतूकृत्य अध्यासस्य कालपरिच्छिन्नत्वम्, कालतोऽनादित्वं वा शक्यशङ्कम् । तस्मान्न्यायोपबृंहितभाष्यविरोधात्, नात्मनोऽनादित्वं तस्मिंश्च नैसर्गिकत्वादध्यासस्यानादित्वं चेति टीकामतं साधु । यत्तु **टीकायां** मूला-ध्यासस्यापि व्यावहारिकाध्याससाम्यमङ्गीकृत्य तदुपपादनाय दोषादिजन्यत्वोप-पादनप्रयतनम्, अविद्याशक्तिपरिणामत्वोररीकरणम्, श्रुतितदर्थापत्तिप्रमाणेन तत्साधनायासोपादानं च तत्सर्वम् अध्यारोपापवादप्रक्रियया भाष्ये स्वीकृत-स्याध्यासस्य अवस्तुसतोऽपि वस्तुसत्त्वापादनप्रयतनमित्युपेक्ष्यम् ॥

## किं नामाध्यासस्य मिथ्याप्रत्ययरूपत्वम् ?

४३. अथ भाष्ये 'अध्यासो मिथ्याप्रत्ययरूपः, कर्तृत्वभोक्तृत्वप्रवर्तकः' इत्यत्रोक्तमध्यासस्य मिथ्याप्रत्ययरूपत्वं किंलक्षणमिति विचारणीयम् । अत्र **टीकाकृत्** –

**(१) 'मिथ्याप्रत्ययरूपः' इति रूपग्रहणं लक्षणतस्तथा रूप्यते, न व्यवहारतः इति दर्शयितुम् ॥ पं. पा. ४८५.**

इति । **भामतीकारस्त्वाह** –

**(२) मिथ्याप्रत्ययानां रूपम् अनिर्वचनीयत्वम्, तद् यस्य स तथोक्तः ॥ वा. भा. पा. ४५.**

इति ॥

मिथ्याप्रत्यया अनिर्वचनीयाः – इति पारिभाषिकशब्देन मिथ्यात्ववर्णनम् उभयोरपि टीकाकृतोः समानम् । भाष्ये तु एवम् अनिर्वचनीयशब्दप्रयोगो न दृश्यत इत्युक्तम् (खं. २२) । व्यवहारे अविद्या मिथ्याप्रत्ययत्वेन न लक्ष्यत इति यद्यपि सर्वेषादिसंमतम्, तथापि तथा प्रतिपादनस्य कथं प्रकृतग्रन्थेन सङ्गतिरिति तु न ज्ञायते । भाष्ये तु यद्यप्यविद्या अनाद्यध्यासलक्षणा न घटादिप्रत्ययवत् कादाचित्की, तथापि निसर्गत एव सर्वपुरुषबुद्धिसाधारणत्वात् तस्या मिथ्यात्वम् अनर्थहेतुत्वं वा न गृह्यते प्राकृतैः, प्रमाणबुद्ध्यैव तु गृह्यते इति तस्या मिथ्याप्रत्ययरूपत्वं विज्ञाप्यैव विद्यया हातव्यत्वं बोध्यते वेदान्तेषु – इत्यर्थवत्त्वं विशेषणस्य । उक्तं हि **गीताभाष्ये**–

**(1) यथाशास्त्रं क्षेत्रक्षेत्रज्ञलक्षणभेदपरिज्ञानपूर्वकं प्राग्दर्शितरूपात् क्षेत्रात् मुञ्जादिवेषीकां यथोक्तलक्षणं क्षेत्रज्ञं प्रविभज्य 'न सत्तन्नासदुच्यते' इत्यनेन निरस्तसर्वोपाधिविशेषं ज्ञेयं ब्रह्म स्वरूपेण यः पश्यति, क्षेत्रं च मायानिर्मितहस्तिस्वप्नदृष्टवस्तुगन्धर्वनगरादिवत् असदेव सदिवावभासते – इत्येवं निश्चितविज्ञानो यः, तस्य यथोक्तसम्यग्दर्शनविरोधात् अपगच्छति मिथ्याज्ञानम् ॥ गी. भा. १३-२६, पा. २१३.**

इति । न च कादाचित्कघटादिप्रत्यये एव प्रत्ययशब्दः प्रयोक्तव्यः, न त्वनाद्यध्यासलक्षणे इति नियन्ता कश्चिद् विद्यते । उपलभ्यते हि नैसर्गिकाध्यासलक्षणायामविद्यायामपि प्रत्ययशब्दः प्रयुक्तः –

(2) कर्त्रादिकारकक्रियाफलभेदप्रत्ययवत्त्वं हि निमित्तम् उपादाय 'इदं कुरु, इदं मा कार्षीः' इति कर्मविधयः प्रवृत्ताः । तच्च निमित्तं न शास्त्रकृतम्, सर्वप्राणिषु दर्शनात् । 'सदेकमेवाद्वितीयम्', 'आत्मैवेदं सर्वम्', 'ब्रह्मैवेदं सर्वम्' – इति शास्त्रजन्यः प्रत्ययो विद्यारूपः स्वाभाविकं क्रियाकारकफलभेद-प्रत्ययं कर्मविधिनिमित्तम् अनुपमृद्य न जायते ; भेदाभेदप्रत्यययोर्विरोधात् । न हि तैमिरिकद्विचन्द्रादिभेदप्रत्ययम् अनुपमृद्य तिमिरापगमे चन्द्राद्येकत्व-प्रत्यय उपजायते । विद्याविद्याप्रत्यययोर्विरोधात् ॥ छां· भा· २–२३–१, पा· ४०६.

(3) अब्रह्मप्रत्ययः सर्वोऽविद्यामात्रो रज्ज्वामिव सर्पप्रत्ययः ॥ मुं· भा· २–२–११, पा· १६४.

इत्यादिस्थलेषु । अतोऽध्यासो मिथ्याप्रत्ययरूप इति न विरुध्यते ॥

## अध्यासः कर्तृत्वभोक्तृत्वप्रवर्तकः

४४. अथायमध्यासः 'कर्तृत्वभोक्तृत्वप्रवर्तनः'[1] इति किं विवक्षितम् ? इति जिज्ञास्यम् । यतः प्राक्तनभाष्ये अध्यासस्य सकलप्रमाणप्रमेयव्यवहार-प्रयोजकत्वम्, इह तु कर्तृत्वभोक्तृत्वमात्रमुच्यते । अत्र टीका –

(१) 'कर्तृत्वभोक्तृत्वप्रवर्तकः' इत्यनर्थहेतुकं दर्शयति हेयतासिद्धये । तेन कर्तुश्च भोक्तुश्च सतो मिथ्याज्ञानं दोषप्रवर्तनम् इति येषां मतम्, तन्निरा-कृतं भवति ॥ पं· पा· ४८५, ४८६.

तत्र यद्यपि कर्तृत्वभोक्तृत्वव्याख्यानं न भाष्यकारमतादतिरिच्यते, तथापि कर्तृत्वादिकं न स्वाभाविकम् – इति प्रतिपादनार्थं प्रकृतग्रन्थः प्रवृत्त इति व्याख्यानम् न स्वरसम् – इत्यस्मन्मतिः । कर्तृत्वभोक्तृत्वे स्वाभाविके वा न वा ? – इति विचारस्य अप्रकृतत्वात् । अध्यासस्य सकलविधव्यवहार-हेतुत्वं हि परमप्रकृतम्, अतस्तदेवोपसंहर्तव्यम्, नान्यत् । अतः प्रकृतानु-सारिव्याख्यानं भाष्यवाक्यस्य एवं स्यात् – व्यवहारो नाम प्रत्ययव्यपदेश-प्रवृत्तिरूपः । तत्राध्यासस्यानादिप्रत्ययत्वोपदेशेनैव गतत्वात् प्रमाणव्यवहारस्य तत्प्रयुक्तव्यपदेशप्रवृत्तिलक्षण एव व्यवहारः प्रदर्शयितव्यत्वेनावशिष्यते । अपि च प्रमाणप्रमेयव्यवहारस्य प्रमात्राश्रयत्वात्, प्रमातुः सत एव चेच्छाद्वेष-

1. 'कर्तृत्वभोक्तृत्वप्रवर्तकः' इति भाष्यादृतः पाठः ॥

लक्षणद्वन्द्वमोहितस्य व्यपदेशप्रवृत्तिलक्षणव्यवहारसंभवात्, अविद्याप्रत्युपस्थापितप्रमातृत्वयुक्तस्यैव पुरुषस्य कर्तृत्वभोक्तृत्वव्यवहाराश्रयत्वमवकल्पत इति स्पष्टम्। तदेवं कर्तुर्भोक्तुश्च सतः सम्यग्ज्ञानं मिथ्याज्ञानं वा इच्छाद्वेषद्वारा धर्माधर्मप्रयोजकम् – इति परमतं यद्यपि सम्यगेव व्यवहारदृष्ट्या, तथापि तस्यैव कर्तृत्वभोक्तृत्वव्यवहारस्य अनाद्यध्यासप्रयुक्तत्वात्, संसारानर्थलक्षणत्वाच्च सुष्ठूक्तं कर्तृत्वभोक्तृत्वप्रवर्तकोऽनर्थहेतुश्चाध्यास इति। तदेतदाह 'कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः' इति। 'अहमिदम्', 'ममेदम्' इति मिथ्याप्रत्ययलक्षणं ज्ञानं प्रमाणत्वेन स्वीकृत्यैव हि क्रियाकारकफलव्यवहारे प्रवृत्तिरुपपद्यते। उक्तं चैतत् प्राक् 'पश्वादिभिश्चाविशेषात्' इति। गीताभाष्ये चोक्तम् –

(1) प्राग् विद्योत्पत्तेरविद्या प्रमाणबुद्ध्या गृह्यमाणा क्रियाकारकफलभेदरूपा सती सर्वकर्महेतुत्वं प्रतिपद्यते, नाप्रमाणबुद्ध्या गृह्यमाणायाः कर्महेतुत्वोपपत्तिः। 'प्रमाणभूतेन वेदेन मम चोदितं कर्तव्यं कर्म' इति हि कर्मणि कर्ता प्रवर्तते, न 'अविद्यामात्रमिदं सर्वं निशेव' इति॥ गी. भा. २-६९, पा. ३९.

इति॥

## 'सर्वलोकप्रत्यक्षः' इति कोऽर्थः?

४५. अथ कर्तृत्वभोक्तृत्वप्रवृत्तेः प्रत्यक्षत्ववचनं किमर्थमिति परिशीलनीयम्। तत्र **पञ्चपादिका** –

(१) 'सर्वलोकप्रत्यक्षः' इति। 'देहेन्द्रियादिषु अहंममाभिमानहीनस्य' इत्युपन्यस्य 'न हीन्द्रियाण्यनुपादाय' इत्यादिना योऽनुभवो मिथ्यात्वसिद्धयेऽनुसृतः, तं निगमयति॥ पं. पा. ४८६.

इति। **भामतीकारस्तु** –

(२) प्रमाणप्रमेयव्यवहारदृढीकृतमपि शिष्यहिताय स्वरूपाभिधानपूर्वकं सर्वलोकप्रत्यक्षतया अध्यासं सुदृढीकरोति॥ वा. भा. ४५.

इति॥

तत्र पूर्वोक्तनिगमनमत्रेति यद्यपि ग्राह्यमेव, तथापि प्रमाणप्रमेयव्यवहारं परित्यज्य कर्तृत्वभोक्तृत्वप्रवर्तकलक्षण एवाध्यासः किमित्युपात्तः? – इति न स्पष्टीकृतं पञ्चपादिकायाम्। भामत्यां तु प्रमाणप्रमेयव्यवहारेण

अध्यासो दृढीकृतः, स एव च सर्वलोकप्रत्यक्षतया दृढतरः कृतः–इति वचनं किमभिप्रायकम् ? – इति न विज्ञायते । 'न हि देहेन्द्रियादिषु' इत्यादिर्हि भाष्यग्रन्थः प्रमाणप्रमेयव्यवहारः सर्वोऽप्यध्यासं पुरस्कृत्य प्रवर्तते – इति प्रतिज्ञाया विशदनार्थः । अतस्तत्र 'अध्यासः कथं प्रमाणादिव्यवहारमूलम् ?' इत्येतावदेवानुभवाधारेण स्पष्टीक्रियते ; इहापि कर्तृत्वादिव्यवहारः सर्वलोकप्रत्यक्षः – इत्यनुभव एव परामृश्यते । तदेवं स्थिते कथमध्यासो दृढतरीक्रियत इति खलु वक्तव्यं भवतीति ॥

वस्तुतस्तु सर्वत्रैव हि व्यवहारे लोको यथावर्णितमध्यासं प्रमाणबुद्धित्वेन स्वीकृत्यैव कर्मणि प्रवर्तत इति सर्वानुभवसिद्धमेतत् । शास्त्रीयमपि कर्म कर्तृत्वभोक्तृत्वबुद्धिप्रयुक्तमेव, तत्प्रयुक्तमेव च पुनः पुनः फलभोगाय शरीरोपादानं कर्मकरणं च फलप्रलोभितानाम् 'प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् । तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मण इति नु कामयमानः ॥' (बृ. ४–४–२) इत्यादिश्रुतेः । तदेतन्मनसि कृत्वा कर्तृत्वभोक्तृत्वबुद्धिमेव संसारानर्थं मन्वानो भाष्यकार आह – 'कर्तृत्वभोक्तृत्वप्रवर्तकः' इति, इत्यस्माकं मतिः ॥

## 'अस्यानर्थहेतोः' इत्यस्यार्थः

४६. तदेवमध्यासस्य सकलविधव्यवहारहेतुत्वेन सर्वानुभवरूढत्वमादर्श्य तस्य वेदान्तज्ञाननिवर्त्यत्वमाह भाष्यकृत् – 'अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते' इति । तदेतद् व्याचष्टे **टीकाकारः** –

(१) 'अस्यानर्थहेतोः प्रहाणाय' इति प्रयोजनं निर्दिशति । हेतोः प्रहाण्या हि हेतुमतः प्रहाणिरात्यन्तिकी यतः ॥ पं. पा. ४८७.

इति । अत्र **विवरणकारः** –

(२) ननु 'अनर्थस्य प्रहाणाय' इति वक्तव्यम्, न 'हेतोः प्रहाणाय' इति । अत आह 'हेतोः प्रहाण्या' इति ॥ पं. वि. पा. ४८७.

अत्र हेतुत्वेनाभिमतोऽध्यासो मिथ्याज्ञानोपादानकः – इत्युक्तं 'मिथ्याज्ञाननिमित्तः' इति भाष्यव्याख्यानावसरे (खं. १६, पा. १९) । न चोपादान-

निवृत्तिमन्तरेणोपादेयस्यात्यन्तिकी निवृत्तिरस्तीति 'अविद्याशक्तिप्रहाणाय' इत्येव वक्तव्यं भाष्यकारेण यदि टीकासम्मता प्रक्रिया तस्य हृदि स्थिता। तत्कुतो नोक्तम्? – इतीदं टीकायाम्, तद्विवरणे वा न विचारितम्। स्यादेतत्–'अनर्थहेतोः प्रहाणाय' इति प्रशब्दोपादानेनैव आत्यन्तिकप्रहाणं सूचितम्, तेनैव च मूलशक्तेरपि हानमुक्तप्रायमिति। नैतत्साध्वभ्यूहनम्, 'अविद्याशक्तेः प्रहाणद्वारा अध्यासप्रहाणम्' इति सकृदप्यनुक्तेः। अतो नैतत्समाधानमिति ॥

अत्राक्षेपान्तरपरिहारव्याजेन **टीकाकार** आह –

(३) ननु, अनर्थहेतुरध्यासोऽनादिः स कथं प्रहीयते? तथा हि। मनुष्यादिजातिविशेषमात्राध्यासस्ततो विविक्तेऽपि न्यायतोऽहंप्रत्यये अनादित्वात् पूर्ववदविकलो वर्तते। नायं दोषः। 'तत्त्वमसि' इत्यादिवाक्याद् ब्रह्मस्वरूपावगाहिज्ञानान्तरोत्पत्तेरिष्टत्वात्। तद् हि ब्रह्मणोऽवच्छिद्यैव चैतन्यस्य ब्रह्मरूपत्वप्रच्छादनेन जीवरूपत्वापादिकामनादिसिद्धाम् अविद्याम् अहङ्कारादिविक्षेपहेतुम् निराकुर्वदेवोत्पद्यते ततः कारणनिवृत्तौ तत्कार्यम् 'अहम्' इति जीवे भोक्तृत्वरूपता सपरिकरा निवर्तेत इति युज्यते। अहंप्रत्ययः पुनः, अनादिसिद्धेनैव कार्यकरणमात्रेण सहभावादविरोधाच्च स्वरूपविवेकमात्रेण निवर्तते, नापि ज्ञानान्तरमुत्पन्नम् – इति विशेषः॥ पं. पा. ४८७–४९०.

इति। इदं त्विह वक्तव्यम् – किमिति तर्हि भगवान् भाष्यकारो कारणभूतामविद्यां नैव कण्ठरवेणोपक्रमे प्रोक्तवान्, नैव च तामिहोल्लिख्योपसमहरदिति। 'मिथ्याज्ञाननिमित्तः' इत्यत्रैवासूसुचदेतामिति चेत्, किमिति तर्हि मिथ्याज्ञानशब्दम् अखण्डमेव सम्यग्ज्ञानप्रतियोगितया प्रयुङ्क्ते स्म भगवान्, न च सकृदप्यहङ्कारादिविक्षेपबीजत्वेनानाद्यनिर्वचनीयाम् अविद्याशक्तिम् उदहार्षीत् इति प्रष्टव्याष्टीकानुयायिनः ॥

किञ्च, इदमपीह परिशीलनीयमत्र – 'किं तत्त्वमस्यादिवाक्यजन्यं ज्ञानं स्वसामग्रीविशेषादुत्पद्यमानमेवाविद्यां निवर्तयति सौरालोक इव शार्वरं तमः, उताध्यासनिवर्तनद्वारैव तत् समुत्पद्यत इति'। एतत्तु टीकायाम् अत्र न विशदीकृतम्, विमर्ष्टव्यं चानुपदमेव विद्योत्पत्तिनिरूपणावसरे (खं. ४७) इतीहोपरम्यते ॥

## 'अनर्थहेतोः प्रहाणाय' इति प्रयोजनवचनं न वा ?

४७. 'अस्यानर्थहेतोः प्रहाणायात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त' इति भाष्यम् । तत्र, 'अनर्थहेतुप्रहाणं परमं फलम्, तदर्थं विद्याप्रतिपत्तिः प्रार्थ्यते' इति वा विवक्षितम्, आहोस्वित्, विद्याप्रतिपत्तिरेव फलमिति, अथवा उभयमप्येतत् प्रयोजनत्वेन विवक्षितम् ? – इति विशये टीकाकृदाह परिजिहीर्षिताशङ्कोत्थापनपूर्वकम् –

(१) ननु निरतिशयानन्दं ब्रह्म श्रूयते, ब्रह्मावाप्तिसाधनं च ब्रह्मविद्या, 'स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति' इत्यादिश्रुतिभ्यः । तस्मात् निरतिशयसुखावाप्तये' इति वक्तव्यम्, किमिदमुच्यते 'अनर्थहेतोः प्रहाणाय' इति ? ननु च अनर्थस्यापि समूलस्य प्रहाणं श्रूयते ब्रह्मविद्याफलम् 'तरति शोकमात्मवित्', 'जुष्टं यदा पश्यत्यन्यमीशम् अस्य महिमानमिति वीतशोकः' इति च । उभयं तर्हि वक्तव्यम् श्रूयमाणत्वात्, पुरुषार्थत्वाच्च । न वक्तव्यम् । कथम् ? 'आत्मैकत्वविद्याप्रतिपत्तये' इत्यात्मनो जीवस्य ब्रह्मात्मकता शास्त्रस्य विषयः ; तेन आनन्दात्मकब्रह्मस्वरूपताप्राप्तिर्जीवस्य विषयतयैव संवृत्ता, न च सा विषयाद् बहिः येन पृथङ्निर्देशार्हा स्यात् । समूलानर्थहानिस्तु बहिः शास्त्रविषयाद् ब्रह्मात्मरूपात् ॥ पं. पा. ४९०-४९२.

[एतेन अनर्थहानिरेव प्रयोजनम् – इत्युक्तमिति भाति । अतः वाक्यशेषोऽपि परिशीलनीयः ॥ ]

(२) अनर्थहेतुप्रहाणमपि तर्हि न पृथङ्निर्देष्टव्यम् । यतः सर्वेषु वेदान्तेषु अलौकिकत्वाद् ब्रह्मणस्तत्प्रतिपादनपूर्वकमेव जीवस्य तद्रूपता प्रतिपाद्यते । तद्यथा – 'सदेव सोम्येदमग्र आसीत्' इत्युपक्रम्य, 'ऐतदात्म्यमिदं सर्वं तत्सत्यम् स आत्मा' इत्यवसानं निरस्तसमस्तप्रपञ्चं वस्तु तत्पदाभिधेयं समर्पयदेकं वाक्यम् ; तथा सति तादृशेन तत्पदार्थेन संसृज्यमानस्त्वंपदार्थः पराकृत्यैव निर्लेपम् अनर्थहेतुम् अग्रहणम् अन्यथाग्रहणं च तथा निश्चीयत इति । यद्येवम्, ब्रह्मात्मावगतिनान्तरीयकमनर्थहेतोरविद्यायाः प्रहाणम्, न शब्दस्य तत्र व्यापारः, तेन पृथङ् निर्दिश्यते । युक्तं चैतत् – न हि विपर्यासगृहीतं वस्तु तन्निरासाद् ऋते निर्णेतुं शक्यम् । तस्मात्, पूर्वावसितमतद्धर्मं निरस्यदेव तत्त्वावद्योति वाक्यं तत्त्वमवसाययति ॥ पं. पा. ४९२-४९७.

अत्र वाक्यजन्यं ज्ञानम् अग्रहणम् अन्यथाग्रहणं च पराकुर्वदेवोत्पद्यत इत्येतावदुक्तम् । न तु मिथ्याभूतमज्ञानम् अध्यासहेतुमपीति –

इत्यवधेयमेतत् । कथं तर्हि 'ब्रह्मस्वरूपप्रच्छादनेन जीवरूपत्वापादिकाम् अनादिसिद्धाविद्यां निराकुर्वदेव' इत्युक्तं प्राक् (पा. ८५) इति तु न विज्ञायते । न ह्यग्रहणमात्रम् अभावरूपम् आच्छादकमिष्यत एतस्यां प्रक्रियायामिति । किञ्चान्यत् – 'न हि विपर्यासगृहीतं वस्तु तन्निरासाद् ऋते निर्णेतुं शक्यते' इति वाक्येन विपर्यासनिरासः पूर्वः, निर्णयश्च द्वितीयः इति गम्यते ; 'निरस्यदेवोत्पद्यते' इत्यनेन तु समकालमेव ज्ञानोत्पत्तिः, अतद्धर्मनिरासश्चेति । अतः संशयोऽत्र न परिह्रियते कतरदत्र युक्तमिति ॥

(३) ननु च नञादेर्निरासकृतो निरस्यमानवाचिनश्च पदस्याश्रवणात् कथं तन्निरस्यदेवेति ? उच्यते – 'नेदं रजतम्' इति यत्र विपर्यासमात्रं निरस्यते, न वस्तुतत्त्वमवबोध्यते, तत्र तथा भवतु । इह पुनर्विज्ञानमेव तादृशमुत्पन्नम्, यद् विरोधिनिराकरणमन्तरेण न स्वार्थं साधयितुमलम् । तुलोन्नमनव्यापार इवानमनान्तरीयकः ॥ पं. पा. ४९८.

अत्र 'तत्त्वमसि' इत्यादिवाक्येषु नञाद्यभावे निषेधो नावगम्यत इत्याशङ्क्य परिहार उक्तः । विवरणे चैतद् व्याख्यातमेवम् –

(४) तत्र द्वे ज्ञाने विपर्यासविरोधिनी - विरोधिशुक्तिकादिभावान्तरात्मज्ञानम्, अध्यस्तवस्तुतत्त्वाभावज्ञानं च । तत्र, अध्यस्ततत्त्वाभावज्ञानेनाध्यासनिरासे नञाद्यपेक्षा, न विरोधिभावान्तरज्ञान इति परिहरति – 'नेदं रजतम् – इति यत्र' – इति । ब्रह्मणि तु विरोधिभावान्तरज्ञानाद् अध्यासनिवृत्तिरित्याह 'इह पुनर्विज्ञानमेव तादृशम्' इति ॥ पं. वि. पा. ४९८.

(५) तदेवम्, विपर्यासगृहीते वस्तुनि तत्त्वावद्योतिशब्दनिमित्त आत्मनो ज्ञानव्यापारो 'नाहं कर्ता, ब्रह्माहम्' इति ग्राहयति । 'नेदं रजतम्, शुक्तिकेयम्' इति यथा । तस्मात्, 'शुक्तिकेयम्' इत्येव निराकाङ्क्षं वाक्यम्, 'नेदं रजतम्' इत्यनुवादः ॥ पं. पा. ४९८.

[अत्र विवरणम् – 'नाहं कर्ता ब्रह्माहम्' इति व्युत्क्रमेण संबन्धः । 'ब्रह्माहम्' इति वाक्यार्थबोधे, 'अहं ब्रह्मैव चेत्, नाहं कर्ता' इति नान्तरीयकबोधः । 'नेदं रजतम्' इत्यत्रापि एषैव योजना ॥ पं. वि. पा. ४९९.]

सुस्फुटमत्र यत्, ब्रह्मज्ञानं प्रथमं जायते, तेनैवाध्यासनिरासश्च – इति । एतदेव टीकाकृदभिमतमिति च । तस्योपसंहारवाक्यादपि विज्ञायते –

(६) तदेवम् अशाब्दम् अविद्याविलयं मन्वानः श्रुतिन्यायकोविदो भगवान् भाष्यकारो विषयात् पृथङ् निर्दिशति 'अस्यानर्थहेतोः प्रहाणाय' इति। चतुर्थीप्रयोगोऽपि विद्यासामर्थ्यसिद्धिमभिप्रेत्य। न तदर्थमुपादानम्। प्रयोजनत्वं च पुरुषार्थाकाङ्क्षयैवास्तु ॥ पं. पा. ५०१.

विवरणं चास्य –

(७) ननु ब्रह्मविद्याफलम् अनर्थहेतुनिरासो न वेदान्तारम्भफलम्, तत्र कथं 'प्रहाणाय वेदान्ताः ?' इत्याशङ्क्य आह 'चतुर्थीप्रयोगोऽपि' इति। उपादानम् वेदान्तारम्भः इत्यर्थः। तर्हि ब्रह्मविद्याफलत्वान्न शास्त्रस्य अनर्थनिरासः प्रयोजनम्। न। परम्परयापि पुरुषाकाङ्क्षितप्रयोजनत्वोपपत्तेः – इत्याह 'प्रयोजनत्वं च' इति ॥ पं. वि. पा. ५०१.

इति। इदं त्विह वक्तव्यम् 'किमिदं ब्रह्मविषयकं ज्ञानं नाम, यदुत्पत्तिनान्तरीयकम् अनर्थप्रहाणमिष्यत इति। न हि ब्रह्म वेदितुरात्मैव चिद्रूपं च सत् स्वविषयकं ज्ञानमन्यदपेक्षते घटादिवत् इति युज्यते। न च कृत्स्नेऽपि सूत्रभाष्ये 'ब्रह्मविषयकं ज्ञानं शास्त्रेण जन्यते, यन्नान्तरीयकतया विपरीतज्ञानादिकं निरस्यते' इत्युक्तमुपलभामहे। प्रत्युत सन्ति वाक्यानि प्रस्थानत्रयभाष्येषु सर्वेष्वपि प्रतिबन्धनिरासमूलकमेव ब्रह्मज्ञानमवाप्यत इति वदन्ति। तद्यथा –

(1) तत् पुनर्ब्रह्म प्रसिद्धम्, अप्रसिद्धं वा स्यात्। यदि प्रसिद्धम्, न जिज्ञासितव्यम्, अथ अप्रसिद्धम्, नैव शक्यं जिज्ञासितुमिति। उच्यते – अस्ति तावद् ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावम्, सर्वज्ञम्, सर्वशक्तिसमन्वितम्। ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते। बृंहतेर्धातोरर्थानुगमात्। सर्वस्यात्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिः। ........ यदि तर्हि लोके ब्रह्म आत्मत्वेन प्रसिद्धमस्ति, ततो ज्ञातमेवेत्यजिज्ञास्यत्वं पुनरापन्नम्। न। तद्विशेषं प्रति विप्रतिपत्तेः ॥ १-१-१, पा. ६.

[अत्र प्रसिद्धमेव ब्रह्म सर्वस्याऽऽत्मत्वेन न तद्विषयकं ज्ञानं कर्तव्यमस्ति इत्युपेत्य विप्रतिपत्तयस्तु तत्सम्यग्ज्ञाने प्रतिबन्धकाः, तन्निरासार्थं जिज्ञासोपपत्तिरित्युक्तम् ॥]

(2) अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिः – इति चेत्। न। अविद्याकल्पितभेदनिवृत्तिपरत्वात् शास्त्रस्य। .... अतोऽविद्याकल्पितसंसारित्वनिवर्तनेन नित्यमुक्तात्मस्वरूपसमर्पणात् न मोक्षस्यानित्यत्वदोषः ॥ १-१-४, पा. १६.

[अत्र आत्मविषयकं ज्ञापनं नाम तत्र कल्पितभेदनिवर्तनमेवेत्युक्तम् ॥]

(3) बुद्ध्याद्युपाधिकृतं तु विशेषम् आश्रित्य ब्रह्मैव सन् जीवः कर्ता भोक्ता च इत्युच्यते । तस्य उपाधिकृतविशेषपरित्यागेन स्वरूपं ब्रह्म दर्शयितुं 'न वाचं विजिज्ञासीत, वक्तारं विद्यात्' इत्यादिना प्रत्यगात्माभिमुखीकरणार्थम् उपदेशो न विरुद्ध्यते ॥ १-१-३१, पा. ६१.

[वक्त्रादिरूपस्याऽऽत्मनो विज्ञानं नाम वागादिलक्षणविशेषज्ञानपरित्याग एवेत्युक्तमत्र ॥]

(4) यद्यपि च प्रतिपत्तव्य आत्मा निरंशः, तथापि, अध्यारोपितं तस्मिन् बह्वंशत्वं देहेन्द्रियमनोबुद्धिविषयवेदनादिलक्षणम् ; तत्र एकेनावधानेनैकमंशमपोहति, अपरेणापरम् इति युज्यते तत्र क्रमवती प्रतिपत्तिः ; तत्तु पूर्वरूपमेवाऽऽत्मप्रतिपत्तेः ॥ ४-१-२, पा. ४६२.

[अत्र आत्मन्यध्यारोपितांशनिरासार्थमेव वाक्यश्रवणयुक्त्योरभ्यास इत्युच्यते ; तच्च पदार्थभूतात्मज्ञानार्थमिति च ॥ ]

(5) ननु, आत्मनश्चतुष्पात्त्वं प्रतिज्ञाय पादत्रयकथनेनैव चतुर्थस्य अन्तःप्रज्ञादिभ्योऽन्यत्वे सिद्धे 'नान्तःप्रज्ञम्' इत्यादिप्रतिषेधोऽनर्थकः । न । सर्पादिविकल्पप्रतिषेधेनैव रज्जुस्वरूपप्रतिपत्तिवत् त्र्यवस्थस्यैव आत्मनस्तुरीयत्वेन प्रतिपिपादयिषितत्वात् 'तत्त्वमसि' इतिवत् ॥ मां. भा. ७, पा. १८६.

[अत्र परमात्मनि अन्तःप्रज्ञत्वादीनामविद्याध्यारोपितत्वात् तत्प्रतिषेधेनैव परमात्मप्रतिपत्तिरित्याह । 'तत्त्वमसि' इति दृष्टान्तश्च संसारित्वनिषेधेनैव ब्रह्मात्मप्रतिपत्तिरिति हृदयं गमयितुम् ॥ ]

(6) सिद्धादेवाहमित्यस्माद्युष्मद्धर्मो निषिध्यते ।
रज्ज्वामिवाहिधीर्यस्मात् तत्त्वमित्यादिशासनैः ॥ उप. १८-४.

[स्वतःसिद्धब्रह्मात्मस्वरूपादेव कल्पितयुष्मद्धर्मो देहाद्यात्मत्वलक्षणो निषिध्यते इत्यर्थः ॥]

(7) प्रमातृप्रमाणादिव्यापारप्रतिषेधेनैव आगमोऽपि विज्ञापयति, न तु अभिधानाभिधेयलक्षणवाक्यधर्माङ्गीकरणेन । तस्मात्, नागमेनापि स्वर्गमेर्वादिवत् तत्प्रतिपाद्यते । प्रतिपादयित्रात्मभूतं हि तत् । प्रतिपादयितुः प्रतिपादनस्य प्रतिपाद्यविषयत्वात् । भेदे हि सति तद् भवति ॥ बृ. भा ४-४-२०, पा. ९२८.

[वाक्येन साक्षिज्ञापनं न भवति, प्रतिषेधद्वारेणैव तु इत्यत्रोपपत्तिरिहोक्ता ॥]

(8) ज्ञानं च तस्मिन् परात्मभावनिवृत्तिरेव । न तस्मिन् साक्षादात्मभावः कर्तव्यः । विद्यमानत्वात् आत्मभावस्य । नित्यो हि आत्मभावः सर्वस्य अतद्विषय इव प्रत्यवभासते । तस्मात्, अतद्विषयाभासनिवृत्तिव्यतिरेकेण न तस्मिन् आत्मभावो विधीयते । अन्यात्मभावनिवृत्तौ आत्मभावः स्वात्मनि

स्वाभाविको यः स केवलो भवतीत्यात्मा 'ज्ञायत' इत्युच्यते। स्वतश्च अप्रमेयः प्रमाणान्तरेण न विषयीक्रियते इति उभयमप्यविरुद्धमेव ॥ बृ. भा. ४-४-२०, पा. ९२८.

(9) न हि आत्मा नाम कस्यचिदप्रसिद्धो भवति। शास्त्रं तु अन्त्यं प्रमाणम् आत्मनोऽतद्धर्माध्यारोपणमात्रनिवर्तकत्वेन प्रामाण्यमात्मनः प्रतिपद्यते, न त्वज्ञातार्थज्ञापकत्वेन ॥ गी. २-१८, पा. १६.

अत्रेदमनुसंधेयम्। अनात्मभूतशुक्त्यादितत्त्वावगमे तत्राध्यारोपितरजतादिविकल्पनिह्नव एव नालम्, 'शुक्त्याद्येवेदम्' इति विशिष्टज्ञानसमुत्पत्तिरप्यपेक्ष्यते, यत्कारणं विकल्पान्तरनिवृत्तावपि विकल्पान्तरानुवृत्तौ नास्ति तत्र बाधकम्। अद्वितीयात्मविषये पुनर्विकल्पनकालेऽपि विद्यत एवात्मप्रत्यय इति तस्मिन् अनात्मप्रतीतिनिवृत्तिरेवालं भवति तत्त्वाधिगमाय। विपरीतग्रहणमात्रप्रतिबद्धत्वान्नित्यसिद्धचिन्मात्रस्वरूपविज्ञानस्येति। तदेवं सिद्धमिदं यत् तत्त्वावद्योतिज्ञानान्तरापेक्षा स्वात्मन्यप्यस्ति अध्यासनिवृत्तिव्यतिरेकेण बाह्यविषयेष्विव – इति टीका भाष्यासम्मतेति ॥

अविद्याविलयो न शाब्द इति चात एव भाष्यविरुद्धा टीका। अनुभवविरुद्धा च। यत आह भाष्यकारः –

(10) यावद् हि अविद्या न निवर्तते तावद् धर्मादिगोचरत्वं जीवस्य जीवत्वं च न निवर्तते। तन्निवृत्तौ तु प्राज्ञ एव 'तत्त्वमसि' इति श्रुत्या प्रत्याय्यते। न च अविद्यावत्त्वे तदपगमे च वस्तुनः कश्चिद् विशेषोऽस्ति ॥ १-४-६, पा. १५४.

इति ॥

[अविद्यानिवृत्तावेव तात्पर्यं श्रुतेः। सा च तन्निवृत्तौ प्राज्ञस्य प्राज्ञत्वमनुवदतीत्युक्तमत्र ॥]

(11) द्वैताभावे शास्त्रव्यापारो नाद्वैते, विरोधात्; ........ 'सिद्धं तु निवर्तकत्वात्' इत्यागमविदां सूत्रम् ॥ गौ.का.भा. २-३२, पा. २०४, २०५ इति ॥

अस्ति च माण्डूक्यभाष्यवचनान्तरं टीकाभिप्रायविरोधि –

(12) अन्तःप्रज्ञत्वादिप्रतिषेधविज्ञानप्रमाणसमकालमेव आत्मन्यनर्थप्रपञ्चनिवृत्तिलक्षणफलं परिसमाप्तमिति तुरीयाधिगमे प्रमाणान्तरं साधनान्तरं वा न मृग्यम् ॥ मां. भा. ७, पा. १८६.

अपि च 'आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते' इत्यत्र ब्रह्मात्मन एकत्वमेव प्रतिपत्तव्यतया विवक्षितम्, सा च प्रतिपत्तिर्जीव-जगतोरभावे सत्येवेत्यतोऽन्यनिषेधज्ञानद्वारैव भवतीत्यत्र गमकमिदं वाक्य-चतुष्टयम् –

(13) एतदुक्तं भवति .... वाचारम्भणं विकारो नामधेयम्, वाचैव केवलम् अस्ति इत्यारभ्यते विकारः, 'घटः', 'शरावः', 'उदञ्चनं च' इति। न तु वस्तुवृत्तेन विकारो नाम कश्चिदस्ति। नामधेयमात्रं ह्येतदनृतम्, मृत्तिकेत्येव सत्यमिति। एष ब्रह्मणो दृष्टान्त आम्नातः। तत्र श्रुताद् वाचा-रम्भणशब्दाद्दार्ष्टान्तिकेऽपि ब्रह्मव्यतिरेकेण कार्यजातस्य अभावः–इति गम्यते॥ २–१–१४, पा. १९६.

(14) 'आरम्भणशब्दादिभ्यः' इति आदिशब्दात् 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि' (छां. ६-८-७), 'इदं सर्वं यदयमात्मा' (बृ. २-४-६), 'ब्रह्मैवेदं सर्वम्' (मुं. २-२-११), 'आत्मैवेदं सर्वम्' (छां. ७-२५-२), 'नेह नानास्ति किञ्चन' (बृ. ४-४-११) – इत्येवमाद्यपि आत्मैकत्वप्रतिपादनपरं वचनजातम् उदाहर्तव्यम्॥ २-१-१४, पा. १९७.

[अत्र जगतो जीवस्य च ब्रह्मस्वरूपत्वमेव 'आत्मैकत्वं' नामेत्युच्यते प्रतीतरूपविशेष-बाधनेन इति स्पष्टम्॥]

(15) दर्शयति च श्रुतिः पररूपप्रतिषेधेनैव ब्रह्म, निर्विशेषत्वात् 'अथात आदेशो नेति नेति', 'अन्यदेव तद्विदितादथो अविदितादधि', 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह'- इत्येवमाद्या। बाष्कलिना च बाध्वः पृष्टः सन्नवचनेनैव ब्रह्म प्रोवाच इति श्रूयते। 'स होवाच अधीहि भो इति स तूर्ष्णीं बभूव तं ह द्वितीये वा तृतीये वा वचन उवाच ब्रूमः खलु त्वं तु न विजानासि। उपशान्तोऽयमात्मा' इति। तथा स्मृतिष्वपि परप्रतिषेधेनैवोप-दिश्यते 'ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते। अनादिमत् परं ब्रह्म न सत्तन्नासदुच्यते' इत्येवमाद्यासु। तथा विश्वरूपधरो नारायणो नारदमुवाचेति स्मर्यते – 'माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद। सर्वभूतगुणैर्युक्तः नैवं मां ज्ञातुमर्हसि॥' इति॥ ३-२-१७, पा. ३५८.

(16) अत एव चायमात्मा चैतन्यरूपो निर्विशेषो वाङ्मनसातीतः पर-प्रतिषेधोपदेश्यः, अत एव चास्य उपाधिनिमित्ताम् अपारमार्थिकीं विशेषवत्ताम् अभिप्रेत्य जलसूर्यकादिवत् इत्युपमा उपादीयते मोक्षशास्त्रेषु 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्। उपाधिना क्रियते भेदरूपो जीवः क्षेत्रेष्वेवमजोऽयमात्मा' इति। 'एक एव हि भूतात्मा भूते भूते

व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥' इत्येवमादिषु ॥ ३-२-१८, पा. ३५९.

[इदं वाक्यम्, न केवलम् आत्मानं परप्रतिषेधोपदेश्यमाह, यावत् प्रतिबिम्बादिरूपम् अपारमार्थिकम् इत्यपि । अतः प्रतिबिम्बवादे पक्षपातः पञ्चपादिकाविवरणयोः (खं. ३६, पा. ६६) न भाष्याभिमत इति गम्यते ॥]

स्वाभ्युपगमविरुद्धश्चायं वादः, यत उदर्के समन्वयसूत्रभाष्यव्याख्याने अभ्युपगम्यते स्वेनापि आत्मनोऽविषयत्वात् अविद्याकल्पितभेदनिवृत्तिपरत्वमेव शास्त्रस्येति । तत्र हि **टीकाकारो** वक्ष्यति –

(८) प्रमाणादिचतुष्टयस्य युगपत्प्रलयेऽपि तदवच्छेदानुभवफलं वाक्यनिबन्धनम् । अतो वेदैकगोचरो निर्वाणम् इति वेदविदः प्रतिपेदिरे । तथा चैवंविधस्य प्रमाणव्यापारस्य प्रकाशका मन्त्रब्राह्मणवादा भाष्ये दर्शिताः ॥ पं. पा. ११३२-११३३.

इति । **विवरणकारश्च** –

(९) ननु किमित्यविद्यानिवृत्तिरेव प्रमाणफलमुच्यते ? विषयप्रकाशोऽपि प्रमाणफलमुच्यतामिति । तत्राह 'तथा चैवंविधस्य' इति ॥ पं.वि. पा. ११३२ इति ॥

## विद्याप्रतिपत्तिविषये शङ्कासमाधाने

४८. वेदित्राश्रयत्वाद् विद्यायाः तत्प्रतिपत्तिः किंरूपा विवक्ष्यते इत्याशङ्क्य प्राह **टीकाकारः** –

(१) न हि विद्या गवादिवत् तटस्था सिध्यति, येनाप्तिः पृथगुपादीयेत । सा हि वेदित्राश्रया वेद्यं तस्मै प्रकाशयन्त्येवोदेति । सत्यमेवम्, अन्यत्र ; प्रकृते पुनर्विषये विद्या उदितापि न प्रतिष्ठां लभते । असम्भावनाभिभूतविषयत्वात् । तथा च लोकेऽस्मिन् देशे काले च इदं वस्तु स्वरूपत एव न सम्भवतीति दृढभावितम्, यदि तत् कथञ्चिद्दैववशादुपलभ्येत, तदा स्वयमीक्षमाणोऽपि तावन्नाध्यवस्यति यावत् तत्सम्भावं नानुसरति । तेन सम्यग्ज्ञानमपि स्वविषये अप्रतिष्ठितम् अनवाप्तमिव भवति । तेन तत्स्वरूपप्रतिष्ठार्थं तर्कं सहायीकरोति । अत एव प्रमाणानाम् अनुग्राहकस्तर्क इति तर्कविदः ॥ पं. पा. ५०२-५०३.

अत्र उदिता विद्या, प्रतिष्ठां तु न लभते–इति कथमिदं सम्भवेदिति शङ्का समुन्मिषेत् ; तत्र **विवरणम्** –

(२) अत्र 'विद्या' इति शक्तितात्पर्यविचारसहकृतात् शब्दात् यत् प्रमाणज्ञानम् उत्पद्यते, तदभिधीयते। तस्य प्रतिष्ठा स्वविषयेण सह आपरोक्ष्यम् इति। तत्र 'असम्भावना' इति चित्तस्य ब्रह्मात्मपरिभावनाप्रचयनिमित्त-तदेकाग्रवृत्त्ययोग्यता उच्यते; 'विपरीतभावना' इति शरीराद्यध्याससंस्कार-प्रचयः। ननु अपरोक्षावभासनिमित्तप्रमाणगृहीते वस्तुनि नोभयविधचित्त-दोषात् अपरोक्षनिश्चयाभावदर्शनमस्तीति, तत्राह 'तथा च लोके अस्मिन् देशे काले' इति। यथा दूरदेशवर्तिनि आर्द्रमरीचादिफलादौ तथाविधवस्तु-दर्शनसंस्कारशून्यतया विपरीतसंस्कारवत्तया च प्रत्यक्षदृष्टेऽपि न निश्चिनोति। असंभावितविशेषांशापरोक्षनिश्चयो नोत्पद्यत इत्यर्थः॥ पं॰ वि॰ पा॰ ५०२.

अत्र टीकायां विवरणे च ज्ञानस्य समुत्पत्तावपि असम्भावनादिनिवृत्त्यर्थं तर्क आद्रियत इत्युक्तम्। उत्तरत्र हि एवं वक्ष्यते –

(३) क तर्हि तर्कस्योपयोगः? विषयासम्भवाशङ्कायां तथा अनुभव-फलानुत्पत्तौ तत्सम्भवप्रदर्शनमुखेन फलप्रतिबन्धविगमे। तथा च तत्त्वमसि-वाक्ये त्वंपदार्थो जीवः, तत्पदार्थब्रह्मस्वरूपताम् आत्मनोऽसम्भावयन् विपरीतं च रूपं मन्वानः, समुत्पन्नेऽपि ज्ञाने तावन्नाध्यवस्यति यावत् तर्केण विरोधम् अपनीय तद्रूपतामात्मनो न सम्भावयति। अतः प्राग् विद्या उदितापि वाक्यात् अनवाप्तेव भवति। अवाप्तिप्रकारश्च वेदान्तेष्वेव निर्दिष्टः साक्षादनुभवफलोद्देशेन। तेनोच्यते 'विद्याप्रतिपत्तये' इति॥ पं॰ ५०८, ५१२.

अत्र बाह्ये प्रत्यक्षादिप्रमाणगम्ये वस्तुनि तावद्देशकालविशेषपरिच्छिन्न-त्वेनावगते देशान्तरे कालान्तरे उपलब्धे स्यादप्यसम्भावना कथं न्विदं संभवे-दिहाद्येति। सर्वोपलब्धरि तु वाक्यजन्यज्ञानात् प्रागप्यपरोक्षे कथङ्कार-मसम्भावनाशङ्का? – इति चिन्त्यमेतत्। आह हि भाष्यकृत् –

(1) भवेदपि कदाचिद् बाह्यवस्तुनि विप्रलम्भसम्भवात् 'तदेवेदं स्यात्, तत्सदृशं वा' इति सन्देहः। उपलब्धरि तु सन्देहोऽपि न कदाचिद् भवति 'स एवाहं स्याम्, तत्सदृशो वा' इति। य एवाहं पूर्वेद्युरद्राक्षम्, स एवाह-मद्य स्मरामीति निश्चिततद्भावोपलम्भात्॥ २-२-२५, पा॰ २४५.

इति॥

अथ मतम्, 'तत्त्वमसि' इतिवाक्येन ज्ञातेऽपि ब्रह्मस्वरूपे जीवस्य असम्भावना स्यादेव, अननुभूतपूर्वत्वात् असंसार्यात्मतत्त्वस्येति। नैतच्छक्यम्। यत आह भाष्यकृदत्रापि –

(2) प्रत्यक्षफलत्वाच्च ज्ञानस्य फलविरहाशङ्कानुपपत्तिः । कर्मफले हि स्वर्गादौ अनुभवानारूढे स्यादाशङ्का 'भवेद् वा न वा' इति । अनुभवारूढं तु ज्ञानफलम् ' यत्साक्षादपरोक्षाद्ब्रह्म ' इति श्रुतेः । 'तत्त्वमसि' इति च सिद्धवदुपदेशात् ॥ ३-३-३२, पा. ४०७.

इति ॥

अथ स्यात् – वाक्येन ज्ञानोत्पत्तिं नावजानीमहे । उत्पन्नेऽपि तस्मिन् स्यादसम्भावना इत्युत्पश्यामः । लोके तथा दृष्टत्वात् इति । न लोकवदिह भाव्यम् । लोके हि वस्तुज्ञानं देशकालपरिच्छिन्नमिति स्यादप्यसम्भावना – कथं नु स्यादेतदिति ; तेन तदुत्सारणाय तर्कोऽप्यपेक्षित इति युक्तम् । इह पुनर्वाक्यज्ञानमेव तादृशं येन ' निरस्तसर्वदेशकालादिप्रपञ्चं ब्रह्माहम् ' इत्येवावधारयति । न च वाक्यादेव केवलात् तादृशं ज्ञानं नोत्पद्यत एव कस्यचित् – इति शङ्क्यम् । यतस्तत्राप्याह भगवान् भाष्यकारः –

(3) येषां पुनर्निपुणमतीनां नाज्ञानसंशयविपर्ययलक्षणः पदार्थविषयः प्रतिबन्धोऽस्ति ते शक्नुवन्ति सकृदुक्तमेव तत्त्वमसिवाक्यार्थमनुभवितुम् ॥ ४-१-२, पा. ४६२.

अथापि स्यात् – जातेऽपि वाक्यार्थज्ञाने कस्यचिदसम्भावनादि स्यात् विचित्रप्रज्ञत्वादेव प्रतिपत्तॄणाम् इति । न । उक्तोत्तरत्वात् । वाक्यजन्यज्ञानस्य स्वरूपमेव तादृशम् येनासम्भावनैव न सम्भवतीति । किमर्थं तर्हि शास्त्रयुक्त्यभ्यासः ? 'तत्त्वमसि' इत्याद्युपदेशस्थले इति ? तत्र भाष्यकारमतम् –

(4) येषामेतौ (तत्त्वं)पदार्थौ अज्ञानसंशयविपर्ययप्रतिबद्धौ, तेषां 'तत्त्वमसि' इत्येतद् वाक्यं स्वार्थे प्रमां नोत्पादयितुं शक्नोति । पदार्थज्ञानपूर्वकत्वात् वाक्यार्थस्य – इत्यतस्तान् प्रत्येष्टव्यः पदार्थविवेकप्रयोजनः शास्त्रयुक्त्यभ्यासः । यद्यपि च प्रतिपत्तव्य आत्मा निरंशः, तथापि अध्यारोपितं तस्मिन् बह्वंशत्वं देहेन्द्रियमनोबुद्धिविषयवेदनादिलक्षणम् । तत्र एकेनावधानेन एकमंशम् अपोहति, अपरेणापरम् इति युज्यते तत्र क्रमवती प्रतिपत्तिः । तत्तु पूर्वरूपमेव आत्मप्रतिपत्तेः ॥ ४-१-२, पा. ४६२.

इति ॥

या पुनः ' अवगतिपर्यन्तं ज्ञानं सन्वाच्यायाः इच्छायाः कर्म ' इति भाष्यव्याख्यानावसरे टीका –

(4) अवगतिरिति साक्षादनुभव उच्यते । ज्ञानं तु परोक्षे अनुभवानारूढेऽपि संभवति । संनिहितेऽपि असम्भावितविषये अनवसितरूपम् इत्युक्तं पुरस्तात् ॥ पं. पा. ७७३-७७४.

इति । तद्विवरणं च –

(5) ननु प्रथममेव अवगतिरुत्पद्यते । तत्राह – 'ज्ञानं तु परोक्षे' इति । शब्दात् परोक्षतया अवगते अपरोक्षज्ञानमिष्यत इत्यर्थः । यदा पुनः शब्दादपरोक्षज्ञानमुत्पद्यते, तत्राह – 'संनिहितेऽपि' इति ॥ पं. वि. ७७३.

इति । तत्र शब्दात् परोक्षज्ञानं तदूर्ध्वं तर्कसाहाय्यापेक्षया अपरोक्षज्ञानम् – इत्येतत् टीकासंमतं न वा इति निस्संशयं निश्चेतुं न शक्यते । यत इह उदितापि विद्या न प्रतिष्ठां लभते इति सुस्पष्टमुक्तम् । 'ज्ञानं तु' इत्यत्र परोक्षज्ञानं शब्दादेवेत्युक्तमित्यत्र तु विवरणव्याख्यानमेव शरणम् । तत्र तु मतद्वयमप्युररीकृतमिति 'वस्तुनि क्रियायामिव विकल्पाभावः' इति भाष्यसम्मतपरिभाषा समुपेक्षितेति स्पष्टमेव ॥

सर्वथापि तु सिद्धमेतद् यत् टीकाप्रस्थानस्य भाष्यप्रस्थानाद् वैलक्षण्यमेव विद्याप्रतिपत्तिविषये इति । यतः पञ्चपादिकाकार आह वाक्येनोदितापि विद्या न प्रतिष्ठां लभते, अवाप्साप्यनवाप्तेव भवतीति । तर्कस्यापि वाक्यजन्यज्ञानगतासम्भावनानिराकरणमेव कृत्यमिति च । भाष्यकारः पुनर्वाक्यज्ञानस्यानुभवारूढविषयत्वात् नासंभावनासंभव इत्याह । तर्कस्य च वाक्यार्थप्रतिपत्तेः पूर्वमेव व्यापारः– इति चेति ॥

## साक्षात्कारवादो न भाष्यसम्मतः

४९. अत्रेदमपि प्रसङ्गाद् वैलक्षण्यं भाष्यप्रस्थानव्याख्यानप्रस्थानयोः सङ्क्षेपेणोपन्यस्तव्यं विचारपरिपूर्तये यत् भाष्यकारस्तावदाह वेदान्तवाक्यार्थप्रतिपत्तिरेव त्वनुभवो नाम, न वाक्यार्थज्ञानादन्यदप्यस्ति साक्षादनुभवरूपं ज्ञानं नामेति, न तु व्याख्यानकारा इव वाक्यात् परोक्षज्ञानं प्रथमम् उत्पद्यते, ततः प्रयत्नान्तरादपरोक्षानुभव इति । तथा हि –

(१) उदाहृतमेव तावट्टीकाकारप्रस्थानमधस्तात् विवरणमतेन–अवगति-

रिति साक्षादनुभव उच्यते । ज्ञानं तु परोक्षे अनुभवानारूढेऽपि संभवति – इति ॥

[अत्र विवरणमतेन 'ज्ञानं तु' इति शाब्दं ज्ञानं विवक्षितमित्यवोचाम ॥]

(२) भामतीकारस्तु 'तत्तु पूर्वरूपमेवात्मप्रतिपत्तेः' (४-१-२) इति भाष्याक्षराणि व्याख्यास्यन्नाह –

**"तत्किमियमेव वाक्यजनिता प्रतीतिरात्मनि, तथा च न साक्षात्प्रतीतिरात्मनि, अनागम[1] फलत्वादस्याः इत्यत आह – तत्तु पूर्वरूपमेवात्मप्रतिपत्तेः साक्षात्कारवत्याः । एतदुक्तं भवति – वाक्यार्थश्रवणमननोत्तरकाला विशेषणत्रयवती भावना ब्रह्मसाक्षात्काराय कल्पत इति वाक्यार्थप्रतीतिः साक्षात्कारस्य पूर्वरूपमिति ॥ वा॰ भा॰ ४-१-२, पा॰ १३५.**

अत्र शास्त्रयुक्त्यभ्यासः पदार्थविवेकप्रयोजनः, अध्यारोपितबह्वंशत्वनिराकरणार्थः, तच्च बह्वंशत्वं पूर्वरूपमेव आत्मप्रतिपत्तेरित्युक्तं भाष्ये । तत्र क्वचिदपि केनचिदप्यनाघ्रातपूर्वः साक्षात्कारवादो भाष्याक्षराणि अन्यथैव योजयित्वा भाष्याभिप्रायत्वेन निर्दिष्टो भामतीकारेण । यथोदाहृतभाष्यवाक्ये हि 'पदार्थविवेकप्रयोजनः शास्त्रयुक्त्यभ्यासः' इति कण्ठरवेणोक्त्वा पठितं 'युज्यते तत्र क्रमवती प्रतिपत्तिः' इति, 'तत्तु पूर्वरूपमेव आत्मप्रतिपत्तेः' इति च । अत्रैव खलु सूत्रे सुस्फुटमाह भगवान् ये निपुणमतयस्ते शक्नुवन्ति 'सकृदुक्तमेव' तत्त्वमसिवाक्यार्थमनुभवितुम् – इति । अपि च समन्वयाधिकरणभाष्ये इदं वाक्यमुपलभ्यते –

**(1) यत् पुनरुक्तम् – श्रवणात् पराचीनयोर्मनननिदिध्यासनयोर्दर्शनात् (योर्विधिदर्शनात् ?) विधिशेषत्वं ब्रह्मणः, न स्वरूपपर्यवसायित्वमिति । न । अवगत्यर्थत्वान्मनननिदिध्यासनयोः । यदि ह्यवगतं ब्रह्मान्यत्र विनियुज्येत भवेत् तदा विधिशेषत्वम् । न तु तदस्ति मनननिदिध्यासनयोरपि श्रवणवदवगत्यर्थत्वात् ॥ १-१-४, पा॰ २३.**

इति । अत्र मनननिदिध्यासनयोरपि 'श्रवणवत्' अवगत्यर्थत्वम् इति वचनात् गम्यते येषां श्रवणमात्रेण नावगतिः, तेषां मनननिदिध्यासने इति । तेन 'श्रवणमननोत्तरा विशेषणत्रयवती भावना ब्रह्मसाक्षात्काराय' इति टीका

---

1. 'अनागत' इति पाठान्तरम् ॥

श्रवणमात्रादप्यवगतिं सम्भावयता भाष्येण विरुध्यत इत्यवगम्यते । किञ्च वाक्यश्रवणमात्रान्न साक्षादनुभव इत्यभिप्रायेण पूर्वपक्षिणा समानीतं शङ्कान्तरमेवं प्रतिनीतं भाष्ये –

(2) **ननु श्रुतब्रह्मणोऽपि यथापूर्वं संसारित्वदर्शनान्न रज्जुस्वरूपकथनवदर्थवत्त्वमित्युक्तम् । अत्रोच्यते – नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वं शक्यं दर्शयितुम्; वेदप्रमाणजनितब्रह्मात्मभावविरोधात् ॥ १-१-४, पा. २१.**

इति । अत्र व्यक्तमिदं यत् श्रवणमात्रादेव यस्यावगतिर्जायते न तस्य पुनः संसारित्वं शक्यं दर्शयितुम् इत्यभिप्रायो भाष्यवाक्यस्येति । इहापि च **आवृत्त्यधिकरणे** 'ये शक्नुवन्ति सकृदुक्तमेव तत्त्वमसिवाक्यार्थमनुभवितुम् तान् प्रत्यावृत्त्यानर्थक्यमिष्टमेव' इत्युक्तेः, वाक्यप्रमाणमात्रात् साक्षात्प्रतीतिर्न भवतीति मतं भाष्यविरुद्धमित्यवगम्यते । उत्तरत्र च –

(3) **न चैवमात्मानमनुभवतः किञ्चिदन्यत् कृत्यमवशिष्यते ॥ ४-१-२, पा. ४६३.**

इति स्पष्टमेव वाक्यार्थजन्यानुभववतः कृत्यान्तरं नास्त्येवेति वदन् भाष्यकारः 'श्रवणमननोत्तरा विशेषणत्रयवती भावनैव साक्षात्काराय' इति वादं नानुमनुत इति गम्यते ॥

योऽपि **पञ्चपादिकाविवरणकारेण** तर्कस्य पारिभाषिकमर्थान्तरम् अभ्यूह्य पञ्चपादिकोक्तब्रह्मापरोक्ष्यवादात् अन्योऽपि वादः कल्पितः, शब्द एव प्रथमं ब्रह्मणि परोक्षज्ञानम् उत्पाद्य पुनस्तर्कापेक्षया द्वितीयम् अपरोक्षज्ञानमुत्पादयतीति, यदपि च टीकाभिप्रायव्याख्यानम् 'सर्वथापि आपरोक्ष्यस्य प्रयत्नान्तरलभ्यत्वात् युक्तं पृथक् प्रतिपत्तिशब्दग्रहणम्' (पं.वि.पा. ५१८) इति तदुभयमपि प्रकृतटीकाप्रतिकूलम्, भाष्यविरुद्धं चेत्युपेक्ष्यते । **अधिकं तु 'प्रक्रियाप्रत्यभिज्ञा'तः, 'सूत्रभाष्यार्थविमर्शिनी'तश्चाधिगन्तव्यम् ॥**

अपि च टीकाकारस्याभिप्रायः साक्षात्कारविषये अन्योऽप्यस्तीति विज्ञायते तद्वाक्यान्तरात् । तद्यथा शास्त्रारम्भप्रकारान् विविधान् अनुक्रम्य परिशीलयितुं प्रवृत्तः पञ्चपादिकाकारः 'शाब्दज्ञानान्न तथानुभवः, तेन

साक्षात्करणाय विधिः' इति मतमुत्थाप्य (पं. पा. ५५७), तस्मिन् निरस्ते ज्ञानसन्तानविधिवादमुद्भाव्य तत्रापि विधिर्न श्रूयते (पं. पा. ५५९) इति शङ्कायां मतान्तरमुपन्यस्यति, प्रतिवक्ति चेत्थम् –

(२) ननु किमत्र श्रवणेन ? स्वयमेव साक्षात्कारकरणाय पुरुषार्थत्वादभिमुखः पुरुषः। सिद्धश्च ज्ञानाभ्यासः शास्त्रश्रवणादौ साक्षात्करणे हेतुः। यद्येवम्, किं विधिना ? स्वयमेव पुरुषार्थे निर्ज्ञाते हेतौ प्रवर्तते ॥ पं.पा.५६०

इति। अत्र ज्ञानाभ्यासः साक्षादनुभवे हेतुरिति पूर्वपक्षिमतमनुमोदितम् इति स्पष्टम्। यद्येवं शब्दात् परोक्षं ज्ञानं भवति, तदभ्यासाच्च साक्षात्कारः – इत्युक्तमेव भवति। संनिहिते विषये कथं परोक्षं ज्ञानम् ?– इत्यत्र टीकाकृतः कः समाधिरिति तु न साक्षात् पञ्चपादिकातः कुत्रापि विज्ञायते ॥

इदमपि भाष्यवाक्यं सावधानम् अर्थतो विमृशन्तु तत्त्वार्थनिर्धारणरसिकाः प्रकृतचिन्ताविषयाध्यवसानाय –

(4) अपि चान्त्यमिदं प्रमाणम् आत्मैकत्वस्य प्रतिपादकं नातः परं किञ्चिदाकाङ्क्ष्यमस्ति। यथा हि लोके 'यजेत' इत्युक्ते 'किम् ?', 'केन ?' 'कथम् ?' इत्याकाङ्क्ष्यते, नैवं 'तत्त्वमसि', 'अहं ब्रह्मास्मि' इत्युक्ते किञ्चिदन्यदाकाङ्क्ष्यमस्ति। सर्वात्मैकत्वविषयत्वावगतेः। सति हि अन्यस्मिन् अवशिष्यमाणे अर्थे आकाङ्क्षा स्यात्। न तु आत्मैकत्वव्यतिरेकेणावशिष्यमाणोऽन्योऽर्थोऽस्ति य आकाङ्क्ष्येत। न चेयम् अवगतिर्नोत्पद्यत इति शक्यं वक्तुम्; 'तद्धास्य विजज्ञौ' इत्यादिश्रुतिभ्यः। अवगतिसाधनानां च श्रवणादीनां वेदानुवचनादीनां च विधानात्। न चेयमवगतिरनर्थिका भ्रान्तिर्वा इति शक्यं वक्तुम्। अविद्यानिवृत्तिफलदर्शनात्, बाधकज्ञानान्तराभावाच्च। प्राक्चात्मैकत्वावगतेरव्याहतः सर्वः सत्यानृतव्यवहारो लौकिको वैदिकश्च – इत्यवोचाम ॥ २-१-१४, पा. १९९, २००.

वाक्यजन्यज्ञानोदयात् परमपि असम्भावनाविपरीतभावनयोरवकाशो विद्यते इति टीकाकारमतम् यथोदाहृतभाष्यवाक्यैः सर्वथा विरुध्यते, विशिष्य चान्तिमेन वाक्येन आत्मैकत्वज्ञानोत्पादकं तत्त्वमस्यादिवाक्यम् अन्त्यप्रमाणत्वेन व्यपदिशता प्रबलतरयुक्त्यनुभवाभ्याम् उपबृंहितेन इति सुस्पष्टम् ॥

## विद्यया अविद्यानिवृत्तिः किं निःशेषा किं वा सावशेषा ?

५०. अथ विद्यया अशेषतोऽविद्यानिवृत्तौ द्वैतदर्शनस्य सर्वथा असम्भवे कथङ्कारं कस्यचिज्जीवन्मुक्तता उपपद्येत ? यदि पुनर्जीवन्मुक्तो नाम न कश्चित्, तर्हि कः खलु स्यादाचार्यो यः शिष्यान् विद्योपदेशेन तारयेत् ?– इत्युभयतःपाशा रज्जुः इत्यद्वैतवादिनाम् अविद्योत्थं द्वैतमातिष्ठमानानां मते चोदना परेषाम् । अत्र टीका –

**(१) ननु आत्मैकत्वविद्याप्रतिपत्तिर्नानर्थहेतुप्रहाणाय प्रभवति । तथा हि जीवस्य कार्यका(क?)रणसङ्घातादन्यत्वप्रतिपत्तेर्ब्रह्मस्वरूपताप्रतिपत्तिर्न विशिष्यते । उभयत्राप्यहङ्कारग्रन्थेर्मनुष्याभिमानपर्यन्तस्य अविकलम् अनुवर्तमानत्वात् । उच्यते । भवतु तत्राविद्याया अनिवर्तितत्वात् तत् । इह पुनरपसारिताऽविद्यादोषं ब्रह्मात्मज्ञानमुदयमासादयत् कथं तन्निमित्तभोक्त्रादिग्रन्थिप्रवाहं नापनयति ? न हि जीवस्य ब्रह्मात्मावगमः, तद्विषयानवगममबाधमान उदेति ॥ पं. पा. ५१२–५१३.**

[सकृदुत्पन्नैव हि आत्मप्रतिपत्तिः, 'अविद्यां निवर्तयति' इति यथोदाहृतभाष्यसमानार्थेयं टीका ॥ ].

**(२) ननु ब्रह्मज्ञानादग्रहणापाये तन्निमित्तस्य अहङ्कारग्रन्थेस्तत्कालमेव अभावः प्रसज्येत । न । संस्कारादपि अग्रहणानुवृत्तेः सम्भवात् । भयानुवृत्तिवत् । तथा हि सम्यग्ज्ञानान्निवृत्तमपि भयं स्वसंस्कारादनुवर्तते । कम्पादिनिमित्तं च भवति । तथा अग्रहणमपि स्वसंस्कारादनुवर्तते । अहङ्कारग्रन्थेश्च निमित्तं भवतीति न किञ्चिदनुपपन्नमस्ति ॥ पं. पा. ५१३–५१५.**

### विवरणम् –

**(३) ननु ब्रह्मापरोक्षज्ञानमपि नानर्थनिवृत्तिनिमित्तम् । सत्यपि तस्मिन् संसारानुवृत्तिदर्शनात् । अन्यथा सद्य एव शरीरपातः स्यात् इति चोदयति 'नन्वात्मैकत्वविद्याप्रतिपत्तिः' इति । .... न हि जीवस्येति । अनवबोधविरुद्धं तत्त्वज्ञानम्, न व्यतिरेकज्ञानम् इत्यर्थः । ....'तत्त्वज्ञानादविद्यानिरोधेऽपि पुनर्वृत्तिर्युज्यत इत्याह – न संस्कारात्' इति ॥ पं वि. पा. ५१२–५१३.**

अत्र विवरणकृत् अज्ञानतत्कार्ययोरपि संस्कारः संभाव्यत इत्युपपाद्य लिखति स्म –

**(४) ननु संस्कारात् स्मृतिमात्रहेतोः कथमपरोक्षद्वैतावभासः स्यात् ? अविद्यावत् संस्कारस्यापि चैतन्यदोषत्वादिति वदामः । अपरोक्षावभासकारणगतो दोषोऽपरोक्षभ्रमहेतुः – इति सिद्धत्वात्, आत्ममात्रस्यैव अविद्याश्रयत्ववत्**

संस्काराश्रयत्वोपपत्तेश्च, अविद्यासंस्कारव्यतिरिक्तकार्याणामेव अविद्योपादानत्वात्, आत्मनो मिथ्याभूतसंस्कारोपादानत्वाभावेऽपि आश्रयोपाधित्वावदविरोधात्। तत्त्वज्ञानानुसन्धानादेव च क्रमेण संस्कारनिवृत्तेः कञ्चित्कालमवस्थायैव विदेहमुक्तिर्न विरुध्यते। अविद्यालेशो वा तमोलेशवत् संस्कारशब्देनाभिधीयत इति निरवद्यम्॥ पं. वि. पा. ५१४–५१६.

[अत्राविद्याया एव तावदात्मचैतन्यदोषत्वविषये विप्रतिपत्तिस्थानत्वात् तत्संस्कारलेशादि सर्वमपि अभित्तिचित्रमिति न पृथग् वक्तव्यम्॥]

भाष्यकारीयप्रस्थानरीत्या तु जीवन्मुक्तप्रक्रिया इत्थम् –

(1) तस्मात् मिथ्याप्रत्ययनिमित्तत्वात् सशरीरत्वस्य, सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम्॥ १–१–४, पा. २२.

(2) न हि ईश्वरस्य संसार्यात्मत्वं प्रतिपाद्यत इत्यभ्युपगच्छामः, किं तर्हि संसारिणः संसारित्वापोहेन ईश्वरात्मत्वं प्रतिपिपादयिषितमिति। एवं च सत्या अद्वैतेश्वरस्य अपहतपाप्मत्वादिगुणता, विपरीतगुणता तु इतरस्य मिथ्या इति व्यवतिष्ठते॥ ४–१–३, पा. ४६४, ४६५.

(3) यदप्युक्तम् अधिकार्यभावः, प्रत्यक्षादिविरोधश्च इति। तदप्यसत्। प्राक् प्रबोधात् संसारित्वाभ्युपगमात्, तद्विषयत्वाच्च प्रत्यक्षादिव्यवहारस्य॥ ४–१–३, पा. ४६५.

(4) अकर्त्रात्मबोधोऽपि हि मिथ्याज्ञानबाधनेन कर्माण्युच्छिनत्ति। बाधितमपि तु मिथ्याज्ञानं द्विचन्द्रज्ञानवत् संस्कारवशात् कञ्चित् कालम् अनुवर्तत एव॥ ४–१–१५, पा. ४७५.

यथोदाहृतवाक्यानामर्थे परिभाविते विज्ञायते यज्जीवस्य क्रियाकारकफलसंबन्धो मिथ्याज्ञानकल्पित एव, ज्ञानिदृष्ट्या तु स नासीदस्ति भविष्यति वेति। एवंविदेव च जीवन्मुक्तो नाम। मिथ्याज्ञानं बाधितमनुवर्तते संस्कारवशात् – इत्यत्र व्यवहारदृष्ट्या मिथ्याज्ञानस्यापि ज्ञानत्वादेव तत्संस्काराद्युपपत्तिः। वस्तुतस्तु –

(5) विद्वांस्तु पुनर्विद्यया अविद्यायां निवृत्तायां शक्नोत्येव अशेषतः कर्म परित्यक्तुम् अविद्याध्यारोपितस्य शेषानुपपत्तेः। न हि तैमिरिकदृष्ट्यध्यारोपितस्य द्विचन्द्रादेस्तिमिरापगमे शेषोऽवतिष्ठते॥ गी. भा. १८–४८, पा. २७८.

(6) एकत्वपक्षे पुनः सनिमित्तस्य संसारस्य अविद्याकल्पितत्वात् अदोषः। तैमिरिकदृष्टस्य हि द्वितीयचन्द्रस्य नात्मलाभो नाशो वा अस्ति॥ तै. भा. २–८, पा. ३१०.

(7) पूर्वसिद्धकर्तृत्वभोक्तृत्वविपरीतं हि 'त्रिष्वपि कालेषु अकर्तृत्वाभोक्तृत्वस्वरूपं ब्रह्माहमस्मि, नेतः पूर्वमपि कर्ता भोक्ता वा अहमासम्, नेदानीम्, नापि भविष्यत्काले' इति ब्रह्मविदवगच्छति। एवमेव च मोक्ष उपपद्यते। अन्यथा हि अनादिकालप्रवृत्तानां कर्मणां क्षयाभावे मोक्षाभावः स्यात्। न च देशकालनिमित्तापेक्षो मोक्षः कर्मफलवद् भवितुमर्हति। अनित्यत्वप्रसङ्गात्। परोक्षत्वानुपपत्तेश्च ज्ञानफलस्य ॥ सू. भा. ४-१-१३, पा. ४७३-४७४.

[अत्र स्पष्टतरं विदुषः स्वदृष्ट्या नित्यमुक्तात्मस्वरूपत्वमुक्तम्, तस्य अविद्याकामकर्मादिक्लेशस्तत्संस्कारो वा नास्त्येव – इति चोद्घोषितम् ॥ ]

अन्यान्यप्येवञ्जातीयकानि सद्योमुक्त्यपराभिधानीयकजीवन्मुक्तिवचनानि परिशिष्ट(८)तोऽवगन्तव्यानि ॥

## सर्वे वेदान्ता विद्याप्रतिपत्तये आरभ्यन्त इति कथम् ?

५१. 'अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते' इत्यत्र भाष्यवाक्ये सर्वेषामपि वेदान्तानाम् आत्मैकत्वप्रतिपादनायैव प्रवृत्तिरित्यर्थः प्रतीयते। तत्रोपासनादिवाक्यान्यपि कथमेकत्वविद्यार्थानि भवेयुः ? – इति शङ्का समुन्मिषति। तत्र टीकाकार आह –

(१) ननु न सर्वे वेदान्ता विद्यार्थमेवारभ्यन्ते, तदेकदेशः क्रममुक्तिफलाय, ऐश्वर्यायाभ्युदयार्थकर्मसमृद्धये च उपासनानि विविधान्युपदिशन् उपलभ्यते। सत्यम्। उपासनाकर्म तु ब्रह्म; तच्चापाकृताशेषप्रपञ्चं जीवस्य निजं रूपम् इति निरूपयितुम् अखिलप्रपञ्चजन्मादिहेतुतया प्रथमं सर्वात्मकं सर्वज्ञं सर्वशक्ति च ब्रह्म लक्षितम्। अस्यां चावस्थायाम् अनपाकृत्यैव ब्रह्मणि प्रपञ्चं तेन तेन प्रपञ्चेनोपधीयमानं ब्रह्म तस्मै तस्मै फलाद्योपास्यत्वेन विधीयते, दर्शपूर्णमासार्थाप्प्रणयनमिव गोदोहनोपरक्तं पशुभ्यः। तस्मात् तदर्थोपजीवित्वादितरस्य 'आत्मैकत्वविद्याप्रतिपत्तये' सर्वे वेदान्ता आरभ्यन्ते इति न विरुध्यते ॥ पं. पा. ५१५-५१९.

**अत्र विवरणम् –**

(२) तत्र निर्विशेषब्रह्मप्रतिपत्त्यर्थेषु वेदान्तेषु सगुणब्रह्मोपासनानां तावत् प्रासङ्गिकत्वं दर्शयति 'सत्यम्, उपासनाकर्म तु' इति। ननु निर्विशेषं चेद्

ब्रह्म प्रतिपाद्यम्, तस्य कथं सगुणोपासनालम्बनं सप्रपञ्चं ब्रह्म अङ्गभूतं स्यात्, येनाश्रित्यविधानमुच्यत इति ? अध्यारोपापवादन्यायमभिप्रेत्य इत्याह – 'तच्चापाकृताशेषप्रपञ्चम्' इति । .... सप्रपञ्चब्रह्मप्रतिपत्तिश्च आश्रीयमाणा मुमुक्षोरमुमुक्षोश्च शब्दादविशेषेण प्राप्नोति । तदाश्रित्य विधानं मुमुक्षूणामपि उपपद्यत इति न मुमुक्ष्वधिकारकल्पना, किं तु आश्रित्यविधानमात्रम् इति निरवद्यम् । अतो महातात्पर्यप्रक्रमो ब्रह्मपर इत्युपसंहरति 'तस्मात्, तदर्थोपजीवित्वात्' इति ॥ पं. वि. पा. ५१५-५१६.

भवेदेतदेवं सर्वं यदि केवलं निर्गुणाधिकारप्रसङ्गेनैव सगुणोपासनानि विधीयेरन् । तत्र प्रायेण आदावेव स्वप्रकरणे विधीयमानानि उपासनानि कथङ्कृत्वा तदर्थोपजीवीनि भवेयुः – इति चिन्त्यमेतत् । भाष्यकारस्तु प्राह–

(1) 'न्यूनमन्यत् स्थानं सम्पूर्णमन्यत्' इति चैवं सहस्रशो विद्याविद्याविषयभेदेन ब्रह्मणो द्विरूपतां दर्शयन्ति वाक्यानि । तत्र अविद्यावस्थायां ब्रह्मण उपास्योपासकादिलक्षणः सर्वो व्यवहारः ॥ १-१-१२, पा. ३५.

(2) संहितादिविषयाणि कर्मभिरविरुद्धानि उपासनानि उक्तानि । अनन्तरं अन्तः सोपाधिकात्मदर्शनमुक्तम्, व्याहृतिद्वारेण स्वाराज्यफलम् । न चैतावता अशेषतः संसारबीजस्य उपमर्दनमस्ति – इत्यतः, अशेषोपद्रवबीजस्य अज्ञानस्य निवृत्त्यर्थं विधूतसर्वोपाधिविशेषात्मदर्शनार्थम् इदमारभ्यते 'ब्रह्मविदाप्नोति परम्' इत्यादि ॥ तै. भा. २-१, अव. पा. २८१.

[उदाहृतवाक्यद्वयादिदमवगम्यते यदविद्याविषये एव कर्मवदुपासनमपि विधीयते, न निर्गुणब्रह्मप्रकरणमाश्रित्य – इति ॥]

अब्रह्मोपासनानि कथमानीयन्ते वेदान्तेषु इत्यत आह टीका –

(३) ननु अब्रह्मोपासनान्यपि वेदान्तेषु दृश्यन्ते प्राणादिविषयाणि । सत्यम् । तान्यपि कार्यब्रह्मावाप्तिक्रमेण मुक्तिफलान्येव । वक्ष्यत्येतत् सूत्रकारः 'कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्' (४-३-१०) इति ॥ पं. पा. ५२२.

इति । तत्र उद्गीथाद्युपासनानि तावत् न क्रममुक्तिफलाय । नापि तानि निर्गुणवाक्यमुपजीव्य विहितानीत्यवोचाम । अतः पार्थगर्थ्यमेवोचितमाश्रयितुम् उपासनावाक्यानां कर्मवाक्यानामिवेति युक्तमुत्पश्यामः । तत्रेदं छान्दोग्यभाष्यवाक्यमनुसन्धेयम् –

(3) तत्रैतस्मिन् अद्वैतविद्याप्रकरणे अभ्युदयसाधनानि उपासनान्युच्यन्ते। कैवल्यसंनिकृष्टफलानि च अद्वैतादीषद्विकृतब्रह्मविषयाणि 'मनोमयः प्राणशरीरः' इत्यादीनि। कर्मसमृद्धिफलानि च कर्माङ्गसंबन्धीनि। रहस्यसामान्यान्मनोवृत्तिसामान्याच्च। यथा अद्वैतज्ञानं मनोवृत्तिमात्रम्, तथा अन्यान्यपि उपासनानि मनोवृत्तिरूपाणि – इत्यस्ति हि सामान्यम्॥ छां. भा. अव. पा. ३५२.

तस्मात् न सर्वेषाम् उपासनावाक्यानां प्रतिपिपादयिषितनिर्गुणब्रह्माश्रयणेनैव विधायकत्वम्; नाप्यवान्तरतात्पर्येण, उपासनावाक्यानां ज्ञानवाक्यैरेकवाक्यत्वस्यानभीष्टत्वात्, किं तु कर्मवाक्यानामिव अविद्याकृतव्यवहारदृष्ट्या यथाप्रसिद्धक्रियाकारकफलविभागमाश्रित्यैव। न चाध्यारोपापवादन्यायोदीक्षा कार्यात्र, 'स एष नेतिनेत्यात्मा' इत्यादिस्थलेष्विव ब्रह्मस्वरूपसमर्पणोद्देशेन विधानमित्यापत्तेः। 'सर्वे वेदान्ताः' इति भाष्यं तु 'सर्वे ब्राह्मणा आह्वातव्याः' इतिवत्; ब्रह्मवस्तूपदेशकवाक्यमात्राभिप्रायकं तत् इति सन्तोष्टव्यम्। अथवा 'सर्वे वेदा यत्पदमामनन्ति' (का. १–२–१५) इत्यादिस्थले इव वेदाध्ययनतपोब्रह्मचर्याणां यथा प्रत्येकं स्वस्मै स्वस्मै फलाय विहितानामपि मुमुक्षूणां परम्परया संस्कारद्वारा ज्ञानोपयोगित्वमपि, एवम् उपासनानामपि स्वस्वफलार्थं विहितानामपि चित्तैकाग्र्यसम्पादनद्वारा मुमुक्षूणाम् आत्मैकत्वप्रतिपत्त्यर्थत्वमपि भवेत् 'सर्वापेक्षा च' (३–२४–२६) इति सूत्रोक्तन्यायेनेति युक्तमुत्पश्यामः। अत एव हि भाष्यकारः पार्थगर्थ्यमेवाह ब्रह्मज्ञानवाक्यानाम् उपासनावाक्यानां च –

(4) तत्राविद्यावस्थायां ब्रह्मण उपास्योपासकादिलक्षणः सर्वो व्यवहारः। तत्र कानिचिद् ब्रह्मण उपासनानि अभ्युदयार्थानि। कानिचिद् क्रममुक्त्यर्थानि, कानिचित् कर्मसमृद्ध्यर्थानि॥ १–१–१२, पा. ३५.

(5) एवम् एकमपि ब्रह्म अपेक्षितोपाधिसंबन्धं निरस्तोपाधिसंबन्धं च उपास्यत्वेन ज्ञेयत्वेन च वेदान्तेषूपदिश्यते॥ १–१–१२, पा. ३५.

[अत्र ब्रह्मण एकत्वेऽपि सोपाधिकब्रह्मवाक्यानाम् उपासनापरत्वमित्युक्तम्॥]

(6) अत्र हि कर्मवदुपासनानां भेदाभेदौ सम्भवतः, कर्मवदेव च उपासनानि दृष्टफलानि, अदृष्टफलानि चोच्यन्ते॥ सू. भा. ३–३–१, पा. ३७५.

[अत्रोपासनावाक्यानां कर्मवाक्यसमानयोगक्षेमतामाह॥]

## जिज्ञासाद्यधिकरणस्थाष्टीकाभिप्रायाः केचन

५२. तदेवं स्थालीपुलाकन्यायेन अध्यासभाष्यटीकैव तावद् विस्तरशो विमृष्टा प्रस्थानयोर्भाष्यटीकागतयोर्वैलक्षण्यप्रदर्शनाय। अधिकं तु सुगमातः, भाष्यार्थतत्त्वविवेचनीतश्च अधिगन्तव्यम्। दिङ्मात्रं त्वत्र जिज्ञासाद्यधिकरणस्थानां टीकाभिप्रायाणां केषाञ्चित् परिशीलनं दर्श्यते। तत्र जिज्ञासारम्भप्रकारान् वृत्त्यन्तरस्थान् निराकृत्य टीकाकारेण स्वप्रक्रिया प्रदर्शिता –

(1) अतो विध्यभावादविवक्षितार्था वेदान्ता इति धर्मजिज्ञासानन्तरं स्नाने प्राप्ते इदमारभ्यते 'अथातो ब्रह्मजिज्ञासा' इति, अनन्तरं ब्रह्म जिज्ञासितव्यम्, न स्नातव्यम् इत्यभिप्रायः। कर्माभिधायिनोऽपि कृत्यप्रत्ययान्नियोगस्थप्रत्ययात् न नियोक्तृत्वं निराकर्तुं शक्यते, 'कटस्त्वया कर्तव्यः' 'ग्रामस्त्वया गन्तव्यः' इतिवत्। यत्तूक्तम्, द्रव्यपरत्वे प्रयोजनाभावात् आनर्थक्यं नियोगस्य – इति। तदसत्; अविद्योच्छेदस्य उपलभ्यमानत्वात्, अविद्या च संसारहेतुभूता॥ पं. पा. ५४०.

इति एको वृत्तिकारः॥

(2) ब्रह्मणि प्रत्यक्षादिप्रत्ययान्तराणाम् असम्भवात्, परिनिष्पन्ने वस्तुनि प्रतिपत्तिहेतुतया सम्भावितसामर्थ्यानामपि आम्नायस्य पुनः कार्यविषयतया सुतरामसंभवं मन्वानस्य भवति सङ्कर्षपर्यन्ते वेदार्थविचारावसानमिति बुद्धिः। तन्निरासार्थं पुनः प्रतिज्ञातम्; इहापि सर्वेष्वेव आत्मज्ञानविधानेषु कार्यनिष्ठतां वर्णयन्ति समाम्। तत्त्वावबोधश्च कार्यम्, अधिकारनियोगविषयतया अवगमात् – इति। ततस्तद्विचारार्थं शास्त्रमारब्धव्यम् इति॥ पं. पा. ५४०.

इत्यपरो वृत्तिकारः॥

(3) सत्यं कार्यविषयो वेदः, न तु तावन्मात्रे। तस्मिन् सति यो योऽर्थोऽवगम्यते स न वेदार्थः। यथा रूपे सति चक्षुषः प्रवृत्तिः; न च रूपमात्रं चक्षुषो विषयः, किं तु तस्मिन् सति द्रव्यमपि। एवम् इहापि वस्तुतत्त्वमपि विषयः॥ पं. पा. ५४४–५४५.

इत्यन्यो वृत्तिकारः॥

सर्व एते वृत्तिकाराः नियोगनिष्ठत्वमेवाभिमन्यन्ते उपनिषदाम् इति स्पष्टम्। तदेवं शास्त्रारम्भप्रकारे विकल्पत्रयं निराकृत्य टीकाकारः भाष्यकाराभिप्रायत्वेन स्वाभिमतं प्रकारमाचष्टे –

(१) अतः कार्यानुरक्तस्य वेदार्थस्य संभवात्, तस्य च सर्वात्मना विचारितत्वात्, किमपरमवशिष्टम्, यद् ब्रह्मजिज्ञासारम्भं प्रयुञ्जीत ? उच्यते – स्यादेतदेवम्, यदि सर्व एव वेदार्थो विचार्यत्वेन 'अथातो धर्मजिज्ञासा' इत्युपक्रान्तः, विचारितश्च स्यात्। यावत् कार्यनिष्ठ एव वेदभागो विचारितः, न वस्तुतत्त्वनिष्ठः ॥ पं. पा. ५६५-५६६.

इति। अत्र यद्यपि भाष्यकारमतेनापि एष एव सिद्धान्तः, तथापि टीकाकारानुयायिभिरिदं वक्तव्यं भवति – मिथ्याज्ञानाख्यभावरूपाविद्यायाः ब्रह्मस्वरूपाच्छादकत्वेनैवाभ्युपगमात्, वस्तुज्ञानस्य च अग्रहणसंशयविपर्यासरूपाविद्यात्रयबाधकत्वमेव, तदन्यस्य दोषादेर्निवर्तकत्वेन न प्रसिद्धं ज्ञानम् इति स्थिते, कथं टीकामतेऽपि शास्त्रस्य कार्यपरत्वं वार्यत इति ? न च अविद्यादोषेण तदपगमेन वा कश्चिद् विशेषो ब्रह्मण्यभ्युपगम्यते टीकाकारेणापि, अभ्युपगते हि ब्रह्मणि सविशेषत्वे सिद्धान्तहानिरिति ॥

विवरणकारमतेन तु भावरूपस्याज्ञानस्य निवृत्तिरेवमुपपाद्यते –

(२) कथं पुनर्लोके सहाज्ञानेनाध्यासस्य तत्त्वज्ञानान्निवृत्तेरप्रतिपत्तौ ब्रह्मज्ञानात् सहाज्ञानेनाध्यासस्य निवृत्तिर्दृष्टद्वारेण कल्प्यत इति ? नैष दोषः। तत्त्वावभासविरोधिनोऽग्रहणमिथ्याज्ञानादेस्तत्त्वज्ञानेन निवृत्तिदर्शनात् इहापि तत्त्वावभासविरोधितयैव भावरूपाज्ञानादेः कल्प्यमानत्वात् तस्य ब्रह्मज्ञानान्निवृत्तेरुपपत्तेः ॥ पं. वि. पा. ११०.

[अविद्याशक्तिर्मिथ्यार्थान्यथानुपपत्तेर्हेतोः कल्प्यते। तन्निवृत्तिश्चाग्रहणमिथ्याज्ञानादिनिवृत्तिनिदर्शनेनेति विचित्रा नीतिरियम्। ज्ञानेनाग्रहणादेरज्ञानशब्दवाच्यस्य निवृत्तिदर्शनमात्रेण नामरूपबीजलक्षणस्याज्ञानत्वेन परिभाषितस्य कथं निवृत्तिरुपपाद्यतामिति विवरणकारानुयायिनः कुत्रचिद्विवव्रुर्नवेति न विज्ञायते ॥]

कथं कूटस्थस्यात्मनो भावाज्ञानसंबन्ध इत्याशङ्का इत्थं वारिता विवरणे –

(३) अनादिमिथ्याज्ञानसंबन्धोऽप्यात्मनि अज्ञानवत् काल्पनिकत्वादाकाशकाष्ण्र्यवदात्मनः कूटस्थतां न विहन्ति ॥ पं. वि. पा. १३०.

इति। तर्हि कल्पनाया एवाध्यासत्वात्, अध्यास एवालं सर्वं मिथ्याव्यवहारं निर्वोढुम्, किं विवादग्रस्तादृष्टाश्रुतचराविद्याशक्तिलक्षणोपादानकारणकल्पनया, तदभ्युपगमार्थमप्यध्यासापेक्षाया दुर्निवारणत्वात् – इत्याक्षेपे परिहारं न पश्यामोऽत्र ॥

## 'भोक्तुरात्मैव ब्रह्म' इति भाष्यवाक्यस्य टीका

५३. ब्रह्म प्रसिद्धं वा, अप्रसिद्धं वा? – इति विकल्प्य उभयथापि जिज्ञासानारम्भम् आशङ्क्याह भाष्यकारः –

(1) अस्ति तावद् ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावम्, सर्वज्ञम्, सर्वशक्तिसमन्वितम्। ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते, बृंहतेर्धातोरर्थानुगमात्। सर्वस्याऽऽत्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिः। सर्वो हि आत्मास्तित्वं प्रत्येति, न नाहमस्मीति। यदि हि नात्मास्तित्वप्रसिद्धिः स्यात्, सर्वो लोको 'नाहमस्मि' इति प्रतीयात्। आत्मा च ब्रह्म।

इति। ततः परं

'यदि तर्हि लोके ब्रह्म आत्मत्वेन प्रसिद्धमस्ति, ततो ज्ञातमेवेति अजिज्ञास्यत्वं पुनरापन्नम्'

इत्याशङ्क्य

'न। तद्विशेषं प्रति विप्रतिपत्तेः'

इति समाधत्ते स्म। विप्रतिपत्तिं प्रपञ्चयन् देहेन्द्रियमनोविज्ञानशून्येषु प्रत्येकमात्मत्वमातस्थुषां मतमुपन्यस्योपसमहार्षीत् –

(2) 'अस्ति देहव्यतिरिक्तः संसारी कर्ता भोक्ता' इत्यपरे। भोक्तैव केवलम्, न कर्ता– इत्येके। अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिः – इति केचित्। आत्मा स भोक्तुः इत्यपरे॥ १-१-१, पा. १.

इति। तत्र टीका चरमवाक्यं विवृण्वती प्राह –

(१) योऽयम् 'अहम्' इत्युल्लिख्यमानश्चेतनो भोक्ता स ब्रह्म – इति कैश्चित् प्रतिपन्नः। तस्याहंप्रत्ययसिद्धो भोक्तृत्वावभासः। स मिथ्यैव अनिर्वचनीयानाद्यविद्याविलसितः। परमार्थतस्तु यः सर्वज्ञ ईश्वरोऽहंप्रत्यये अनन्तर्भूतः प्रमाणान्तरानवसितः, सोऽस्य आत्मा स्वरूपम्। एवमसौ बृंहत्यर्थान्वयाद् ब्रह्मशब्दाभिधानीयतां लभते; इतरथा तद्रूपविकलस्य न निरङ्कुशं बृहत्त्वम् इति न ब्रह्मशब्दाभिधेयः स्यात्॥ पं. पा. ८५७-८५८.

इति। इह व्यक्तं भोक्ता 'अहंप्रत्ययसिद्धः' इत्युक्तः। स्पष्टं चेदम् इतः प्राक्तनवाक्ययोरपि। यतः 'भोक्तैव केवलम्, न कर्ता–इत्येके' 'अस्ति तद्व्यतिरिक्त ईश्वरः' इति भाष्यवाक्यद्वयव्याख्यानावसरे प्राह –

(२) पूर्वोक्तस्यैव देहादिव्यतिरिक्तस्य कर्तृत्वम् अतत्स्वभावं मन्वाना भोक्तैव केवलोऽहंप्रत्ययविषयः – इत्येके प्रस्थिताः॥ पं. पा. ८४८-८४९.

(३) ननु 'अहम्' इति सर्वो लोक आत्मानं प्रत्येति; 'आत्मा च ब्रह्म' – इत्यहंप्रत्ययविषयस्याऽऽत्मनो ब्रह्मत्वेन तद्विप्रतिपत्तौ ब्रह्मविप्रतिपत्तिं दर्शयितुं

प्रक्रान्तम्, तत्कथमनहंप्रत्ययविषये अनात्मनि ईश्वरे ब्रह्मत्वविप्रतिपत्तिः प्रदर्श्यते ? उच्यते । ब्रह्मणि विप्रतिपत्तिप्रदर्शनस्य प्रक्रान्तत्वात् अहंप्रत्ययविषयविप्रतिपत्त्यापि प्रणाड्या ब्रह्मविप्रतिपत्तिरेव निर्दिश्यते । यतो नाहंविषयविप्रतिपत्तिप्रदर्शनेन किञ्चित् कृत्यमस्ति । तस्मात् साध्वेतत् ॥ पं. पा. ८५३.

इति । तत् स्पष्टमिदं यत् भोक्तुरहंप्रत्ययविषयत्वं भाष्यानुसारेणैव व्याख्यातमत्रेति । पूर्वं तु (खं. १०) "अहङ्कारग्रन्थिरस्मच्छब्दसंशब्दितः, प्रत्ययश्चासौ । आदर्श इव प्रतिबिम्बस्य अनिदञ्चित्संवलितत्वेन तस्याभिव्यक्तिहेतुत्वात्; अतस्तस्य विषयवद्भवति—इत्युपचारेण अनिदञ्चिदात्मधातुः, अस्मत्प्रत्यय उच्यते", "तदेवं यद्यपि चैतन्यैकरसोऽनिदमात्मकत्वादविषयः, तथापि अहङ्कारे व्यवहारयोग्यो भवतीति गौण्या वृत्त्या अस्मत्प्रत्ययविषयता उच्यते" (खं. ११) इति चोक्तम् । कथं सङ्गमनीयोऽयं व्याघातः ? — इत्येतद् विद्वद्भिरालोचयितव्यम् ॥

## तर्कसतत्त्वम्

५४. 'तस्मात्, ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयते' इति भाष्यम् । तत्र तर्कस्वरूपनिरूपणावसरे टीका –

(१) तैर्वेदान्तैरविरोधी तर्कः युक्तिः, उपकरणम्, इतिकर्तव्यता; सहकारिकारणम् इति यावत् । अथवा तर्कः अनुमानम् वेदान्तैरविरुद्धम्; तदर्थप्रतीतेरेव दृढत्वहेतुतया उपकरणमस्याः इत्यर्थः ॥ पं. पा. ८६४–८६७.

इति । पूर्वं तु (खं. ४८) सम्यग्ज्ञानस्वरूपप्रतिष्ठायै तर्कः सहायः (पा. ९१) विद्याऽसम्यक्त्वाशङ्कायां तथा अनुभवफलानुत्पत्तौ तत्संभवप्रदर्शनमुखेन फलप्रतिबन्धापगमे तर्कस्योपयोगः (पा. ९१) इति चोक्तम् । तदिदं पूर्वापरासङ्गतमिव भाति नः । भाष्यकारीयं तु मतं **भाष्यार्थतत्त्वविवेचनी**तोऽधिगन्तव्यम् ॥

## जन्मादिसूत्रे किं युक्तिरपि सूत्रिता ?

५५. 'ब्रह्म जिज्ञासितव्यम् इत्युक्तम् । किंलक्षणं पुनस्तद् ब्रह्म इत्यत आह भगवान् सूत्रकारः' इति जन्मादिसूत्रावतरणिका भाष्ये । तत्र टीका–

(१) ब्रह्मज्ञानकामेन इदं शास्त्रं श्रोतव्यमित्युक्तम् । यदैवेदमित्युक्तम् तदैव ब्रह्मणो लक्षणं प्रमाणं युक्तिः साधनं प्रयोजनम् – इति सर्वं व्याख्येयत्वेन प्रतिज्ञातम् । तत्र स्वरूपस्य अभ्यर्हितत्वात् तत् प्रथमं वक्तव्यम् 'किंलक्षणं पुनस्तद्ब्रह्म ?' इति । अत आह भगवान् 'जन्माद्यस्य यतः' इति । युक्तिरपि लक्षणनिर्णये अर्थात् सूत्रितैव ॥ पं. पा. ८७०-८७७.

किमिदं भाष्यानुगुणम् ? किं कारणं तर्हि भगवान् भाष्यकारो लिखति 'तस्मात्, जन्मादिसूत्रं नानुमानोपन्यासार्थम्, किं तर्हि वेदान्तवाक्यप्रदर्शनार्थम्' (१-१-२, पा. ८) इति ? अधिकं तु तत्त्वविवेचन्याम् ॥

## ब्रह्मणः शास्त्रं प्रति कारणत्वं कथम् ?

५६. जन्मादिसूत्रे जगज्जन्मस्थितिभङ्गकारणं ब्रह्म इत्युक्तत्वाद् ब्रह्मणः सर्वात्मत्वं सूचितम् । तद्दृढीकरणाय च सूत्रितम् 'शास्त्रयोनित्वात्' इति । तच्च कीदृशं कारणत्वं शास्त्रं प्रति ? इत्यत्र भाष्यम् –

"महतः ऋग्वेदादेः शास्त्रस्य अनेकविद्यास्थानोपबृंहितस्य प्रदीपवत् सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म ॥"

इति । तत्र टीका –

(१) अनेकनानाविधविषयविद्यास्थानोपबृंहितस्य वेदाख्यस्यापि शास्त्रस्य प्रपञ्चान्तःपातित्वात्, तत एव जन्म । न च तेन अविषयीकृतस्य सद्भावे प्रमाणमस्ति । अतः सर्वविषयत्वात् सर्वज्ञं तत् । कल्पप्प्रत्ययप्रयोगो भाष्ये बोद्धृत्वाभावादीषदपरिसमाप्त्या । ततश्च कारणं तद्विषयादपि अधिकतरग्रहणसमर्थं गम्यते । दृश्यते हि अद्यापि शास्त्रकाराणां तथाभावः । ननु, एवं सति बुद्धिपूर्वत्वात् सापेक्षं स्यात् । न स्यात् । ब्रह्मवदनादित्वात्, कूटस्थनित्यत्वाच्च । कथं पुनस्ततो जन्म ? तत्परतन्त्रत्वात्, रज्जुसर्पवत् । तथा च श्रुतिः 'निःश्वसितमेतत्' इति । यथा अपेक्षारहितैव लोके निःश्वासप्रवृत्तिः, तथा अस्यापि इति न सापेक्षतादोषः । ननु एवं सति कथं सर्वज्ञता ? तस्यैव ज्ञानशक्तिविवर्तात्मकत्वान्नामप्रपञ्चस्य । रूपप्रपञ्चस्यापि तदाश्रित्य विवर्तनात् तज्जन्मता, नासतः प्रादुर्भावात् ॥ पं. पा. ९५१-९७२.

अत्र अनादेरपि वेदस्य ब्रह्मपरतन्त्रत्वमेव ब्रह्मकार्यत्वम्, सर्पस्येव रज्जुपरतन्त्रस्य रज्जुकार्यता इत्युक्तम् । ब्रह्मणो ज्ञानशक्तिविवर्तत्वादेव च वेदस्य सर्वज्ञतेति च ॥

विवरणेऽप्युक्तम् –

(२) तस्मात्, सर्वार्थप्रकाशनसमर्थसर्वशब्दोपादानतया सर्वज्ञं ब्रह्म ॥ पं. वि. पा. ९७२.

तत्र वेदस्य रज्जुसर्पवन्मिथ्याप्रतिभासे विवक्षिते, रूपप्रपञ्चवदेव च नामप्रपञ्चस्यापि मिथ्याप्रतिभासत्वात्, अत्रापि पूर्ववत् (पा. १९) प्रतिभासान्यथानुपपत्त्या अविद्याशक्तिश्चिद्रूपसत्तामात्रानुबन्धिनी अभ्युपगन्तव्या ; अतः पूर्ववदेवेहापि स्वयञ्ज्योतिष्ट्वात् अविद्याश्रयत्वानुपपत्तिः ब्रह्मस्वरूपस्य जीवादन्यत्वेऽनन्यत्वे वा अन्यस्याग्रहणादन्यस्मिन् अन्यस्मिन् अग्रहणविपर्यासयोरनवक्लृप्तिः, विद्यात्मके ब्रह्मणि अविद्याश्रयत्वस्यानवक्लृप्तिः (पा. ३३) – इति च शङ्का ; विद्यत एवात्राप्यग्रहणात्मको दोषः, श्रुतेस्तदर्थापत्तेश्च इति, ब्रह्मणोऽनन्यत्वादेव जीवे ब्रह्मस्वरूपप्रकाशाच्छादिका अविद्या कल्प्यते (पा. ३३) इति च सर्वमप्यभ्युपगन्तव्यमेव । तथा अज्ञानम् अनात्मनि रूपान्तरावभासहेतुरेव केवलम् – इति टीकाव्याख्यानप्रसङ्गेन **विवरणे** मूलाविद्यावस्थाभेदकल्पनम् इत्यादिसर्वमिहाप्यनुसन्धेयम् । तत्तत्स्थलेषु भाष्यप्रस्थानवैलक्षण्यं यथोक्तम् इहाप्यावर्तनीयम् । अधिकं तु **भाष्यार्थतत्त्वविवेचनी**तोऽधिगन्तव्यम् ॥

## समन्वयसूत्रभाष्योदाहृतानि वाक्यानि

५७. ब्रह्म वेदान्तप्रमाणकम् इत्युपपादयितुं प्रवृत्तं सूत्रं 'तत्तु समन्वयात्' इति । तद्व्याख्यास्यन् भाष्यकार आह 'तद् ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिलयकारणं वेदान्तशास्त्रादेवावगम्यते । कथम् ? समन्वयात् ' इति । समन्वयमेव प्रदर्शयन्ति वाक्यान्युदहार्षीत् 'सदेव सोम्येदमग्र आसीत्' इत्यादीनि । तत्र **टीका** –

(१) ननु जन्मादिसूत्रोदाहरणेष्वेव प्रामाण्यं दर्शनीयम्, किमुदाहरणान्तरेण ? बाढम् ; अस्त्यत्राभिप्रायो भाष्यकारस्य । तत्र ब्रह्मणो लक्षणं वक्तव्यम् इति तटस्थस्यैव ब्रह्मणो निरूपकाणि वाक्यान्युदाहृतानि ; इह तु 'तत्त्वमसि' इति जीवस्य ब्रह्मात्मतावगतिपर्यन्तानि वेदान्तवाक्यानि न तटस्थमेव जगत्कारणं प्रतिपाद्य पर्यवस्यन्ति – इत्यतः, तथाभूतान्येव वाक्यान्युदाहृतानि ' सदेव सोम्येदमग्र आसीत् ' इत्येवमादीनि ॥ पं. पा. १०१३–१०१४.

जन्मादिसूत्रे जगत्कारणवादीन्येव वाक्यान्युदाहृतानि, इह पुनः जीवस्य ब्रह्मात्मतावगतिपर्यन्तानि वाक्यानि– इत्यत्र सूत्रे, तदनुगतश्रुतिवाक्ये, भाष्ये वा गमकं न पश्यामः। सूत्रे तावत् जगज्जन्मस्थितिप्रलयकारणं यत् तद् ब्रह्म–इति प्रतिज्ञातम्। विषयवाक्येषु च 'आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' इत्यादिषु 'यस्मादनन्यत् तिसृष्वप्यवस्थासु कार्यभूतं जगत्, तद् ब्रह्म – इति ब्रह्मस्वरूपविशेषे एव पर्यवसानं पश्यामः। न हि 'आनन्दः' इति निर्णयवाक्यं तटस्थमेव ब्रह्म बोधयतीति वदितुं शक्यं केनचिदपि। तदेवं लक्षणवाक्ये तावत्, ब्रह्मस्वरूपसमर्पकाण्येव वाक्यानि लिलक्षयिषितानीति गम्यते। न तु जगत्कारणत्वकथनद्वारा तटस्थब्रह्मसमर्पकाणीति। न च समन्वयसूत्रे जगत्कारणत्वोपदेशकवाक्यान्युपेक्षितानि। तथा हीह प्रप्रथमं वाक्यम् 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इत्युपक्रम्य तत एव ब्रह्मणो जगत्सृष्टिमुपदिश्य तेजोऽन्नलक्षणजगज्जन्मादिकारणं तावदात्मैकत्वप्रतिपत्त्युपायत्वेनैव निर्दिशति 'तस्य क्व मूलं स्यादन्यत्रान्नादेवमेव खलु सोम्यान्नेन शुङ्गेनापोमूलमन्विच्छाद्भिः सोम्य शुङ्गेन तेजोमूलमन्विच्छ, तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' (छां. ६–८–४) इति सन्मात्रावगमार्थत्वप्रदर्शनेन। तत्त्वमसीति खलु ब्रह्मात्मैकत्वमेव प्रतिपर्यायमिह बोध्यते जगत्कारणत्वोपन्यासमुखेन 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि' इति। किञ्च कारणत्वव्यपदेश एव तावत् सर्वेष्वपि वेदान्तेषु परब्रह्मस्वरूपसमर्पणार्थ इति सूत्रयिष्यति भगवान् बादरायण उत्तरत्र – 'कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः' (१–४–१४) इत्यत्र। भाष्यकारोऽपि पदे पदे अद्वितीयत्वेन निर्विशेषत्वेन वा विशिनष्टि कारणं ब्रह्म। तद्यथा –

(१) यथाभूतो हि एकस्मिन् वेदान्ते सर्वज्ञः, सर्वेश्वरः सर्वात्मा एकोऽद्वितीयः कारणत्वेन व्यपदिष्टः, तथाभूत एव वेदान्तान्तरेष्वपि व्यपदिश्यते॥ १–४–१४, पा. १६२.

(२) चेतनं ब्रह्म एकमद्वितीयं जगतः कारणम् इति यदुक्तम्, .... १–५–२४, पा. २१०.

(३) चेतनमेकमद्वितीयं ब्रह्म क्षीरादिवद् देवादिवच्चानपेक्ष्य बाह्यसाधनं स्वयं परिणममानं जगतः कारणम् इति स्थितम् ॥ २-१--२६, पा. २१२.

(४) कथञ्च 'नेति नेति' इति प्रतिषिद्धसर्वविशेषाया देवताया: सर्वशक्तियोगः सम्भवेत् इति चेत् । यदत्र वक्तव्यं तत् पुरस्तादेवोक्तम् ........ ॥ २-१-३१, पा. २१५.

अन्यान्यपि वाक्यानि कारणब्रह्मणोऽद्वयस्वरूपत्वं ब्रुवन्ति **परिशिष्टात्** (९) अधिगन्तव्यानि । अत्राधिकं **तत्त्वविवेचनीतः**, **प्रक्रियाप्रत्यभिज्ञा**-तश्चाधिगन्तव्यम् ॥

## परिनिष्ठितवस्तुस्वरूपे ब्रह्मणि श्रुतिप्रमाणकत्वम्

५८. ब्रह्मणः श्रुत्यैकगम्यत्वमुपपादयितुं भाष्यवाक्यम् – "न च परिनिष्ठितवस्तुस्वरूपत्वेऽपि प्रत्यक्षादिविषयत्वं ब्रह्मणः । 'तत्त्वमसि' इति ब्रह्मात्मभावस्य शास्त्रमन्तरेणानवगम्यमानत्वात्" इति (पा. ११) । तत्र **टीका** –

(१) यत्पुनः सिद्धे वस्तुनि प्रत्यक्षादिसम्भवात् तदभावे मिथ्यात्वाशङ्कायाम् अप्रामाण्यमिति, तद् 'रूपाद्यभावाद् हि नेन्द्रियगोचरः' ॥ – इति प्रत्युक्तम् ॥ पं. पा. १०१४.

इति । यद्यपि 'इन्द्रियाविषयत्वेन सम्बन्धाग्रहणात्' (१-१-२, पा. ८) इति जन्मादिसूत्रभाष्ये उक्तम्, उदर्के च वक्ष्यते 'रूपाद्यभावाद् हि नायमर्थः प्रत्यक्षस्य गोचरः, लिङ्गाद्यभावाच्च नानुमानादीनाम्' (२-१-६, पा. १८८) इत्यादिस्थलेषु, तथापि 'प्रत्यक्षाद्यविषयत्वे मिथ्यात्वम्' इत्याशङ्क्य न समाहितं कुत्रापि । न च टीकायां शब्दैकसमधिगम्यत्वं ब्रह्मणः कथं कृत्वा ? – इत्येतद् भाष्यसंवादेन स्पष्टीकृतम् । एवं हि **टीका** –

(२) शब्दस्तावदपौरुषेयत्वाददुष्टः । प्रमेयस्य पुनर्ज्ञानहेतुत्वे न प्रमाणमस्ति । शब्दस्यैव तदेकनिष्ठत्वेन तन्नियमात् । चित्रस्य तु चाक्षुषज्ञाने सामग्र्यन्तःपातिनः श्यामादिरेखासन्निवेशविशेषो दोषः ; तदभावे तिमिराभाव इव सम्यग्दर्शनोत्पत्तेः । अतः प्रवर्तमानमपि प्रमाणं संवादकमेव – इति नाप्रामाण्यमावहति । न च संवादलक्षणं प्रामाण्यम्, अपि तु बोधलक्षणम्

इति प्रमाणविदां स्थितिः । अतो यथैव विधिवाक्यानां स्वार्थमात्रे प्रामाण्यम्, एवं स्वरूपवाक्यानामपि, अनवगतार्थपरिच्छेदसामान्यात् ॥

पं पा· १०३५-१०३७·

(३) तस्मात्, यथा कार्यमवगमयंस्तदर्थः, एवम् ऐकात्म्यमप्यवगमयं-स्तदर्थो भवितुमर्हति । प्रतीतिकृतत्वात् प्रामाण्यस्य, प्रतीतिस्तु कार्यैकात्म्ययो-स्तुल्या । प्रत्यक्षादिष्वपि एतदेव प्रमाणवृत्तम्, यदनवगतमवगम्यते ॥

पं· पा· १०३८·

(४) तेन अनेकानर्थकलुषितमिव आत्मानं मन्यमानस्य भ्रान्तस्य सर्वानर्थशून्यात्मतत्त्वप्रतिपादनादेव पुरुषार्थसिद्धेरैकात्म्यवाक्यानां स्वार्थमात्र-निष्ठत्वेऽपि न विध्यानर्थक्यप्रसङ्गः । तस्मात् सिद्धं ब्रह्मणः शास्त्रप्रमाणत्वम् ॥

पं· पा· १०३९-१०४१·

अत्र "न च परिनिष्ठितवस्तुस्वरूपत्वेऽपि प्रत्यक्षादिविषयत्वं ब्रह्मणः, 'तत्त्वमसि' इति ब्रह्मात्मभावस्य शास्त्रमन्तरेणानवगम्यमानत्वात्" (१-१-४, पा. ११) इत्यत्र "न केवलं श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायां किं तु श्रुत्यादयः, अनुभवादयश्च यथासम्भवमिह प्रमाणम्" (१-१-२, पा. ८) इति भाष्यवाक्यमप्याहर्तव्यं प्रामाण्यसिद्धये इत्यस्माकं मतिः । न केवलम् अपौरुषेयत्वाद् दोषाभावो वेदे इति हेतुप्रदर्शनमेवालम्, किं तु 'तत्त्वमसि' इति सिद्धवदुपदेशात् अपरोक्षत्वाच्च ब्रह्मात्मनः, अनुभवोऽपि तथा जायते —इत्येतदपि प्रदर्शनीयम् । अनुमोदितं चेदं टीकायामपि 'तेनानेकानर्थकलुषित-मिवात्मानं मन्यमानस्य भ्रान्तस्य' इत्यादिवाक्ये । तेन भ्रान्तिनिरसनेनैव वाक्यप्रामाण्ये सिद्धे प्रमाणदोषाद्यभावोदाहरणमेव किमित्युपन्यस्यते अत्रेति न ज्ञायते । न हि प्रमाणविधया वाक्यमुदाह्रियते येन प्रमाणतत्त्वभावः परीक्ष्येतात्र, किं तर्हि सर्वप्रमाणागोचरत्वमात्मनो विज्ञापयत् स्वयंसिद्धमात्मानं समर्पयतीति कृत्वा । भाष्यप्रस्थाने तु यथेदं स्फुटतरमुपदिश्यते, तथा जिज्ञासूनां हृदयमागमयितुं कतिचिद् वाक्यान्युदाह्रियन्ते —

(1) यावद् हि अविद्या न निवर्तते । तावद् धर्मादिगोचरत्वं जीवस्य जीवत्वं च न निवर्तते । तन्निवृत्तौ तु प्राज्ञ एव 'तत्त्वमसि' इति श्रुत्या प्रत्याय्यते ॥ १-४-६, पा· १५४·

[अत्र निवृत्तायामविद्यायां नाप्रामाण्यशङ्का समुदेतीत्युक्तम्, न केवलम् अपौरुषेयत्वाद् वाक्यस्येति ॥ ]

(2) **श्रुत्यनुगृहीत एव ह्यत्र तर्कोऽनुभवाङ्गत्वेन आश्रीयते ॥ २-१-६, पा. १८८-१८९.**

[ अत्र तर्कसाहाय्येनापि श्रुतिरनुभवजनकत्वेनैव प्रमाणम् इत्युक्तम् ॥ ]

(3) **वेदस्य तु नित्यत्वे विज्ञानोत्पत्तिहेतुत्वे च सति व्यवस्थितार्थविषयत्वोपपत्तेः । तज्जनितस्य ज्ञानस्य सम्यक्त्वमतीतानागतवर्तमानैः सर्वैरपि तार्किकैरपह्नोतुमशक्यम् ॥ २-१-११, पा. १९४.**

[अत्र वेदस्य नियमेन विज्ञानोत्पत्तिहेतुत्वात्, तस्मिन्नप्रामाण्यशङ्का नोदीयात् इत्युक्तम् ॥ ]

(4) **'तत्त्वमसि' इति ब्रह्मात्मभावस्य अनवस्थाविशेषनिबन्धनत्वात् ॥ २-१-१४, पा. १९८.**

['असि' इति नित्यवर्तमानस्वभावमेव सद्ब्रह्म त्वमसि - इति बोध्यते वाक्येन, न त्ववस्थाविशेषे अभिव्यज्यमानम्, आगन्तुकं वा ॥ ]

(5) **यथा हि लोके 'यजेत' इत्युक्ते 'किम्', 'केन', 'कथम्' इत्याकाङ्क्ष्यते नैवं 'तत्त्वमसि', 'अहं ब्रह्मास्मि' इत्युक्ते किञ्चिदन्यदाकाङ्क्ष्यमस्ति ; सर्वात्मैकत्वविषयत्वावगतेः । सति हि अन्यस्मिन् अवशिष्यमाणे अर्थे आकाङ्क्षा स्यात्, न तु आत्मैकत्वव्यतिरेकेणावशिष्यमाणोऽन्योऽर्थोऽस्ति य आकाङ्क्ष्येत । .... न चेयमवगतिरनर्थिका भ्रान्तिर्वा इति शक्यं वक्तुम् । अविद्यानिवृत्तिफलदर्शनात्, बाधकज्ञानान्तराभावाच्च ॥ २-१-१४, पा. १९९.**

[निराकाङ्क्षत्वगतिजनकत्वादेवानपवदनीयं वाक्यप्रामाण्यम् । वाक्यावगतिर्हि समर्थक्रियाकारिणी अद्वितीयविषया च - इत्यनुभवपर्यन्तता च दर्शिता ॥ ]

(6) **अपि च यदा 'तत्त्वमसि' इत्येवंजातीयकेन अभेदनिर्देशेन अभेदः प्रतिबोधितो भवति, अपगतं भवति तदा जीवस्य संसारित्वम्, ब्रह्मणश्च स्रष्टृत्वम् । समस्तस्य मिथ्याज्ञानविजृम्भितस्य भेदव्यवहारस्य सम्यग्ज्ञानेन बाधितत्वात् ॥ २-१-२२, पा. २०९.**

[ मिथ्याज्ञानापनयनेनानुभवपर्यन्तत्वात् सफलं वाक्यज्ञानमित्युक्तम् ॥ ]

(7) **आत्मत्वाच्च आत्मनो निराकरणशङ्कानुपपत्तिः । न ह्यात्मा आगन्तुकः कस्यचित्, स्वयंसिद्धत्वात् । न ह्यात्मा आत्मनः प्रमाणमपेक्ष्य सिध्यति । तस्य हि प्रत्यक्षादीनि प्रमाणानि अप्रसिद्धप्रमेयसिद्धये उपादीयन्ते । न ह्याकाशादयः पदार्थाः प्रमाणनिरपेक्षाः स्वयंसिद्धाः केनचिदभ्युपगम्यन्ते । आत्मा तु प्रमाणादिव्यवहाराश्रयत्वात् प्रागेव प्रमाणादिव्यवहारात् सिद्ध्यति ॥ २-३-७, पा. २६८.**

[आत्मनः प्रमाणव्यवहारात् प्रागेव सिद्धत्वं ज्ञापयति वाक्यम् - इत्युक्तं भवति । एतदेव च वाक्यस्य प्रामाण्यं नाम ॥ ]

(8) अनुभवारूढं तु ज्ञानफलम्, 'यत्साक्षादपरोक्षाद् ब्रह्म' इति श्रुतेः, 'तत्त्वमसि' इति च सिद्धवदुपदेशात् ॥ ३-३-३२, पा. ४०७.

## अविषयस्य ब्रह्मणः शास्त्रप्रमाणकत्वं कथम् ?

५९. "अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिः-इति चेत्"- इत्याशङ्क्य समाधानभाष्यम् "न अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य" इति । अत्र टीका -

(१) शास्त्रं हि 'सोऽयम्' इत्यादिलौकिकवाक्यवद् ब्रह्मणि प्रमाणम् । तथा हि 'सोऽयम्' इति देशकालभेदोपाधिप्रविलयेन अभेदोऽत्रगम्यते । तथा त्वंपदार्थोऽपि आत्मानमहंरूपं मन्यमानः, तत्त्वमसिवाक्यात् तत्पदार्थैकता-मुपगच्छन् 'सोऽयम्' इतिवत् अहमात्मकेदमंशोपाधिकृतवेद्यवेदितृवेदनात्मक-प्रपञ्चेन, अर्थात् प्रलीयमानेनावच्छिद्य विच्छिद्यमानानिदंप्रकाशः प्रमाणफलं दर्शितः । तदपि अवच्छेदकविनाशे वदैव विजहन्निर्विशेषतामापद्यते । तेन प्रमाणादिचतुष्टयस्य युगपत् प्रलयेऽपि तदवच्छेदानुभवफलं वाक्यनिबन्धनम् । अतो वेदैकगोचरो निर्वाणम् इति वेदविदः प्रतिपेदिरे । तथा च एवंविधस्य प्रमाणव्यापारस्य प्रकाशका मन्त्रब्राह्मणवादा भाष्ये दर्शिताः ॥

पं. पा. ११२६-११२३.

अत्र 'अविद्याकल्पितभेदनिवृत्तिपरत्वात् शास्त्रस्य' इत्यस्यैव प्रपञ्चो वाक्यशेषेण क्रियते, न तु तत्त्वमसिवाक्येन प्रमाणादिचतुष्टयनिवृत्तिप्रकारः प्रदर्श्यते । तथा हि वेद्यवेदितृवेदनादिभेदनिवृत्तिप्रकारोऽनूदितः शास्त्रे । भाष्ये च व्याख्यातोऽन्यत्र -

(1) एको हि प्रत्यगात्मा भवति, न द्वौ प्रत्यगात्मानौ संभवतः । एकस्यैव तु भेदव्यवहार उपाधिकृतो यथा 'घटाकाशः', 'महाकाशः' इति । ततश्च ज्ञातृज्ञेयादिभेदश्रुतयः, प्रत्यक्षादीनि च प्रमाणानि, संसारानुभवः, विधिप्रतिषेध-शास्त्रं च - इति सर्वमेतदुपपद्यते । तथा च श्रुतिः 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' इत्यविद्याविषये सर्वं व्यवहारं दर्शयति । 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्' इति विद्याविषये सर्वं व्यवहारं वारयति ॥ १-२-२०, पा. ८१.

(2) न हि ईश्वरस्य संसार्यात्मत्वं प्रतिपाद्यत इत्यभ्युपगच्छामः, किं तर्हि संसारिणः संसारित्वापोहेन ईश्वरात्मत्वं प्रतिपिपादयिषितमिति । एवं च सत्या अद्वैतेश्वरस्य अपहतपाप्मत्वादिगुणता, विपरीतगुणता तु इतरस्य मिथ्या

इति व्यवतिष्ठते । यदप्युक्तम् अधिकार्यभावः, प्रत्यक्षादिविरोधश्च इति, तदप्यसत् । प्राक् प्रबोधात् संसारित्वाभ्युपगमात् । तद्विषयत्वाच्च प्रत्यक्षादि-व्यवहारस्य । 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्' (बृ. २-४-१४) इत्यादिना हि प्रबोधे प्रत्यक्षाद्यभावं दर्शयति ॥ ४-१-३, पा. ४६४-४६५.

"तथा च शास्त्रं 'यस्यामतं तस्य मतम्, मतं यस्य न वेद सः । ...." इत्यादिभाष्यं तु न टीकोक्तप्रकारेण प्रमाणफलप्रकाशकमन्त्रब्राह्मण-वादनिदर्शकम्, किं तर्हि आत्मनः सर्वथाप्यविषयतां प्रदर्शयितुम् इत्यर्थानु-गमादेवावगम्यते । 'तत्त्वमसि'वाक्यं तु भाष्योपसंहारवाक्योदितरीत्या 'अविद्याकल्पितसंसारित्वनिवर्तनेन नित्यमुक्तात्मसमर्पकम् । यथा चेदं भाष्य-मतेन, तथा दिङ्मात्रमुदीरितम् 'अनर्थहेतोः प्रहाणाय' इत्यस्य टीकां विमृशद्भिरस्माभिः (खं. ४७) इतीह विरम्यते । अधिकं तु **समन्वयाधि-करणभाष्यार्थतत्त्वविवेचनी**तोऽधिगन्तव्यम् ॥

## वेदान्तवाक्यानां समन्वयः

६०. 'तत्तु समन्वयात्' इति सूत्रं व्याख्यास्यन् भाष्यकार आह – 'तद् ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं वेदान्तशास्त्रादेव अवगम्यते । कथम् ? समन्वयात्' इति । तत्र कीदृशे ब्रह्मणि वाक्यानां समन्वय इति ? अत्र **टीका** –

(१) एवं सामान्यतः सिद्धस्य जगत्कारणस्य सर्वज्ञत्वादिस्वभावत्वे, त्वं-पदार्थस्य च ब्रह्मात्मतायां समन्वयो वेदान्तवाक्यानां सिद्धः । न तत्रास्तिक्रियाया वस्तुस्वरूपान्तर्वर्तिन्या अप्यनुप्रवेशः, दूरत एव बाह्यायाः ॥ पं. पा. १२१०.

[ इह पूर्वतन्त्रे इव न क्रियायां समन्वयो भूतार्थानाम्, नापि विशेषण-विशेष्यात्मकमपि सामानाधिकरण्यमत्र विवक्ष्यते किं तर्हि निरंशे मुख्य एव समन्वयः – इति प्रतिपादयितुं प्रवृत्ता टीका ॥ ]

अत्रेदं विचिन्त्यम्, किं 'जन्माद्यस्य यतः'–इति सूत्रे कारणस्य सर्वज्ञत्वम्, 'तत्तु समन्वयात्' इति सूत्रे तु त्वंपदार्थस्य ब्रह्मात्मतां वक्तुम्, प्रयत्यते इतीदं भाष्यकारसम्मतं न वा इति । भाष्यवाक्यसरणिस्तु नेदृशसमन्वयद्वये तात्पर्यं सूचयति । यतः जन्मादिसूत्रे भाष्यकारः 'यतो वा इमानि भूतानि जायन्ते'

इत्यादिवाक्यम् 'अधीहि भगवो ब्रह्म' इत्यस्योत्तरत्वेन उपन्यस्य, 'आनन्दो ब्रह्मेति व्यजानात् । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' इत्येतन्निर्णयवाक्यम् – इत्याह । तेन आनन्दो ब्रह्म – इत्येतन्मात्रं निर्णीतं तत्रेति गम्यते । न तु जगत्कारणस्य सामान्यतः सिद्धस्य सर्वज्ञत्वादि स्वरूपत्वे वाक्यसमन्वयं दर्शयितुं सूत्रप्रवृत्तिरिति । समन्वयसूत्रेऽपि खलु – 'तद्ब्रह्म वेदान्तशास्त्रादेवावगम्यते' इति, 'सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि' इति, 'न च तद्गतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वयेऽवगम्यमाने अर्थान्तरकल्पना युक्ता' (१–१–४, पा. ११) इति च ब्रुवन् ब्रह्मस्वरूपमात्रे वेदान्तवाक्यानां तद्गतपदानां च समन्वय इत्येव वक्ति भाष्यकार इत्यवगम्यते ॥

किञ्च 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इति जगतः कारणब्रह्मात्मतां ब्रुवद्वाक्यम्, 'तदेतद्ब्रह्मापूर्वमनपरम्' इति प्रतिषिद्धसर्वविशेषब्रह्मस्वरूपसमर्पकं च वाक्यं 'तत्त्वमसि' इति वाक्येन सहैवोदाहृतमस्ति समन्वयसूत्रे । न चेदमुदाहरणं जगत्कारणस्य सर्वज्ञत्वादिस्वरूपे, त्वंपदार्थस्य च ब्रह्मात्मतायां समन्वयो वेदान्तवाक्यानाम् – इति विभागमङ्गीकुर्वताम् अनुकूलम् ॥

किञ्चान्यत्, ईक्षत्यधिकरणस्योत्थानम् उपपादयन् भाष्यकारः प्राह – 'एवं तावद् वेदान्तानां ब्रह्मात्मावगतिप्रयोजनानां ब्रह्मात्मनि तात्पर्येण समन्वितानाम् अन्तरेणापि कार्यानुप्रवेशं ब्रह्मणि पर्यवसानमुक्तम्' (१–१–५, पा. २४) इति । तेनापीदमवगम्यते ब्रह्मस्वरूपे एव समन्वयो वेदान्तानां मुख्यतः, न तु सर्वज्ञत्वादौ – इति ॥

यः पुनः, 'अस्ति तावद् ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावम् सर्वज्ञं सर्वशक्तिसमन्वितम्' (पा. ६), 'अन्यान्यपि एवञ्जातीयकानि वाक्यानि नित्यशुद्धबुद्धमुक्तस्वभावसर्वज्ञस्वरूपकारणविषयाण्युदाहर्तव्यानि' (पा. ९), 'ब्रह्म च सर्वज्ञं सर्वशक्ति, जगदुत्पत्तिस्थितिनाशकारणम् इत्युक्तम्' (पा. २४) – इति सर्वज्ञत्वादिविशेषणाभ्यासो भाष्ये, तत्रोपपत्तिर्भाष्येणैवोक्ता –

"कूटस्थब्रह्मात्मवादिन एकत्वैकान्त्यात् ईशित्रीशितव्याभावे, ईश्वरकारणप्रतिज्ञाविरोधः – इति चेत्, न । अविद्यात्मकनामरूपबीजव्याकरणापेक्षत्वात् सर्वज्ञत्वस्य। .... तदेवम् अविद्यात्मकोपाधिपरिच्छेदापेक्षमेवेश्वरस्य ईश्वरत्वं सर्वज्ञत्वं सर्वशक्तित्वं च, न परमार्थतो विद्ययाऽपास्तसर्वोपाधिस्वरूपे आत्मनि ईशित्रीशितव्यसर्वज्ञत्वादिव्यवहार उपपद्यते ॥" २-१-१४, पा. २०१.

इति । तदेवम् अविद्याकल्पितपरिच्छेदापेक्षत्वात् सर्वज्ञत्वादेः, न वेदान्तवाक्यानां कारणस्य सर्वज्ञत्वादिस्वभावत्वे समन्वयः क्वचिदपि उररीकृतो भाष्ये इत्यवगच्छामः ॥

। अपि च निर्विशेषमेव ब्रह्म वेदान्तवाक्यैः प्रतिपिपादयिषितम् नार्थान्तरम् इत्यत्रेमानि भाष्यवाक्यानि प्रमाणानि –

(१) 'अस्थूलमनण्वह्रस्वमदीर्घम्', 'अशब्दमस्पर्शमरूपमव्ययम्', 'आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म', 'दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः', 'तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः' इत्येवमादीनि वाक्यानि निष्प्रपञ्चब्रह्मात्मतत्त्वप्रधानानि नार्थान्तरप्रधानानीत्येतत् प्रतिष्ठापितं 'तत्तु समन्वयात्' इत्यत्र ॥ ३-२-१४, पा. ३५७.

[अत्र नामरूपनिर्वहणश्रुतिरपि निष्प्रपञ्चब्रह्मप्रतिपादकत्वेनोदाहृता ॥]

(२) जगदुत्पत्तिस्थितिप्रलयहेतुत्वश्रुतेरनेकशक्तित्वं ब्रह्मण इति चेत् । न । विशेषनिराकरणश्रुतीनाम् अनन्यार्थत्वात् ॥ ४-३-१४, पा. ४९८.

(३) नैवम् उत्पत्त्यादिश्रुतीनां निराकाङ्क्षार्थप्रतिपादनसामर्थ्यमस्ति । प्रत्यक्षं तु तासामन्यार्थत्वम् समनुगम्यते । .... उदर्के सत एवैकस्य जगन्मूलस्य विज्ञेयत्वं दर्शयति । 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व, तद्ब्रह्मेति ।' इति च । एवम् उत्पत्त्यादिश्रुतीनाम् ऐकात्म्यावगमपरत्वात्, नानेकशक्तियोगो ब्रह्मणः ॥

४-३-१४, पा. ४९८-४९९.

तदेवं ब्रह्मात्मस्वरूप एव समन्वयः सर्वेषां ब्रह्मवाक्यानां न तु सर्वज्ञत्वादौ समन्वयाङ्गीकारोऽस्ति भाष्यप्रस्थान इति सिद्धम् ॥

## किं ब्रह्मात्मज्ञानं नाम क्रिया ?

६१. प्रतिपत्तिविधिविषयतयैव ब्रह्म शास्त्रेण समर्प्यते, न स्वातन्त्र्येण – इति पूर्वपक्षं विविधयुक्तिभिर्निशात्य भाष्यकारः स्वपक्षमुपसंहृतवान्

'तस्मात्, ज्ञानमेकं मुक्त्वा क्रियाया गन्धमात्रस्याप्यनुप्रवेश इह नोपपद्यते' इति । तत्र शङ्केयमुद्भाविता 'ननु ज्ञानं नाम मानसी क्रिया' इति । सा च शङ्का इत्थं समाहिता –

(१) न । वैलक्षण्यात् । क्रिया हि नाम सा यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते । पुरुषचित्तव्यापाराधीना च । यथा 'यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद् वषट्करिष्यन्' इति, 'सन्ध्यां मनसा ध्यायेत्' इति चैवमादिषु । ध्यानं चिन्तनं यद्यपि मानसम्, तथापि पुरुषेण कर्तुम् अकर्तुम् अन्यथा वा कर्तुं शक्यम्, पुरुषतन्त्रत्वात् । ज्ञानं तु प्रमाणजन्यम् । प्रमाणं च यथाभूतवस्तुविषयम् । अतो ज्ञानं कर्तुम्, अकर्तुम्, अन्यथा वा कर्तुम् अशक्यम् । केवलं वस्तुतन्त्रमेव तत्, न चोदनातन्त्रम्, नापि पुरुषतन्त्रम् । तस्मान्मानसत्वेऽपि ज्ञानस्य महद् वैलक्षण्यम् । यथा च 'पुरुषो वाव गौतमाग्निः', 'योषा वाव गौतमाग्निः' इत्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति । केवलचोदनाजन्यत्वात् क्रियैव सा पुरुषतन्त्रा च । या तु प्रसिद्धेऽग्नौ अग्निबुद्धिः, न सा चोदनातन्त्रा, नापि पुरुषतन्त्रा, किं तर्हि प्रत्यक्षविषय-वस्तुतन्त्रैवेति ज्ञानमेवैतत्, न क्रिया ॥ १-१-४, पा. १८.

इति । तत्रेदं निरूपणीयम् किं ज्ञानं सर्वथापि नैव क्रिया – इति भाष्य-काराशयः, आहोस्वित् क्रियात्वमपि तस्य कयाचित् प्रणाड्या अनुमोदितं तेनेति । तत्र टीकाकारः –

(१) 'ननु ज्ञानं मानसी क्रिया', 'न वैलक्षण्यात्' इत्युत्तरम् । कथं वैलक्षण्यम् ? अजन्यफलत्वात् । उक्तमजन्यफलत्वम् अहङ्कारटीकायाम् । इदमपरं वैलक्षण्यं ज्ञानं न चोदनाजन्यम् । वस्तुजन्यं हि तत् । वस्तु च ज्ञानात् प्रागेव स्वरूपे व्यवस्थितम् । अतस्तत्तन्त्रं ज्ञानम् । न तद् ज्ञानेन अन्यथाकर्तुं शक्यम् । अथापि स्यात्–भवेत् प्रत्यक्षं वस्तुजन्यम्, अनुमानादिषु कथम् ? तत्रापि लिङ्गादिपरतन्त्रम्, न चोदनायास्तत्रानुप्रवेशः । किञ्च, न चोदनाजन्यं ज्ञानम् एकान्ततो वस्तुपरिच्छेदकम्, योषादिष्वग्न्यादिदृष्टिविधान-दर्शनात् । अतो वस्तुविषयस्य ज्ञानस्य क्रियात्वेऽपि न चोदनाजन्यत्वम्, न वा पुरुषतन्त्रत्वम्, अपि तु प्रमाणवस्तुपरतन्त्रत्वम् । एवं सम्यग्ज्ञानत्वोपपत्तेः, अग्नावित्राग्निज्ञानस्य । एवं सति ब्रह्मात्मैकत्वविज्ञानस्यापि यथाभूतवस्तुविषय-त्वान्न चोदनाजन्यत्वम् । अतो न विधेरत्रावकाशः ॥ पं. ११६०-११६५.

अत्र ज्ञानस्य क्रियात्वेऽपि न तत्र विधेरवकाशः इत्युक्तम् । भाष्ये परं 'ज्ञानमेवैतत्, न क्रिया' इति ज्ञानत्वावधारणं क्रियात्वपर्युदासश्च इति ।

कथमत्रैकवाक्यता अभीष्टा टीकाकृतः – इति तु न विज्ञायते । भामत्यामपि टीकावदेव क्रियात्वमभ्युपगतं स्फुटतरम् –

(२) तत्किं मोक्षे क्रियैव नास्ति, तथा च तदर्थानि शास्त्राणि, तदर्थाश्च प्रवृत्तयोऽनर्थकानीत्यत उपसंहारव्याजेनाह – तस्मात्, ज्ञानमेकमिति । अथ ज्ञानं क्रिया मानसी कस्मान्न विधिगोचरः, कस्माच्च तस्याः फलं निर्वर्त्यादिष्वन्यतमं न मोक्षः ? – इति चोदयति 'ननु ज्ञानम्' इति । परिहरति 'न' । कुतः ? वैलक्षण्यात् । अयमर्थः । सत्यम्, ज्ञानं मानसी क्रिया । न त्वियं ब्रह्मणि फलं जनयितुमर्हति । तस्य स्वयंप्रकाशतया विदिक्रियाकर्मभावानुपपत्तेः इत्युक्तम् । तदेतस्मिन् वैलक्षण्ये स्थित एव वैलक्षण्यान्तरमाह – क्रिया हि नाम सेति । यत्र विषये वस्तुस्वरूपनिरपेक्षैव चोद्यते । यथा देवतासंप्रदानकहविर्ग्रहणे देवतावस्तुस्वरूपानपेक्षा देवताध्यानक्रिया, यथा वा योषिति अग्निवस्त्वनपेक्षा अग्निबुद्धिः या सा क्रिया हि नाम – इति योजना । न हि 'यस्यै देवतायै हविर्गृहीतं स्यात्, तां ध्यायेत् वषट्करिष्यन्' इत्यस्माद्विधेः प्राग् देवताध्यानं प्राप्तम्, प्राप्तं तु अधीतवेदान्तस्य विदितपदतदर्थसंबन्धस्य अधिगतशब्दन्यायतत्त्वस्य 'सदेव सोम्येदम्' इत्यादेः 'तत्त्वमसि' इत्यन्तात् संदर्भात् ब्रह्मात्मभावज्ञानं शब्दप्रमाणसामर्थ्यात् इन्द्रियार्थसंनिकर्षसामर्थ्यादिव प्रणिहितमनसः स्फीतालोकमध्यवर्तिकुम्भानुभवः । न ह्यसौ स्वसामग्रीबललब्धजन्मा सन् मनुजेच्छया अन्यथा कर्तुम्, अकर्तुं वा शक्यो देवताध्यानवत्, येनार्थवानत्र विधिः स्यात् । न चोपासना वा अनुभवपर्यन्तता वा अस्य विधेर्गोचरः । तयोरन्वयव्यतिरेकावधृतसामर्थ्ययोः साक्षात्कारे वा अनाद्यविद्यापनये वा विधिमन्तरेण प्राप्तत्वेन पुरुषेच्छया अन्यथाकर्तुम्, अकर्तुं वा अशक्यत्वात् । तस्मात्, ब्रह्मज्ञानं मानसी क्रियापि न विधिगोचरः । पुरुषचित्तव्यापाराधीनायास्तु क्रियाया वस्तुस्वरूपनिरपेक्षिता क्वचिदविरोधिनी, यथा देवताध्यानक्रियायाः ; न ह्यत्र वस्तुस्वरूपेण कश्चिद् विरोधः । क्वचिद् वस्तुस्वरूपविरोधिनी यथा योषित्पुरुषयोरग्निबुद्धिः – इत्येतावता भेदेन निदर्शनमिथुनद्वयोपन्यासः । 'क्रियैव' इत्येवकारेण वस्तुतन्त्रत्वमपाकरोति ॥

वा. भा. १२८–१२९.

[अत्र कल्पतरुः – अनेन 'ज्ञानमेव तन्न क्रिया' इति भाष्ये क्रियाशब्देन क्रियागतम् अवस्तुतन्त्रत्वं लक्षयित्वा प्रतिषिध्यत इति व्याख्यातम् । अत एव हि भाष्यकारो ब्रह्मज्ञानं न चोदनातन्त्रम् इति दार्ष्टान्तिके चोदनातन्त्रत्वं प्रतिषेधति । न ब्रवीति 'न क्रिया' इति । अतः क्रियात्वमभ्युपेत्य ज्ञाने विधेयत्वं न मृष्यत इति गम्यते ॥ पा. १२९.]

नेदं समञ्जसं भाष्याशयवर्णनम् इत्यस्मन्मतिः। भाष्याक्षरबहिर्भूतत्वात्। सर्वथापि मोक्षे क्रियासाध्यत्वानुपपत्तिम्, ब्रह्मणि क्रियाकर्मत्वानुपपत्तिं प्रदर्श्य तदनन्तरमेव हीत्थमुपसंहृतं भाष्ये 'तस्मात्, ज्ञानमेकं मुक्त्वा क्रियाया गन्धमात्रस्याप्यनुप्रवेश इह नोपपद्यते' इति। तत इदमवगम्यते यद् ज्ञाने क्रियात्वमनभ्युपगम्यैवायमुपक्रमः 'न। वैलक्षण्यात्' इत्यादिरिति। तथा हि वाक्यशेषः संग्रहवाक्यविवरणरूपः सङ्गच्छते क्रियाज्ञानयोर्वैलक्षण्यमुपपादयन्, 'क्रिया हि नाम सा', 'यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते', 'ज्ञानं तु प्रमाणजन्यम्' इत्यादि। किञ्च, 'अतो ज्ञानं कर्तुम्, अकर्तुम्, अन्यथा वा कर्तुम् अशक्यम्' इति ज्ञानस्वभाववर्णनं ज्ञानस्य क्रियात्वाभावे एवावकल्पते। क्रिया हि नाम कारकनिष्पाद्या – इति। अतः 'न क्रिया' इति न केवलं वस्तुतन्त्रत्वनिषेधः, किं तु क्रियासामान्यस्यैवेति गम्यते। एवं ह्यत्रोपपादनरीतिः – यत् प्रमाणजन्यं वस्तुतन्त्रं च तन्मानसमपि ज्ञानं न क्रिया; या तु केवलं वस्तुस्वरूपनिरपेक्षा चोदनाजन्या पुरुषतन्त्रा च सा क्रियैव न ज्ञानमिति। 'एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यम्' इति तु ब्रह्मविषयकमपि वेदान्तप्रमाणजन्यत्वात् ज्ञानमेव न क्रियेत्यतिदेशार्थम्। विषयत्वं तु ब्रह्मात्मनो न विवक्षितम्, 'अविद्याकल्पितभेदनिवृत्तिपरत्वात् शास्त्रस्य' इत्यत्र प्रागेव निरस्तत्वात्, जन्माद्यधिकरणभाष्योक्तरीत्या भूतवस्तुत्वमात्रेणापि शास्त्रयोनित्वोपपत्तेः। 'तत्रैवं सति यथाभूतब्रह्मात्मविषयमपि ज्ञानं न चोदनातन्त्रम्' इति पुनः, प्रमाणजन्यत्वादक्रियात्वे सिद्धे चोदनातन्त्रत्वाभावो नान्तरीयक इत्यन्वारम्भणमुत्तरार्थम्। तस्मात्, ब्रह्मात्मज्ञानस्य क्रियावैलक्षण्यात् ध्यानवदविधेयत्वम् इत्युपपादनार्थमेव प्रकृतं भाष्यम्, न क्रियात्वमुपेत्य – इति युक्तमुत्पश्यामः॥

कथं तर्हि मानसक्रियात्वाभावे ज्ञानस्य प्रमाणजन्यत्वमिति ? अत्रेत्थं भाति नः। नात्र ज्ञानं प्रमाणप्रत्ययत्वेन विवक्षितम्, किं तर्हि अवगतिपर्यन्तज्ञानत्वेनैव। अवगतिस्तु कूटस्थात्मचैतन्यरूपैव सती प्रमाणप्रत्ययान्ते अभिव्यज्यत इति कृत्वा जन्येत्युपचर्यते। जन्यप्रत्ययलक्षणं ज्ञानं क्रियारू

प्राङ् निराकृतं न च 'विदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मणः' इति ; इह तु प्रत्ययान्तेऽभिव्यज्यमानफलरूपज्ञाने क्रियात्वं निषिध्यत इत्यपौनरुक्त्यमिति । उक्तं हि **उपदेशसाहस्त्र्याम्** 'कूटस्थनित्यापि सती अवगतिः, प्रत्यक्षादिप्रत्ययान्ते लक्ष्यते तादर्थ्यात् । प्रत्यक्षादिप्रत्ययस्य अनित्यत्वे अनित्येव भवति । तेन प्रमाणानां फलम् इत्युपचर्यते' (उप. गद्य. पा. १०१) इति ॥

तदेवं व्याख्यानप्रस्थानस्य भाष्यप्रस्थानात् वैधर्म्यमेव ज्ञानक्रिया-वैलक्षण्यविचारे इत्यवगच्छामः ॥

## श्रवणादिर्विधीयते वा न वा ?

६२. ब्रह्मज्ञानस्य अक्रियात्वान्न विधेयत्वम् – इत्युपपाद्य भाष्य-कार आह –

(1) "तन्नैवं सति यथाभूतब्रह्मात्मविषयमपि ज्ञानं न चोदनातन्त्रम् । तद्विषये लिङादयः श्रूयमाणा अपि अनियोज्यविषयत्वात् कुण्ठीभवन्ति । उपलादिषु प्रयुक्तक्षुरतैक्ष्ण्यादिवत् । अहेयानुपादेयवस्तुविषयत्वात् । किमर्थानि तर्हि 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इत्यादीनि विधिच्छायानि वचनानि ? स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानि – इति ब्रूमः । यो हि बहिर्मुखः प्रवर्तते पुरुषः, 'इष्टं मे भूयात्, अनिष्टं मा भूत्' इति, न च तत्रात्यन्तिकं पुरुषार्थं लभते, तम् आत्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविककार्यकरणसङ्घात-प्रवृत्तिगोचराद् विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि । तस्य आत्मान्वेषणाय प्रवृत्तस्य अहेयमनुपादेयं च आत्मतत्त्वम् उपदिश्यते 'इदं सर्वं यदयमात्मा', 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् केन कं विजानीयाद् विज्ञातारमरे केन विजानीयात्', 'अयमात्मा ब्रह्म' – इत्यादिभिः ॥ १-१-४, पा. १९.

इति । अत्र **टीकाकारस्य व्याख्यानमिदम्** –

(१) अतः श्रूयमाणा अपि विधयः केवलप्रमाणवस्तुपरतन्त्रे ज्ञाने अकिञ्चित्करत्वात् कुण्ठीभवन्ति । अतोऽर्थवादतयैव आत्मज्ञानस्तावकत्वेन तदुन्मुखीकरणात् सामर्थ्यसिद्धबहिर्मुखतानिरोधाच्च विधिकार्यलेशस्य विद्यमान-त्वात् विधय इव लक्ष्यन्ते । तथा च श्रवणं नाम आत्मावगतये वेदान्तवाक्य-विचारः, शारीरकश्रवणं च । मननं वस्तुनिष्ठवाक्यापेक्षितदुन्दुभ्यादिदृष्टान्त-

जन्मस्थितिलयवाचारम्भणत्वादियुक्तार्थवादानुसन्धानम्, वाक्यार्थाविरोध्यनुमानानुसन्धानं च। निदिध्यासनम् मननोपबृंहितवाक्यार्थविषये स्थिरीभावः। विधेयस्योपासनापर्यायस्य निष्फलत्वात्। दर्शनम् अतो वाक्यार्थे स्थैर्यान्निरस्तसमस्तप्रपञ्चावभासविज्ञानघनैकतानुभवः। कः पुनरत्रार्थवादः? इदमत्र प्रस्तुतम् – क्रियाकारकफलात्मकात् संसाराद् विरक्तायै मैत्रेय्यै मुमुक्षवे मोक्षसाधनमात्मज्ञानम् प्रतिपिपादयिषन्, 'न वा अरे पत्युः कामाय पतिः प्रियो भवति' इति पत्यादेरीप्सितत्वं प्रतिषिध्य आत्मन ईप्सिततमत्वमाह। ननु नैवात्मन ईप्सिततमत्वमुच्यते। किं तु पत्यादीनामेव आत्मार्थतया ईप्सितत्वमुच्यते 'आत्मनस्तु कामाय पतिः प्रियो भवति' इति। नैवम्। न हि तस्मिन् अनिष्टे तदर्थमिष्टं भवति। तस्मात्, अनेनोपायेन आत्मन एवेप्सितत्वमुक्तम्। ईप्सितश्चेत् द्रष्टव्यः श्रोतव्यः – इत्येषोऽर्थवादः। एतच्च सर्वं प्रथमसूत्रेणैव सूत्रितम्, विवृतं च भाष्ये॥ पं. पा. ११६७–११७१.

[अत्र आत्मज्ञानस्तावका अर्थवादाः विधय इव लक्ष्यन्त इत्युक्तम्॥]

## विवरणकारस्तु –

(२) तथा च श्रवणं नाम इत्यादिना यैः श्रवणादिभिरात्मा संस्तूयते तान् विभज्य दर्शयति। ननु श्रवणादिभिः किं श्रेयः क्रियते, येनोत्कर्षवद्भिरेतैर्विषयीकरणात् आत्मा स्तुतः स्यादिति? तदाह 'अतो वाक्यार्थे स्थैर्यात्' इति। ननु विधेयस्यैवार्थवादसंबन्धः। स्तुतेः प्रवृत्तिफलत्वात्, न सिद्धवस्तुनः – इत्याक्षिपति – 'कः पुनः' इति फलप्रशंसाया अपि प्रवृत्त्युपयोगित्वात् फलभूतात्मप्रशंसाया अपि श्रवणादिप्रवृत्त्युपयोगित्वम् उपपद्यत इत्यभिप्रेत्याह – 'इदमत्र प्रस्तुतम्' इत्यादि॥ पं. वि. पा. ११६७–११७१.

[अत्र श्रवणादिभिरात्मा स्तूयत इत्युक्तम्, नात्मज्ञानम्॥]

(३) ननु सम्यग्दर्शनस्य फलरूपत्वात् प्रमाणाधीनत्वाच्च अविधेयतेति युक्ता तस्यार्थवादता; श्रवणादयस्तु क्रियारूपत्वात् सम्यग्दर्शनस्य दृष्टादृष्टोपकारितया विधेया एवेति, तदाह – 'एतच्च सर्वं प्रथमसूत्रेणैव' इति। मनननिदिध्यासनोपबृंहितस्य श्रवणस्य सम्यग्दर्शनाय विधेयत्वमङ्गीकृत्य प्रथमसूत्रं प्रवृत्तमित्यर्थः॥ पं. वि. ११७१.

[अत्र टीकोक्तवैपरीत्येन श्रवणस्य विधेयत्वमेव प्रकरणासङ्गतमुक्तम्॥]

## टीकायां श्रवणादीनामविधेयत्वे युक्त्यन्तरमुच्यते –

(४) अपि च नैवायं विधौ कृत्यः, किं तर्हि 'अर्हे कृत्यतृचश्च' इत्यर्हे कृत्यः। एतेन 'आत्मेत्येवोपासीत', 'आत्मानमेव लोकमुपासीत' इत्येवमादीनि

विधिच्छायानि वाक्यानि व्याख्यातानि वेदितव्यानि । अतो हानोपादानशून्यात्मावगमादेव कृतकृत्यता प्रतीयते ; श्रुतिस्मृतिवादानां च तथा प्रस्थितत्वात् । तस्मान्न प्रतिपत्तिविधिविषयतया ब्रह्मणः समर्पणम् इत्युपसंहरति । तस्यायमर्थः न प्रमाणात्मकेन, इतरेण वा ज्ञानव्यापारेण विधीयमानत्वेन कल्पितेन संस्पर्शो ब्रह्मण इति ॥ पं. पा. ११७२-११७५.

विवरणे तु व्याख्यातमिदम् –

(५) विधीनामपि सतां स्तावकत्वमुक्तम् । इदानीं शब्दस्यार्थान्तरमाह– अपि च नैवायमिति । ननु मा भूवन् ज्ञानविधयः, उपासनाविधिस्तु श्रूयत इति । नेत्याह–तेन 'आत्मेत्येवोपासीत' इत्यादि । सर्वत्रैवकारविशेषणश्रवणात्, अहमिति स्वभावप्राप्तप्रत्ययावृत्त्यनुवादेव विषयविशेषः प्रतिपाद्यः – इति । अतो हानोपादानशून्येत्युपसंहरति ॥ पं. वि. पा. ११७२.

अत्र ब्रह्मज्ञानं न चोदनाजन्यमिति भाष्यप्रक्रमानुसारेणैव **टीकायां** ज्ञानविधिनिरासः क्रियते । **विवरणे तु** यद्यपि टीका तथैव व्याख्यायते, तथापि स्वप्रक्रियानुसारेण श्रवणे विधिरप्यस्तीत्याग्रहः 'एतत्सर्वं प्रथमसूत्रेणैव सूत्रितम्' इत्येतट्टीकार्थव्याख्यानव्याजेन समर्थ्यते । 'श्रवणादयस्तु क्रियारूपत्वात् सम्यग्दर्शनस्य दृष्टादृष्टोपकारितया विधेया एव' इति शङ्कोक्तयुक्त्या चोपष्टभ्यते ; 'विधीनामपि सतां स्तावकत्वमुक्तम्' इति स्वाभिप्रायोपस्थापनेन च । प्रथमसूत्रटीकाविवरणेऽपि "सर्वतो विरक्तस्य आत्मप्रेप्सोरात्मनि विज्ञाते सर्वं विज्ञातम्' 'एतावदरे खल्वमृतत्वम्' इत्युपसंहारात अमृतत्वसाधनं 'द्रष्टव्यः' इत्यनूद्य मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां सह श्रवणं नामङ्गि विधीयते" (पं. वि. पा. ३०) इत्युक्तत्वात् श्रवणे विधिरित्येव विवरणकारमतमिति प्रतीयते ॥

भामत्यां तु –

(६) हेयोपादेयविषयो हि विधिः । स एव च हेय उपादेयो वा यं पुरुषः कर्तुमकर्तुमन्यथा वा कर्तुं शक्नोति । तत्रैव च समर्थः कर्ता अधिकृतो नियोज्यो भवति । न चैवं भूतानि आत्मश्रवणमननोपासनदर्शनानीति विषयतदनुष्ठात्रोर्विधिव्यापकयोरभावात् विधेरभाव इति प्रयुक्ता अपि लिङादयः प्रवर्तनायामसमर्था उपल इव क्षुरतैक्ष्ण्यं कुण्ठम् अप्रमाणीभवन्तीति ॥ वा. भा. १-१-४, १२९.

(७) अन्यतः प्राप्ता एव हि श्रवणादयो विधिसरूपैर्वाक्यैरनूद्यन्ते ॥ १-१-४, वा. भा. पा. १३०.

(८) सत्यम्, न ब्रह्मज्ञानमात्रं सांसारिकधर्मनिवृत्तिकारणम् अपि तु साक्षात्कारपर्यन्तम् । ब्रह्मसाक्षात्कारश्च अन्तःकरणवृत्तिभेदः श्रवणमननादिजनितसंस्कारसचिवमनोजन्मा षड्जादिभेदसाक्षात्कार इव गान्धर्वशास्त्रश्रवणाभ्याससंस्कृतमनोयोनिः । स च निखिलप्रपञ्चमहेन्द्रजालसाक्षात्कारं समूलमुन्मूलयन् आत्मानमपि प्रपञ्चत्वाविशेषात् उन्मूलयति – इत्युपपादितमधस्तात् ॥ वा. भा. पा. १५०.

इत्युक्तम् । अतोऽत्र श्रवणादौ न विधिरनुमन्यत इति गम्यते ॥

अथैवं पञ्चपादिका-भामती-विवरणप्रस्थानानां परस्परवैधर्म्ये स्थिते, किमत्र भाष्यकारहृदयम् ? – इति चिन्त्यम् । तत्र प्रकृतप्रकरणे तावत् आत्मज्ञानं न चोदनातन्त्रम्, अतस्तद्विषये न विधिः संभवतीत्युक्त्वा द्रष्टव्यादिविधिच्छायावचनानां कृत्यं सुस्पष्टमुक्तम् –

(अ) 'आत्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविककार्यकरणसङ्घातप्रवृत्तिगोचराद् विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति' ॥ सू. भा. १-१-४, पा. १९

इति । तथा च आत्मैव द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च – इति प्रत्यक्प्रवणतासंपादने श्रवणादीनामुपयोग इति गम्यते ॥

(आ) ननूक्तं यावच्छब्दमेवावर्तयेन्नाधिकमिति । न । दर्शनपर्यवसितत्वादेषाम् । दर्शनपर्यवसानानि हि श्रवणादीनि आवर्त्यमानानि दृष्टार्थानि भवन्ति । यथा अवघातादीनि तण्डुलादिनिष्पत्तिपर्यवसानानि तद्वत् ॥ ४-१-१, पा. ४६०.

इत्यवघातादिदृष्टान्तेन दृष्टार्थत्वकथनेन श्रवणादीनां नियमविधिरिष्ट इति गम्यते ॥

(इ) येषां पुनर्निपुणमतीनां नाज्ञानसंशयविपर्ययलक्षणः पदार्थविषयकः प्रतिबन्धोऽस्ति, ते शक्नुवन्ति सकृदुक्तमेव तत्त्वमसिवाक्यार्थमनुभवितुम् ॥ ४-१-२, पा. ४६२.

इति सकृच्छ्रवणमात्रेणावगतिफलसम्भावनोक्तेः श्रवणादीनाम् अङ्गाङ्गिभावमन्तरेणापि श्रवणस्य स्वातन्त्र्येणैवानुभवसाधनत्वमूरीकृतमिति निश्चीयते ॥

(ई) द्रष्टव्यादिशब्दा अपि परविद्याधिकारपठिताः, तत्त्वाभिमुखीकरण-प्रधानाः, न तत्त्वावबोधविधिप्रधाना भवन्ति । लोकेऽपि 'इदं पश्य' 'इद-माकर्णय' – इति चैवञ्जातीयकेषु निर्देशेषु 'प्रणिधानमात्रं कुरु' इत्युच्यते, न 'साक्षाज्ज्ञानमेव कुरु' इति । ज्ञेयाभिमुखस्यापि ज्ञानं कदाचिज्जायते, कदाचिन्न जायते । तस्मात् तं प्रति ज्ञानविषय एव दर्शयितव्यो ज्ञापयितुकामेन । तस्मिन् दर्शिते स्वयमेव यथाविषयं यथाप्रमाणं च ज्ञानमुत्पद्यते ॥ ३-२-२१, पा. ३६२-३६३.

इति वचनात्, इहापि च 'तस्य आत्मान्वेषणाय प्रवृत्तस्य अहेयमनुपादेयं च आत्मतत्त्वमुपदिश्यते' इत्युक्तेः, आत्मैकत्वोपदेश एव प्रधानं मुमुक्षूणां कृतार्थतापादनाय, श्रवणादिविधानं तु तत्त्वाभिमुखीकरणोपायमात्रम् इत्यवसीयते ॥

तदेवं वैधर्म्यमेव श्रवणादिविधानविषयेऽपि व्याख्यानप्रस्थानानां भाष्य-प्रस्थानेनेति सिद्धम् । अत्र प्रपञ्चस्तु प्रक्रियाप्रत्यभिज्ञातः, सूत्रभाष्यार्थ-तत्त्वविवेचनीतश्चाधिगन्तव्य इति विरम्यते ॥

## उपसंहारः

६२. तदेवं यथामति प्रदर्शितं पञ्चपादिकाप्रस्थानस्य भाष्यप्रस्थानेन वैधर्म्यम् । तत्र **भाष्यप्रस्थानं** विद्याविद्यादृष्टिप्रधानम्, अविद्यया आत्मा-नात्मनोरितरेतराध्यासलक्षणः सर्वः संसारानर्थः प्रत्युपस्थापितः, स च विद्यया आत्मानात्मनोः सत्यानृतरूपत्वेन स्वरूपावधारणलक्षणया बाधितो भवति – इत्युपपाद्य, मोक्षशास्त्रव्यवहारस्याप्यविद्याकर्तृप्रदर्शनेन मुमुक्षून् सर्वव्यवहारा-तीते स्वरूपप्रतिष्ठालक्षणे स्वाराज्ये अभिषेचयति । पञ्चपादिकाप्रस्थानं तु यद्यपि भाष्यादृताध्यासप्रक्रियामूरीकृत्यैव परमार्थतत्त्वनिर्धारणे प्रवृत्तम्, तथापि अध्यासस्य प्राधान्येनाध्यस्ताहङ्कारलक्षणतामेव स्वीकृत्य, तदुपादान-कारणत्वेन अविद्याशक्तिनाम्नीं बाह्याध्यात्मिकेषु वस्तुषु तत्स्वरूपसत्तामात्रानु-बन्धिनीम् अवश्याभ्युपगन्तव्याम् अभिमन्यते । सा चाविद्या अव्यक्ताव्या-कृतादिशब्दवाच्या ब्रह्मस्वरूपप्रकाशाच्छादनकरी सुषुप्तप्रलयादिषु संस्कार-मात्रशेषा अवतिष्ठते इति च । तेनानेनाभ्युपगमविशेषेण पञ्चपादिकाप्रस्थानं

भाष्यप्रस्थानतः सुस्फुटं विलक्षणं सञ्जातमपि भाष्यकारीयप्रस्थानमेवेत्यभिनिविशमानैरनेकैर्वादिभिः स्वस्वोपज्ञप्रक्रियाविशेषैर्विपरिणामितं शाङ्करत्वेन बहूनां निबन्द्धॄणामभिमतं विचित्राकारैरद्यापि प्रचलतीति स्फोरणार्थं प्राधान्येनाध्यासभाष्यमेवोदाहरणत्वेन समुपादाय भाष्यप्रस्थानगता वेदान्तोपदेशविशेषाः, तद्व्याख्यानाभासेभ्यष्टीकागतेभ्यः प्रविभज्य दर्शिता इह प्रकरणे। अधिकं तु सूत्रभाष्यार्थतत्त्वविवेचनीतोऽधिगन्तव्यमिति सर्वं शिवम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादश्रीमच्छङ्करभगवच्चरणस्मरण-
परिचर्यावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्येण सच्चिदानन्देन्द्र-
सरस्वत्याख्येन भिक्षुणा प्रणीतं पञ्चपादिकाप्रस्थानपरिशीलनम्
समाप्तम्

—:§:—

# अथ परिशिष्टे

# उपनिषद्भाष्यवाक्यानां गीताभाष्यवाक्यानां च सङ्कलनम्

## १. मिथ्याज्ञानशब्दसंवलितानि भाष्यवाक्यानि

मिथ्याज्ञानशब्दः, अनाद्यनिर्वचनीयाविद्याशक्तिमाह – इति पञ्चपादिका । भाष्ये तु भ्रान्तिज्ञानमेव वक्ति सः – इति निदर्शयितुं सूत्रभाष्यवाक्यान्युदाहृतानि ग्रन्थशरीरे (२०) । इह तु विविधोपनिषद्भाष्येभ्यः, गीताभाष्यतश्च वाक्यान्युद्धृत्य समुदाह्रियन्ते । 'मिथ्याज्ञानम्' इत्यत्र न मिथ्याशब्दाज्ञानशब्दयोः समासः, किं तु मिथ्याशब्दज्ञानशब्दयोरेव – इत्येतद् दृढीकरणार्थं मिथ्याप्रत्ययभ्रान्त्यादिशब्दघटितान्यपि वाक्यानीहोदाहरिष्यन्ते । सूत्रभाष्ये इव, उपनिषद्भाष्येषु गीताभाष्ये वा 'मिथ्याभूतम् अज्ञानम्', अनिर्वचनीयम् अज्ञानम्' – इति वा न सकृदपि व्यपदिष्टमित्यवधेयमेतत् ॥

### तत्र तावदुपनिषद्भाष्यवाक्यानि

(१) **आत्मनि सर्वो लोकः क्रियाकारकफलात्मकं विज्ञानं सर्पादिस्थानीयं विपरीतम् अध्यस्य तन्निमित्तं जन्ममरणादिदुःखम् अनुभवति, न तु आत्मा सर्वलोकात्मापि सन् विपरीताध्यारोपनिमित्तेन लिप्यते लोकदुःखेन । कुतः ? बाह्यः । रज्ज्वादिवदेव विपरीतबुद्ध्यध्यासबाह्यो हि स इति ॥ का २-२-११, पा. ९५.**

[अत्र 'विपरीतबुद्धिः' इति मिथ्याज्ञानपर्यायत्वेन प्रयुक्तम् । विपरीतबुद्धिरपि लोकः स्वात्मन्यध्यस्य दुःख्यति – इत्युक्तमत्र ॥ ]

(२) **त्वं हि नः अस्माकं पिता ब्रह्मशरीरस्य विद्यया जनयितृत्वात्, नित्यस्याजरामरणस्य, अभयस्य । यस्त्वमेव अस्माकम् अविद्यायाः विपरीतज्ञानात् जन्मजरामरणरोगदुःखादिग्राहादपारात् अविद्यामहोदधेः, विद्याप्लवेन**

**परम् अपुनरावृत्तिलक्षणं मोक्षाख्यं महोदधेरिव पारं तारयत्यस्मान् ॥ प्र. भा. ६–८, पा. १४०.**

[अत्र, अविद्या विपरीतज्ञानत्वेन व्याख्याता । विपरीतज्ञानमिति तु मिथ्याज्ञान-पर्यायः ॥]

(३) **अब्रह्मप्रत्ययः सर्वोऽविद्यामात्रः, रज्ज्वामिव सर्पप्रत्ययः ॥ मुं. भा. १–२–११, पा. १६४.**

[अत्र अविद्या नाम सर्पप्रत्ययवत् मिथ्याप्रत्ययः – इति व्याख्यातम् ॥]

(४) **न हि सुषुप्तसमाहितमुक्तानां भ्रान्तिदर्शनाभावे आत्मव्यतिरिक्तो बाह्योऽर्थ उपलभ्यते ॥ गौ. का. भा. ४–२५, पा. २३६.**

[भ्रान्तिदर्शनमेव अविद्या इत्युक्तमत्र ; तेन मिथ्याज्ञानमेवाविद्येत्यभिप्रायो गम्यते ॥]

(५) **अविद्या च स्वानुभवेन रूप्यते 'मूढोऽहम्, अविविक्तं मम विज्ञानम्' इति ॥ तै. भा. २–८, पा. ३१०.**

[अविवेकनिमित्तं मौढ्यमेवाविद्याशब्दवाच्यमित्युक्तमत्र । मिथ्याज्ञानशब्देनाप्येतदेव मौढ्यमुच्यत इति सूचितं भवति ॥]

(६) **न हि तैमिरिकद्विचन्द्रादिभेदप्रत्ययम् अनुपमृद्य तिमिरापगमे चन्द्राद्येकत्वप्रत्यय उपजायते । विद्याविद्याप्रत्यययोर्विरोधात् । तत्रैवं सति यं भेदप्रत्ययम् उपादाय कर्मविधयः प्रवृत्ताः, स यस्योपमर्दितः 'सदेकमेवाद्वितीयम्', 'तत्सत्यम्', 'विकारभेदोऽनृतम्' इत्येतद्वाक्यप्रमाणजनितेन एकत्वप्रत्ययेन स सर्वकर्मभ्यो निवृत्तः, निमित्तनिवृत्तेः । स च निवृत्तकर्मा ब्रह्मसंस्थ उच्यते ॥ छां. भा. २–२३–१, पा. ४०६.**

[अत्र भेदप्रत्ययः, अविद्याप्रत्ययः – इति च मिथ्याज्ञानपर्यायत्वेन प्रयोगः ॥]

(७) **तमेवं विकारानृतब्रह्मविज्ञानेन परितुष्टम् अकृतार्थं परमार्थसत्यातिवादिनमात्मानं मन्यमानं योग्यं शिष्यं मिथ्याग्रहविशेषाद् विप्रच्यावयन्नाह भगवान् सनत्कुमारः ॥ छां. भा. ७–१६–१, पा. ५५८.**

[अत्र 'मिथ्याग्रहः' इति 'मिथ्याज्ञानम्' इत्यस्य स्थाने ॥]

(८) **बाह्यविषयेषु स्त्र्यन्नभोजनाच्छादनादिषु तृष्णा, तन्निमित्तं च स्वेच्छाप्रचारत्वं मिथ्याज्ञाननिमित्तत्वात् अनृतम् इत्युच्यते ॥ छां. ८–३–१, पा. ५७२.**

[अत्र सत्यानां कामानाम् आत्माश्रयाणामेव सतां बाह्यविषयाश्रितत्वेन ज्ञानं मिथ्याज्ञानम्, तन्निमित्तत्वं तृष्णायाः स्वेच्छाप्रचारत्वस्य चोच्यते, न तु मिथ्याभूताज्ञानोपादानकत्वमिति स्पष्टमेव । एवं स्थिते एव भाष्ये, एतन्मूला श्रुतिष्टीकाकारेण तद्विवरणकारेण च स्वाभ्यूहितविद्याशक्तिपरत्वेन नीता इति (पा. ३३) अभूताभिनिवेशस्तयोः ॥]

(९) ननु स्वप्ने दृष्टाः प्रतिबुद्धस्य अनृता भवन्ति विषयाः । सत्यमेव । जाग्रद्बोधापेक्षं तु तदनृतत्वं न स्वतः । तथा स्वप्नबोधापेक्षं च जाग्रद्दृष्टविषयानृतत्वं न स्वतः । विशेषाकारमात्रं तु सर्वेषां मिथ्याप्रत्ययनिमित्तमिति वाचारम्भणं विकारो नामधेयमनृतं त्रीणि रूपाणीत्येव सत्यम् ॥ छां· भा· ८-५-४, पा. ५८०.

[ 'मिथ्याप्रत्ययनिमित्तम्' इति मिथ्याज्ञाननिमित्तम् इत्यस्मिन्नर्थे ॥ ]

(१०) पररूपेण च देहादिधर्मैरवगम्यमानस्याऽऽत्मनः स्वरूपाधिगमे विपरीताधिगमनिवृत्तिर्दृष्टं फलम् ॥ छां· भा· ८-७-१, पा· ५८४.

[ विपरीताधिगमः, मिथ्याज्ञानम् ]

(११) आत्मनोक्तोऽक्षिपुरुषो मनसि सन्निहिततरः शिष्यगृहीतच्छायात्मकः, सर्वेषां चाभ्यन्तरः 'सर्वान्तरः' इति श्रुतेः । तमेवावोचदेष उ एवेति । अतो नानृतमुक्तं प्रजापतिना । तथा च तयोर्विपरीतग्रहणनिवृत्त्यर्थं ह्याह ॥ छां· भा· ८-७-४, पा· ५८६.

[ विपरीतग्रहो मिथ्याज्ञानम् ॥ ]

(१२) विपरीतग्राहिणौ च शिष्यावनुपेक्षणीयौ – इति स्वयमेव प्रपच्छ किं पश्यथः ? ' इति ॥ छां· भा· ८-८-१, पा· ५८७.

(१३) एवमशेषमिथ्याग्रहापनयनिमित्ते साध्वलङ्कारादिदृष्टान्ते प्रजापतिनोक्ते श्रुत्वा तथाकृतवतोरपि छायात्मविपरीतग्रहो नापजगाम ॥ छां· भा· ८-८-२, पा· ५८८.

(१४) न चात्मनः संसारित्वम्, अविद्याध्यस्तत्वादात्मनि संसारस्य । न हि रज्जुशुक्तिकागगनादिषु सर्परजतमलादीनि मिथ्याज्ञानाध्यस्तानि तेषां भवन्तीति ॥ छां· भा· ८-१२-१, पा· ५९८.

[अत्र 'अविद्याध्यस्तत्वात्' इत्येतदेव व्याख्यातम् 'मिथ्याज्ञानाध्यस्तानि' इत्यनेन॥ ]

(१५) यदैव आत्मप्रतिपादकवाक्यश्रवणात् आत्मविषयं विज्ञानम् उत्पद्यते, तदैव तदुत्पद्यमानं तद्विषयं मिथ्याज्ञानं निवर्तयदेवोत्पद्यते । आत्मविषयमिथ्याज्ञाननिवृत्तौ च तत्प्रभवाः स्मृतयो न भवन्ति स्वाभाविक्योऽनात्मवस्तुभेदविषयाः ॥ बृ· भा· १-४-७, पा· ६६२.

(१६) पारिशेष्यात् आत्मैकत्वविज्ञानस्मृतिसन्ततेरर्थत एव भावात् न विधेयत्वम् । शोकमोहभयायासादिदुःखदोषनिवर्तकत्वाच्च तत्स्मृतेः । विपरीतज्ञानप्रभवो हि शोकमोहादिदोषः ॥ बृ· भा· १-४-७, पा· ६६३.

(१७) विज्ञानस्य च मिथ्याज्ञाननिवर्तकत्वव्यतिरेकेणाकारकत्वम् इत्यवोचाम ॥ बृ· भा· १-४-१०, पा· ६७१.

(१८) यदि ज्ञानाभावो, यदि संशयज्ञानम्, यदि विपरीतज्ञानं वा उच्यते अज्ञानमिति सर्वं हि तत् ज्ञानेनैव निवर्त्यते न तु कर्मणा ; अन्यतमेनापि विरोधाभावात् ॥ बृ. भा. ३-३-१, पा. ७९९.

[अत्र ज्ञानविनाश्यमज्ञानशब्दवाच्यं त्रेधैवेति परिगणितम् । न तु टीकोक्ता अविद्याशक्तिः, तद्विवरणेन स्वीकृतं वा ज्ञानाभावमिथ्याज्ञानतत्संस्कारेभ्यो व्यतिरिक्तं भावरूपमज्ञानमत्र परामृष्टम् – इत्यवधेयमेतत् ॥]

(१९) अर्थात् अविद्याया सतत्त्वं निर्धारितम्, अतद्धर्माध्यारोपणरूपत्वम्, अनात्मधर्मत्वं च ॥ बृ. भा. ४-३-३४, पा. ९०४.

[अतद्धर्माध्यास एवाविद्या इत्युक्तमत्र ॥]

## अथ गीताभाष्यवाक्यानि

(१) तत्रैवं धर्मसम्मूढचेतसो मिथ्याज्ञानवतः महति शोकसागरे निमग्नस्य अर्जुनस्य अन्यत्रात्मज्ञानात् उद्धरणमपश्यन् भगवान् वासुदेवः, ततः कृपया अर्जुनमुद्दिधीर्षुः, आत्मज्ञानयावतारयन् आह ॥ २-११, पा. १२.

(२) एतं वै तमात्मानं विदित्वा निवृत्तमिथ्याज्ञानाः सन्तो ब्राह्मणाः, मिथ्याज्ञानवद्भिरवश्यं कर्तव्येभ्यः पुत्रैषणादिभ्यो व्युत्थायाथ भिक्षाचर्यं शरीरस्थितिमात्रप्रयुक्तं चरन्ति । न तेषाम् आत्मज्ञाननिष्ठाव्यतिरेकेण अन्यत् कार्यमस्ति – इत्येवं श्रुत्यर्थमिह गीताशास्त्रे प्रतिपिपादयिषितम् आविष्कुर्वन् आह भगवान् ॥ ३-१७, पा. ५१.

(३) नापि कर्म अकर्मेति मिथ्यादर्शनात् अशुभान्मोक्षणं बुद्धिमत्त्वं युक्तता कृत्स्नकर्मकृत्वादि च फलम् उपपद्यते स्तुतिर्वा । मिथ्याज्ञानमेव हि साक्षादशुभरूपम्, कुतोऽन्यस्मादशुभान्मोक्षणम् ॥ ४-१८, पा. ६९.

(४) न च मिथ्याज्ञानं बोद्धव्यं भवति, तत्प्रत्युपस्थापितं वा वस्त्वाभासम् ॥ ४-१८, पा. ६९.

(५) आत्मविदो निवृत्तमिथ्याज्ञानत्वात्, विपर्ययज्ञानमूलस्य कर्मयोगस्यासम्भवः स्यात् ॥ ५-१, पा. ८४.

(६) जन्मादिसर्वविक्रियारहितत्वेन निष्क्रियम् आत्मानम् आत्मत्वेन यो वेत्ति, तस्याऽऽत्मविदः सम्यग्दर्शनेनापास्तमिथ्याज्ञानस्य निष्क्रियात्मस्वरूपावस्थानलक्षणं सर्वकर्मसंन्यासमुक्त्वा तद्विपरीतस्य मिथ्याज्ञानमूलकर्तृत्वाभिमानपुरःसरस्य सक्रियात्मस्वरूपावस्थानरूपस्य कर्मयोगस्य इह शास्त्रे

तत्र तत्र आत्मस्वरूपनिरूपणप्रदेशेषु सम्यग्ज्ञानमिथ्याज्ञानतत्कार्यविरोधात् अभावः प्रतिपाद्यते यस्मात्, तस्मात् आत्मविदो निवृत्तमिथ्याज्ञानस्य विपर्ययज्ञानमूलः कर्मयोगो न सम्भवतीति युक्तमुक्तं स्यात् ॥ ५-१, पा. ८४.

(७) शरीरस्थितिमात्रप्रयुक्तेष्वपि दर्शनश्रवणादिकर्मसु आत्मयाथात्म्यविदः, न करोमीति प्रत्ययस्य समाहितचेतस्तया सदा कर्तव्यत्वोपदेशात् आत्मतत्त्वविदः सम्यग्दर्शनविरुद्धो मिथ्याज्ञानहेतुकः कर्मयोगः स्वप्नेऽपि न सम्भावयितुं शक्यते ॥ ५-१, पा. ८५.

(८) तेषामेव कथं नु नाम श्रेयः स्यात् इति अनुकम्पार्थं दयाहेतोः, अहं अज्ञानजम् अविवेकतो जातं मिथ्याप्रत्ययलक्षणं मोहान्धकारं तमः नाशयामि ॥ १०-११, पा. १५२.

[विवेकाभावादेव निमित्तेन मिथ्याप्रत्ययलक्षणो मोहान्धकारो जायत इत्युक्तमत्र, न तु मिथ्याभूताज्ञानोपादानपरिणामो मिथ्याप्रत्यय इति ॥ ]

(९) अविद्यावत्त्वात् क्षेत्रज्ञस्य संसारित्वम् इति चेत् । न । अविद्यायास्तामसत्वात् । तामसो हि प्रत्ययः आवरणात्मकत्वात् अविद्या – विपरीतग्राहकः संशयोपस्थापको वा, अग्रहणात्मको वा ; विवेकप्रकाशभावे तदभावात् तामसे च आवरणात्मके तिमिरादिदोषे सति अग्रहणादेरविद्यात्रयस्योपलब्धेः ॥ १३-२, पा. १९२.

[अत्राज्ञानं त्रिविधमेव ज्ञानाभावसंशयमिथ्याज्ञानरूपविधाभेदैः – इति परिगणितम् । मिथ्याज्ञानं च विपरीतग्राहकम् इति व्याख्यातम् । तस्मात्, अनिर्वचनीयम् अज्ञानं नाम मिथ्याज्ञानं न भाष्यकाराणामिष्टमिति गम्यते । किञ्च प्रसङ्गेनेदमप्यवधेयमत्र यत् तामसः प्रत्ययः इति व्याख्याता अविद्या अन्तःकरणाश्रया, न तु प्रत्यगात्मसत्तानुबन्धिनी यथाऽऽह टीकाकृदिति ॥

(१०) न च मिथ्याज्ञानं परमार्थवस्तु दूषयितुं समर्थम् । न हि ऊषरदेशं स्नेहेन पङ्कीकर्तुं शक्नोति मरीच्युदकम् । तथा अविद्या क्षेत्रज्ञस्य न किञ्चित् कर्तुं शक्नोति ॥ १३-२, पा. १९४.

[अविद्या नाम मिथ्याज्ञानमेव भाष्यकारमते । सा जीवस्य ब्रह्मस्वरूपं प्रच्छाद्य संसारित्वमापादयतीति टीकोक्तप्रकारेणात्मानमन्यथयतीति न भाष्यकारो मनुते । यथाप्रसिद्धं तु संसारम् आत्मनि विद्यमानमिव प्रदर्शयति केवलं यावद्विद्योदयम् – इत्येव भाष्यप्रस्थानम् इति स्पष्टम् ॥ ]

(११) क्षेत्रक्षेत्रज्ञयोर्विषयविषयिणोर्भिन्नस्वभावयोरितरेतरतद्धर्माध्यासलक्षणः संयोगः क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबन्धनः, रज्जुशुक्तिकादीनां

तद्विवेकज्ञानाभावात् अध्यारोपितसर्परजतादिसंयोगवत् । सोऽयम् अध्यास-स्वरूपः क्षेत्रक्षेत्रज्ञसंयोगो मिथ्याज्ञानलक्षणः ॥ १३-२६, पा. २१३.

[अत्राध्यास एव मिथ्याज्ञानम् इत्युक्तम् । तेन मिथ्याऽज्ञानोपादानकोऽध्यासः इति टीकाकारमतं भाष्यकारप्रस्थाने नेष्यत इति गम्यते । उदाहृतमिदं वाक्यं ग्रन्थशरीरेऽपि (खं. २१, पा. २७) ॥]

(१२) 'न सत्तन्नासदुच्यते' इत्यनेन निरस्तसर्वोपाधिविशेषं ज्ञेयं ब्रह्म स्वरूपेण यः पश्यति, क्षेत्रं च मायानिर्मितहस्तिस्वप्नदृष्टवस्तुगन्धर्वनगरादिवत् असदेव सदिवावभासते इत्येवं निश्चितविज्ञानो यः, तस्य यथोक्तसम्यग्दर्शन-विरोधात् अपगच्छति मिथ्यज्ञानम् ॥ १३-२६, पा. २१३.

[अत्रापि अध्यास एव मिथ्याज्ञानमित्युक्तम्, न तु 'अध्यासोपादानकारणं मिथ्याभूतमज्ञानमिति' टीकाकारमतमादृतम् ॥]

(१३) पुरुषस्य प्रकृतिस्थत्वरूपेण मिथ्याज्ञानेन युक्तस्य भोग्येषु गुणेषु सुखदुःखमोहात्मकेषु 'सुखी', 'दुःखी', 'मूढोऽहमस्मि' इत्येवं रूपो यः सङ्गः तत् कारणं पुरुषस्य सदसद्योनिजन्मप्राप्तिलक्षणस्य संसारस्य .... ॥ १४-१८, पा. २२३.

(१४) गुणस्वरूपम्, गुणवृत्तम्, स्ववृत्तेन च गुणानां बन्धकत्वम्, गुणवृत्तनिबद्धस्य च पुरुषस्य या गतिः – इत्येतत् सर्वं मिथ्याज्ञानमूलं बन्धकारणं विस्तरेणोक्त्वा, अधुना सम्यग्दर्शनान्मोक्षो वक्तव्य इत्यत आह भगवान् ॥ १४-१९, पा. २२३, २२४.

## २. अथ व्यवहारपदघटितानि वाक्यानि

'अहं ममेति नैसर्गिकोऽयं लोकव्यवहारः' इत्यत्र लोकव्यवहारो नाम 'मनुष्य इत्यभिमानः' इति टीकायाम् अर्थः सङ्कोचितः । भाष्ये तु सर्वो लौकिको वैदिकश्च व्यवहार एवाध्यासकार्यत्वेनाभिप्रेत इति (खं. १५, पा. १७) सूत्रभाष्यवाक्योदाहरणैरादर्शितम् (खं. २०, पा. २४-२६) । अथात्रैतस्मिन्नर्थे एव व्यवहारशब्दः प्रयुज्यते सर्वत्र – इति प्रदर्शयितुम् उपनिषद्भाष्यवाक्यानि गीताभाष्यवाक्यानि च कतिचिदुदाहरिष्यन्ते –

### उपनिषद्भाष्येषु वाक्यानि

(१) प्रेत्य व्यावृत्य अस्मात् लोकात् पुत्रमित्रकलत्रबन्धुषु ममाहम्भाव-संव्यवहारलक्षणात्, त्यक्तसर्वैषणा भूत्वा – इत्यर्थः ॥ के. भा. १-१, पा. १९.

(१) यैर्वागाद्युपादिभिः 'वाचो ह वाक्', 'चक्षुषश्चक्षुः', 'श्रोत्रस्य श्रोत्रं,' 'मनसो मनः', 'कर्ता', 'भोक्ता', 'विज्ञाता', 'नियन्ता', 'प्रशासिता', 'विज्ञानमानन्दं ब्रह्म' इत्येवमादयः संव्यवहारा असंव्यवहार्ये निर्विशेषे परे साम्ये ब्रह्मणि प्रवर्तन्ते तान् व्युदस्य आत्मानमेव निर्विशेषं ब्रह्म विद्धि – इति एवशब्दार्थः ॥ के· १–५, पा· २२·

[ अत्र व्यवहारः· प्रत्ययव्यपदेशलक्षणः ॥ ]

(३) यथा गृहस्थानाम् अनेकविरुद्धसंव्यवहारप्रयोजनवत्त्वात् जिह्मं कौटिल्यं वक्रभावोऽवश्यंभावि तथा न येषु जिह्मम् ॥ प्र· १–१६, पा· ११२·

[अत्र संव्यवहारः प्रवृत्तिः ॥]

(४) स्वयञ्ज्योतिष्ट्वादिव्यवहारोऽपि आमोक्षान्तः सर्वोऽविद्याविषय एव मनआद्युपाधिजनितः ॥ प्र· भा· ४–५, पा· १२४·

(५) अविद्याकृतनामरूपोपाधिकृतो हि विशेषोऽभ्युपगम्यत आत्मनो बन्धमोक्षादिशास्त्रकृतसंव्यवहाराय ॥ प्र. भा· ६–३, पा· १३६·

(६) अभिधानाभिधेयरूपयोर्वाङ्मनसयोः क्षीणत्वात् अव्यवहार्यः ॥ मां· भा· १२, पा· १६४·

(७) यदा वितथं द्वैतम् आत्मैवैकः परमार्थतः सन्, तदा इदं निष्पन्नं भवति – सर्वोऽयं लौकिको वैदिकश्च व्यवहारोऽविद्याविषय एवेति ॥ गौ. का· भा· २–३२, पा· २०४·

(८) यथा तु आकाशस्य अविद्याध्यारोपितघटाद्युपाधिकृतरजोधूममलवत्त्वादिदोषवत्त्वम्, तथा आत्मनः अविद्याध्यारोपितबुद्ध्याद्युपाधिकृतसुखदुःखादिदोषवत्त्वे बन्धमोक्षादयो व्यावहारिका न विरुध्यन्ते। सर्वैरादिभिरविद्याकृतव्यवहाराभ्युपगमात्, परमार्थानभ्युपगमाच्च ॥ गौ· का· भा· ३–५, पा· २११·

(९) शास्त्रादिसर्वव्यवहारास्पदं ग्राह्यग्राहकलक्षणं द्वयं लौकिकं लोकादनपेतं लौकिकं जागरितम्-इत्येतत् ॥ गौ· का· भा. ४–८७, प. २५२·

(१०) अतो नामरूपे सर्वावस्थे ब्रह्मणैवात्मवती, न ब्रह्म तदात्मकम्। ते तत्प्रत्याख्याने न स्त एवेति तदात्मके उच्येते। ताभ्यां चोपाधिभ्यां ज्ञातृज्ञेयज्ञानशब्दार्थादिसर्वसंव्यवहारभाग् ब्रह्म ॥ तै· भा· २–६, २९९·

(११) योऽयम् अज्ञानादिलक्षणः संव्यवहारः कार्यभूतः स संव्यवहारमात्रमेव, न परमार्थवस्तु ॥ तै· भा· ३–६, पा· ३२२·

(१२) तस्मात्, नामरूपोपाधिनिमित्ता एव आत्मन्यसंसारधर्मिणि सर्वे व्यवहाराः ॥ बृ. भा. २-१-२०, पा. ७३९.

(१३) अस्ति चायं भेदकृतो मिथ्याव्यवहारो, येषां ब्रह्मतत्त्वादन्यत्वेन वस्तु विद्यते येषां च नास्ति ॥ बृ. भा. ३-५-१, पा. ८११.

(१४) न हि परमार्थावधारणनिष्ठायां वस्त्वन्तरास्तित्वं प्रतिपद्यामहे 'एकमेवाद्वितीयम्', 'अनन्तरमबाह्यम्' इति श्रुतेः। न च नामरूपव्यवहारकाले त्वविवेकिनां क्रियाकारकफलादिसंव्यवहारो नास्तीति प्रतिषिध्यते ॥ बृ. भा. ३-५-१, पा. ८११.

(१५) अतः स्वप्नो भूत्वा स्वप्नवृत्तिमवभासयन् धियः स्वापवृत्त्याकारो भूत्वा, इमं लोकं जागरितव्यवहारलक्षणं कार्यकरणसङ्घातात्मकं लौकिकशास्त्रीय-व्यवहारास्पदम् अतिक्रामति ॥ बृ. भा. ४-३-७, पा. ८७०, ८७१.

## भगवद्गीताभाष्ये

(१) योऽयं लौकिको वैदिकश्च व्यवहारः, स उत्पन्नात्मविवेकज्ञानस्य स्थितप्रज्ञस्य अविद्याकार्यत्वात् अविद्यानिवृत्तौ निवर्तते ॥ २-६९, पा. ३८.

(२) वस्त्वप्राप्यैव हि सर्व एव क्रियाकारकादिव्यवहारोऽविद्याभूमावेव ॥ ४-१८, पा. ६७.

## ३. प्रातिभासिकपदार्थविषयाणि वाक्यानि

शुक्तिरजतादिज्ञानविषयाः कारणमपेक्ष्योत्पद्यन्त इति पञ्चपादिकानुयायिनो मन्यन्ते। तत्र रजतमिति प्रत्ययमात्रं केवलम्, न तु रजतमप्यस्तीति भाष्यकारहृदयम्। ग्रन्थशरीरे (खं. २६, पा. ३८) एतदर्थकानि सूत्रभाष्य-वाक्यान्युदाहृतानि। इदानीं तूपनिषद्भाष्यगतानि, गीताभाष्यगतानि च वाक्यानि समुदाह्रियन्ते –

(१) एवमेताः कलाः प्राणिनाम् अविद्यादिदोषबीजापेक्षया सृष्टाः, तैमिरिकदृष्टिसृष्टा इव द्विचन्द्रमशकमक्षिकाद्याः स्वप्नदृक्सृष्टा इव च सर्वपदार्थाः पुनस्तस्मिन्नेव पुरुषे प्रलीयन्ते हित्वा नामरूपादिविभागम् ॥ प्र. भा. ६-४, पा. १३८, १३९.

(२) शरो ह्यात्मा उपाधिलक्षणः पर एव जले सूर्यादिवत् इह प्रविष्टः देहे सर्वबौद्धप्रत्ययसाक्षितया। स शर इव स्वात्मन्येवार्पितोऽक्षरे ब्रह्मणि ॥ मुं. २-२-४, पा. १६०.

(३) अब्रह्मप्रत्ययः सर्वोऽविद्यामात्रो रज्ज्वामिव सर्पप्रत्ययः । ब्रह्मैवैकं परमार्थसत्यम् ॥ मुं· भा· २–२–११, पा· १६४.

(४) दृष्टं च रज्जुसर्पादीनाम् अविद्याकृतमायाबीजोत्पन्नानां रज्ज्वाद्यात्मना सत्त्वम् ॥ गौ· का· भा· १–६, पा· १८४.

(५) न हि रज्ज्वादीनां अविद्यास्वभावव्यतिरेकेण सर्पाद्याभासत्वे कारणं शक्यं वक्तुम् ॥ गौ· का· भा· १–९, पा· १८५.

(६) सोऽयमात्मा परमार्थापरमार्थरूपः, चतुष्पात् इत्युक्तः । तस्य अपरमार्थरूपम् अविद्याकृतं रज्जुसर्पादिसमम् उक्तं पादत्रयलक्षणं बीजाङ्कुरस्थानीयम् । अथ इदानीम् अबीजात्मकं परमार्थस्वरूपं रज्जुस्थानीयं सर्पादिस्थानीयोक्तस्थानत्रयनिराकरणेनाह–'नान्तःप्रज्ञम्' इत्यादिना ॥ मां· भा· मं· ७, पा· १८६.

(७) न हि रज्ज्वां भ्रान्तिबुद्ध्या कल्पितः सर्पो विद्यमानः सन् विवेकतो निवृत्तः । नैव माया मायाविना प्रयुक्ता तद्दर्शिनां चक्षुर्बन्धापगमे विद्यमाना सती निवृत्ता ॥ गौ· का· भा· १–१७, पा· १९०–१९१.

(८) यथायं प्रपञ्चो मायारज्जुसर्पवत् तथायं शिष्यादिभेदविकल्पोऽपि प्राक्प्रतिबोधादेव उपदेशनिमित्तः ॥ गौ· का· भा· १–१८, पा· १९१.

(९) न हि रज्जुसर्पयोर्विवेके रज्ज्वां प्रविष्टः सर्पो बुद्धिसंस्कारात् पुनः पूर्ववत् तद्विवेकिनाम् उत्थास्यति ॥ गौ· का· भा· १–१२, पा· १९४.

(१०) आदिमध्यान्ताः उत्पत्तिस्थितिप्रलयाः सर्वस्य प्रणव एव मायाहस्तिरज्जुसर्पमृगतृष्णिकास्वप्नादिवदुत्पद्यमानस्य वियदादिप्रपञ्चस्य यथा मायाव्यादयः ॥ गौ· का· भा· १–२७, पा· १९५.

(११) यदि हि पूर्वमेव रज्जुः स्वरूपेण निश्चिता स्यात्, न सर्पादिविकल्पोऽभविष्यत् । यथा स्वहस्ताङ्गुल्यादिषु । एष दृष्टान्तः । तद्वत् हेतुफलादिसंसारधर्मानर्थविलक्षणतया स्वेन विशुद्धविज्ञप्तिमात्रसत्ताद्वयरूपेण अनिश्चितत्वात् जीवप्राणाद्यनन्तभावभेदैरात्मा विकल्पित इत्येष सर्वोपनिषदां सिद्धान्तः ॥ गौ· का· भा· २–१७, पा· २०१.

[आत्मस्वरूपेणानिश्चय एव हेतुः जीवादिरूपेण विकल्पने इत्यत्र दृष्टान्तः ॥]

(१२) एतैः प्राणादिभिः आत्मनोऽपृथग्भूतैरपृथग्भावैः एष आत्मा रज्जुरिव सर्पादिविकल्पनारूपैः पृथगेवेति लक्षितः, अभिलक्षितः निश्चितो मूढैरित्यर्थः । विवेकिनां तु रज्ज्वामिव कल्पिताः सर्पादयो नात्मव्यतिरेकेण प्राणादयः सन्ति इत्यभिप्रायः ॥ गौ· का· भा· २–३०, पा· २०३.

(१३) न हि मनोविकल्पनाया रज्जुसर्पादिलक्षणाया रज्ज्वां प्रलय उत्पत्तिर्वा। न च मनसि रज्जुसर्पस्य उत्पत्तिः प्रलयो वा, न च उभयतो वा। तथा मानसत्वाविशेषात् द्वैतस्य। न हि नियते मनसि सुषुप्ते वा द्वैतं गृह्यते। अतो मनोविकल्पनामात्रं द्वैतमिति सिद्धम्॥ गौ. का. भा. २-३२, पा. २०४.

[प्रातिभासिकस्य सर्पादेः नोत्पत्तिः, न प्रलयः-इत्युक्तमत्र ॥]

(१४) यथा रज्ज्वाम् असद्भिः सर्पधारादिभिः, अद्वयेन च रज्जुद्रव्येण सता 'अयं सर्पः', 'इयं धारा', 'दण्डोऽयम्' इति वा रज्जुद्रव्यमेव कल्प्यते, एवं प्राणादिभिरनन्तैः असद्भिरेवाविद्यमानैः, न परमार्थतः। .... परमार्थसता आत्मना रज्जुवत् सर्पादिविकल्पास्पदभूतेनायं स्वयमेवात्मा कल्पितः सदा एकस्वभावोऽपि सन्॥ गौ. का. भा. २-३३, पा. २०५.

[अत्र सर्पादिविकल्पाः विकल्पनाकालेऽपि रज्ज्वादिषु न विद्यन्ते इत्युक्तम्॥]

(१५) समन्ततः समन्तात् यथा न जायते किञ्चित् अल्पमपि न स्फुटति, रज्जुसर्पवदविद्याकृतदृष्ट्या जायमानम् येन प्रकारेण न जायते सर्वतोऽजमेव ब्रह्म भवति, तथा तं प्रकारं शृणु - इत्यर्थः॥ गौ. का. भा. ३-२, पा. २०९.

(१६) तस्मादेवाकाशात् घटादयः सङ्घाता यथोत्पद्यन्ते, एवम् आकाशस्थानीयात् परमात्मनः पृथिव्यादिभूतसङ्घाताः आध्यात्मिकाश्च कार्यकरणलक्षणाः रज्जुसर्पवत् विकल्पिता जायन्ते॥ गौ. का. भा. ३-३, पा. २०९.

(१७) न हि ऊषरदेशः तृड्वत्प्राण्यध्यारोपितोदकफेनतरङ्गादिमान्। तथा नात्मा अबुधारोपितक्लेशादिमलैर्मलिनो भवतीत्यर्थः॥ गौ. का. ३-८, पा. २१२.

(१८) न हि रज्ज्वाम् अविद्याध्यारोपितं सर्पं पुनर्विवेकतो नष्टं जनयेत् कश्चित्॥ गौ. का. भा. ३-२५, पा. २१९.

(१९) सतो विद्यमानस्य वस्तुनः रज्ज्वादेः सर्पादिवत् मायया जन्म युज्यते। न तु तत्त्वतो यथा, तथाऽग्राह्यस्यापि सत एवात्मनो रज्जुसर्पवद् जगद्रूपेण मायया जन्म युज्यते। न तु तत्त्वत एव अजस्यात्मनो जन्म॥ गौ. का. भा. ३-२७, पा. २२०.

(२०) तद्धि द्वितीयस्य चन्द्रस्य असत्त्वम्, यदतैमिरिकेण चक्षुष्मता न गृह्यते॥ तै. भा. २-८, पा. ३०९.

(२१) तैमिरिकदृष्टस्य हि द्वितीयचन्द्रस्य नात्मलाभः, नाशो वा अस्ति॥ तै. भा. २-८, पा. ३१०.

(२२) स्वाभाविकस्य आत्मन्यक्रिये अध्यारोपितस्य कर्त्रादिकारकक्रिया-फलभेदविज्ञानस्य निवर्तकमद्वैतविज्ञानम्, रज्ज्वादाविव सर्पाद्यध्यारोपलक्षण-ज्ञानस्य रज्ज्वादिस्वरूपनिश्चयः प्रकाशनिमित्तः; उपासनं तु यथाशास्त्रसमर्पितं किञ्चिदालम्बनमुपादाय तस्मिन् समानचित्तवृत्तिसन्तानकरणं तद्विलक्षण-प्रत्ययानन्तरितम्-इति विशेषः ॥ छां· भा· अव· पा· ३५२·

(२३) न हि तैमिरिकद्विचन्द्रादिभेदप्रत्ययमनुपमृद्य तिमिरापगमे चन्द्राद्येकत्वप्रत्यय उपजायते ॥ छां· भा· २-२३-१, पा· ४०६·

(२४) निरवयवस्य सतः कथं विकारसंस्थानमुपपद्यते ? नैष दोषः । रज्ज्वाद्यवयवेभ्यः सर्पादिसंस्थानवत् बुद्धिपरिकल्पितेभ्यः सदवयवेभ्यो विकार-संस्थानोपपत्तेः ॥ छां· भा· ६-२-२, पा· ५०९·

(२५) इदं तु सत् चेतनम्, ईक्षितृत्वात् । तत् कथम् ऐक्षतेति ? आह-बहु प्रभूतं स्यां भवेयं प्रजायेय प्रकर्षेणोत्पद्येय । यथा मृद् घटाद्याकारेण, यथा वा रज्ज्वादि सर्पाद्याकारेण बुद्धिपरिकल्पितेन ॥ छां·भा· ६-२-३, पा· ५१०·

(२६) असदेव तर्हि सर्वं यद् गृह्यते रज्जुरिव सर्पाद्याकारेण । न । सत एव द्वैतभेदेन अन्यथा गृह्यमाणत्वात्, नासत्त्वं कस्यचिद् क्वचिदिति ब्रूमः । यथा सतोऽन्यत् वस्त्वन्तरं परिकल्प्य पुनस्तस्यैव प्रागुत्पत्तेः प्रध्वंसाच्चोर्ध्वम् असत्त्वं ब्रुवते तार्किकाः, न तथा अस्माभिः कदाचित् क्वचिदपि सतोऽन्यत् अभिधानम् अभिधेयं वा वस्तु परिकल्प्यते । सदेव तु सर्वम् अभिधानम् अभिधीयते च यदन्यबुद्ध्या । यथा रज्जुरेव सर्पबुद्ध्या सर्प इत्यभिधीयते, यथा वा मृदोऽन्यबुद्ध्या पिण्डघटादिशब्देनाभिधीयते लोके । रज्जुविवेकदर्शिनां तु सर्पाभिधानबुद्धी निवर्तेते ॥ छां· भा· ६-२-३, पा· ५१०·

[सुस्फुटमिदं यदत्र कारणमेव कार्यबुद्ध्या गृह्यते, तथाभिधीयते च इति वक्तुं रज्जुसर्पादिदृष्टान्ता आनीयन्ते, न तु सर्पादीनां तत्र कारणसामग्री पृथगन्वेष्टव्या इति भाष्यकारोऽभिप्रैतीति ॥]

(२७) प्राग्रूपत्रयविवेकविज्ञानात् या अग्निबुद्धिरासीत् ते, साग्निबुद्धि-रपगता अग्निशब्दश्च इत्यर्थः । यथा दृश्यमानरक्तोपधानसंयुक्तः स्फटिको गृह्यमाणः 'पद्मरागोऽयम्' इति शब्दबुद्ध्योः प्रयोजको भवति, प्रागुपधान-स्फटिकयोर्विवेकविज्ञानात् । तद्विवेकविज्ञाने तु पद्मरागशब्दबुद्धी निवर्तेते तद्विवेकविज्ञातुः, तद्वत् ॥ छां· भा· ६-४-१, पा· ५१४·

(२८) आत्मन्यविद्याकल्पनानिमित्तानि दुःखानि रज्ज्वामिव सर्पादि-कल्पनानिमित्तानि ॥ छां. ८-१-२, पा· ५९३·

(२९) यस्मिन् सर्वमिदं वाचारम्भणं विकारो नामधेयम् अनृतं रज्ज्वामिव सर्पादिविकल्पजातम् अध्यस्तमविद्यया, तदस्य जगतो मूलम् ॥ छां. ६-८-४, पा. ५२५.

[विकारो नामरूपलक्षणः अविद्यया अध्यस्तः, न तस्य कारणं सद्ब्रह्मणोऽन्यत् अविद्याशक्त्यादिरूपमन्वेष्टव्यम् इत्यत्र रज्जुसर्पविकल्पदृष्टान्तः ॥]

(३०) न चाऽऽत्मनः संसारित्वम्, अविद्याध्यस्तत्वात् आत्मनि संसारस्य। न हि रज्जुशुक्तिकागगनादिषु सर्परजतमलादीनि मिथ्याज्ञानाध्यस्तानि तेषां भवन्तीति ॥ छां. भा. ८-१२-१, पा. ५९८.

[अत्र 'मिथ्याज्ञानाध्यस्तानि' सर्परजतादीनि अविद्याध्यस्तसंसारस्य दृष्टान्तत्वेनानीतानि ॥]

(३१) अतोऽस्मात् क्रियाकारकफलभेदस्वरूपात् एतावदिदमिति साध्य-साधनरूपाद् विरक्तस्य कामादिदोषकर्मबीजभूताविद्यानिवृत्तये रज्ज्वामिव सर्प-विज्ञानापनयाय ब्रह्मविद्या आरभ्यते ॥ बृ. भा. अव., पा. ६१०.

[अत्र बीजभूता अविद्या सर्पविज्ञानोपमिता ॥]

(३२) क्षुधार्तस्य प्रतिषेधज्ञानसंस्कृतस्य अभक्ष्ये अभोज्ये वा प्रत्युपस्थिते कलञ्जाभिशस्तान्नादौ 'इदं भक्ष्यम्', 'अदो भोज्यम्' इति वा ज्ञानमुत्पन्नम्, तद्विषयया प्रतिषेधज्ञानस्मृत्या बाध्यते । मृगतृष्णिकायामिव पेयज्ञानं तद्विषययाथात्म्यविज्ञानेन ॥ बृ. भा. १-३-१, पा. ६२७.

(३३) यथा गृह्यमाणाया अपि शुक्तिकाया विपर्ययेण रजताभासाया अग्रहणं विपरीतज्ञानव्यवधानमात्रम्, तथा ग्रहणं ज्ञानमात्रमेव; विपरीतज्ञान-व्यवधानापोहार्थत्वात् ज्ञानस्य, एवमिहापि आत्मनोऽलाभोऽविद्यामात्रव्यव-धानम् ॥ बृ. भा. १-४-७, पा. ६६६.

(३४) आत्मस्वरूपं .... हि यस्मात् स ब्रह्मविद् भवति ब्रह्मविद्या-समकालमेव अविद्यामात्रव्यवधानापगमात् शुक्तिकाया इव रजताभासायाः शुक्तिकात्वम् इत्यवोचाम ॥ बृ. भा. १-४-१०, पा. ६७६.

(३५) अनवधृतविषयविशेषस्वरूपं हि सामान्यमात्रमाश्रित्य विपरीत-प्रत्ययः उत्पद्यमानः उत्पद्यते । यथा शुक्तिकायां 'रजतम्' इति । स च विषयविशेषावधारणवतः अशेषविपरीतप्रत्ययाश्रयस्य उपमर्दितत्वात् न पूर्ववत् सम्भवति । शुक्तिकादौ सम्यक्प्रत्ययोत्पत्तौ पुनरदर्शनात् ॥ बृ. भा. १-४-१०, पा. ६७८.

(३६) क्वचिद् विद्यायाः पूर्वोत्पन्नविपरीतप्रत्ययजनितसंस्कारेभ्यो विपरीत-प्रत्ययावभासाः स्मृतयो जायमानाः विपरीतप्रत्ययभ्रान्तिम् अकस्मात् कुर्वन्ति ।

यथा विज्ञातदिग्विभागस्यापि अकस्मात् दिग्विपर्ययविभ्रमः ॥ बृ.भा. १-४-१०, पा. ६७८.
[बाधितमिथ्यार्थज्ञानमपि संस्कारवशात् मिथ्यार्थज्ञानाभासं जनयेत् इत्युक्तमत्र ॥]

(३७) विज्ञानमये व्यतिरिक्ते कार्यकरणदेवतात्मत्वप्रदर्शनम् अविद्याध्यारोपितं शुक्तिकायामिव रजतत्वदर्शनम् – इत्येतत् सिध्यति व्यतिरिक्तात्मास्तित्वप्रदर्शनन्यायेनैव ॥ बृ. भा. २-१-१८, पा. ७२८.

(३८) यथा कृष्णो रक्तश्च आकाशः इति विवेकिनामपि कदाचित् कृष्णता रक्तता च आकाशस्य संव्यवहारमात्रालम्बनार्थत्वं प्रतिपद्यत इति न परमार्थतः कृष्णो रक्तो वा आकाशो भवितुमर्हति ॥ बृ. भा. २-१-२०, पा. ७३९.

(३९) न स्वत आत्मनः संसारित्वम् अलक्तकाद्युपाधिसंयोगजनितरक्तस्फटिकादिबुद्धिवद् भ्रान्तमेव न परमार्थतः ॥ बृ. भा. २-१-२०, पा. ७३९, ७४०.

(४०) यद् ब्रह्मक्षत्रादि कर्मनिमित्तं वर्णाश्रमादिलक्षणं आत्मन्यविद्याध्यारोपितप्रत्ययविषयं क्रियाकारकफलात्मकम् अविद्याप्रत्ययविषयं रज्ज्वामिव सर्पप्रत्ययः, तदुपमर्दनायाह – आत्मनि खल्वरे मैत्रेयि दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितं विज्ञातं भवति ॥ बृ. भा. २-४-५, पा. ७६०.

(४१) यथा रज्जुशुक्तिकागगनादयः सर्परजतमलिना भवन्ति पराध्यारोपितधर्मविशिष्टाः ; स्वतः केवला एव रज्जुशुक्तिकागगनादयः । न चैवं विरुद्धधर्मसमवायित्वे पदार्थानां कश्चन विरोधः ॥ बृ. भा. ३-५-१, पा. ८१०.

(४२) यदा तु परमार्थदृष्ट्या परमार्थतत्त्वात् श्रुत्यनुसारिभिः अन्यत्वेन निरूप्यमाणे नामरूपे मृदादिविकारवत् वस्त्वन्तरे तत्त्वतो न स्तः, सलिलफेनघटादिविकारवदेव, तदा तदपेक्ष्य 'एकमेवाद्वितीयम्', 'नेह नानास्ति किञ्चन' इत्यादिपरमार्थदर्शनगोचरत्वं प्रतिपद्यते ॥ बृं. भा. ३-५-१, पा. ८११.

(४३) तदेव पुनरिन्धसंज्ञः प्रविविक्ताहारः, ततोऽन्तर्हृदये लिङ्गात्मा प्रविविक्ताहारतरः, ततः परेण जगदात्मा प्राणोपाधिः ; ततोऽपि प्रविलाप्य जगदात्मानम् उपाधिभूतम् रज्ज्वादाविव सर्पादिकं विद्यया 'स एष नेति नेति' इति साक्षात् सर्वान्तरं ब्रह्माधिगतम् ॥ बृ. भा. ४-३-१, पा. ८६०.

(४४) यथा हि लोके स्वच्छस्वाभाव्ययुक्तः स्फटिकः तन्निमित्तमेव केवलं हरितनीललोहिताद्युपाधिभेदसंयोगात् तदाकारत्वं भजते, न च स्वच्छस्वाभाव्यव्यतिरेकेण हरितनीललोहितादिलक्षणा धर्मभेदाः स्फटिकस्य कल्पयितुं शक्यन्ते ॥ बृ. भा. ४-३-३०, पा. ८९९.

# गीताभाष्ये प्रातिभासिकपदार्थविषयाणि वाक्यानि

**(१) एकाधिकरणत्वं घटादिविशेष्याभावे न युक्तम् इति चेत् । न । 'इदमुदकम्' इति मरीच्यादौ अन्यतराभावेऽपि सामानाधिकरण्यदर्शनात् ॥ २-१६, पा. १५.**

[ 'घटः सन्' इत्यादिस्थले घटादेरसत्त्वे, घटस्य सतश्च विशेष्यविशेषणभावेन सामानाधिकरण्यं न युक्तम् इति शङ्का । 'इदमुदकम्' इत्यादिस्थले उदकादेरभावेऽपि इदमः, उदकस्य च सामानाधिकरण्यं दृश्यत इति प्रत्युदाहरणेन समाधानं सिद्धान्तिनः ॥]

**(२) यस्यां ग्राह्यग्राहकभेदलक्षणायाम् अविद्यानिशायां प्रसुप्तान्येव भूतानि 'जाग्रति' इत्युच्यन्ते । यस्यां निशायां प्रसुप्ता इव स्वप्नदृशः, सा निशा अविद्यारूपत्वात् परमार्थतत्त्वं पश्यतो मुनेः ॥ २-६९, पा. ३८.**

[ अत्र अविद्यावस्थायां दृश्यमानमपि ग्राह्यग्राहकलक्षणं भेदजातं वस्तुतो नास्त्येव स्वप्नदृष्टमिव हस्त्यादि इत्युक्तम् ॥ ]

**(३) ननु कर्म कर्मैव सर्वेषाम्, न क्वचिद् व्यभिचरति तत् । न । नौस्थस्य नावि गच्छन्त्यां तटस्थेषु अगतिषु नगेषु प्रतिकूलगतिदर्शनात् । दूरेषु चक्षुषा असंनिकृष्टेषु गच्छत्सु गत्यभावदर्शनात् । एवम् इहापि अकर्मणि कर्मदर्शनं कर्मणि च अकर्मदर्शनं विपरीतदर्शनम्, येन तन्निराकरणार्थमुच्यते 'कर्मण्यकर्म यः पश्येत्' इत्यादि ॥ ४-१८, पा. ६७.**

**(४) ब्रह्मार्पणम्, येन करणेन ब्रह्मविद् हविरग्नौ अर्पयति, तद् ब्रह्मैव – इति पश्यति, तस्यात्मव्यतिरेकेण अभावं पश्यति – यथा शुक्तिकायां रजताभावं पश्यति । तदुच्यते 'ब्रह्मैवार्पणम्' इति यथा 'यद् रजतं तच्छुक्तिकैव' – इति ॥ ४-२४, पा. ७३.**

[प्रतिभासो रजतवत्, तद् वस्तुतः शुक्तिकैव ॥]

**(५) न च मिथ्याज्ञानं परमार्थवस्तु दूषयितुं समर्थम् । न हि ऊषरदेशं स्नेहेन पङ्कीकर्तुं शक्नोति मरीच्युदकम् । तथा अविद्या क्षेत्रज्ञस्य न किञ्चित् कर्तुं शक्नोति ॥ १३-२, पा. १९४.**

[मिथ्याज्ञान-मरीच्युदक-अविद्याशब्दाः साहचर्येण समभिव्याहृता अत्र; तथा च 'मरीच्युदकम्' इत्यनेन तज्ज्ञानमेवोच्यतेऽत्रेति गम्यते ॥ ]

**(६) क्षेत्रक्षेत्रज्ञयोर्विषयविषयिणोर्भिन्नस्वभावयोरितरेतरतद्धर्माध्यासलक्षणः संयोगः क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबन्धनः, रज्जुशुक्तिकादीनां तद्विवेकज्ञानाभावात् अध्यारोपितसर्परजतादिसंयोगवत् ॥ १३-२६, पा. २१३.**

[विवेकाभाव एव रजतादिसंयोगाभासनिमित्तम् इत्युक्तमत्र ॥ ]

(७) क्षेत्रं च मायानिर्मितहस्तिस्वप्नदृष्टवस्तुगन्धर्वनगरादिवत् असदेव सदिवावभासते ॥ १३-२६, पा. २१३.

[प्रतीतरूपेणासत्त्वमेव हस्त्यादीनाम् इत्युक्तमत्र ॥]

(८) ननु सर्वोऽपि लोकः पश्यति, किं विशेषणेनेति ? सत्यं पश्यति, किं तु विपरीतं पश्यति । अतो विशिनष्टि स एव पश्यतीति । यथा तिमिरदृष्टिरनेकं चन्द्रं पश्यति, तमपेक्ष्यैकचन्द्रदर्शी विशिष्यते स एव पश्यतीति .... ॥ १३-२७, पा. २१४.

[ज्ञानिदृष्टः परमात्मा एक एव सन्, अज्ञानिभिरनेकवद् दृश्यत इत्युक्तमत्र । तत्र विपरीतज्ञानमेव निमित्तमिति च ॥ ]

(९) (आद्य)पुरुषात् संसारमायावृक्षप्रवृत्तिः प्रसृता निःसृता, ऐन्द्रजालिकादिव माया पुराणी चिरन्तनी ॥ १५-४, पा. २३०.

(१०) यथा जलसूर्यकः सूर्यांशो जलनिमित्तापाये सूर्यमेव गत्वा न निवर्तते, तेनैवात्मना संगच्छति एवमेव ; यथा वा घटाद्युपाधिपरिच्छिन्नो घटाद्याकाशः आकाशांशः सन् घटादिनिमित्तापाये आकाशं प्राप्य न निवर्तते ॥ १५-७, पा. २३१.

[घटाकाशः, प्रतिबिम्बो वा प्रतिभासकालेऽपि आकाशव्यतिरेकेण बिम्बव्यतिरेकेण वा नास्ति पृथगिव तु आभासते इत्यर्थः ॥]

(११) योऽपि देहादिव्यतिरिक्तात्मवादी आत्मानमेव केवलं कर्तारं पश्यति, असावपि अकृतबुद्धिः, अतोऽकृतबुद्धित्वात् न स पश्यति आत्मनस्तत्त्वं कर्मणो वा इत्यर्थः । अतः दुर्मतिः, कुत्सिता विपरीता दुष्टाऽजस्रं जननमरणप्रतिपत्तिहेतुभूता मतिः अस्येति दुर्मतिः । स पश्यन्नपि न पश्यति । यथा तैमिरिकोऽनेकं चन्द्रम्, यथा वा अभ्रेषु धावत्सु चन्द्रं धावन्तम्, यथा वा वाहने उपविष्टोऽन्येषु धावत्सु आत्मानं धावन्तम् ॥ १८-१६, पा. २६३.

(१२) विद्वांस्तु पुनर्विद्यया अविद्यायां निवृत्तायां शक्नोत्येव अशेषतः कर्म परित्यक्तुम्, अविद्याध्यारोपितस्य शेषानुपपत्तेः । न हि तैमिरिकदृष्ट्या अध्यारोपितस्य द्विचन्द्रादेः, तिमिरापगमे शेषोऽवतिष्ठते ॥ १८-४८, पा. २७८.

यथोदाहृतवाक्येभ्य इदमवगम्यते यत् प्रातिभासिकरजतादीव नापेक्षते अर्थगतदोषादीन् नियमेनाध्यासः, यथाह टीकाकृत् ; नापि काञ्चित् मूलाविद्याम्, अवस्थाविद्यां वा स्वात्मोत्पत्तौ, यथाह पञ्चपादिकाविवरणकारः, अवभासमात्रत्वात् तस्येति ॥

# ४. सुषुप्त्याद्यवस्थावाक्यानि

अविद्याशक्तिरवश्याभ्युपगन्तव्या बाह्यान्तरवस्तुसत्तामात्रानुबन्धिनी, सा च सुषुप्ते संस्कारमात्रावशेषेण स्थित्वा जागरिते अहङ्कारादिरूपेण परिणमते – इति टीकाप्रस्थानम् । सैव मूलाविद्या नाम, अवस्थात्रयेऽपि दण्डायमाना सुषुप्ते केवलाऽवतिष्ठते, ज्ञानाभावसंशयमिथ्याज्ञानतत्संस्कारेभ्यो व्यतिरिक्ता च – इति विवरणप्रस्थानम् । भाष्यप्रस्थाने पुनः, जीवो सर्वदा ब्रह्मणा अनन्य एव सन् पररूपमिवापद्यमानो जागरितस्वप्नयोः, सुषुप्ते केवलं स्वेन परिशुद्धब्रह्मरूपेणैवावतिष्ठते । तच्च पररूपं मिथ्याज्ञानकृतबुद्ध्याद्युपाधिसंबन्धकृतम्, स च संबन्धो सुषुप्तादिषु बीजात्मना विद्यमान एव, जागरितादिष्वाविर्भवतीति मिथ्याज्ञानेनैवानुमीयते इति ॥

यथा च टीकाप्रस्थानसंमता अविद्याशक्तिर्नैवाभ्युपगम्यते भाष्यप्रस्थाने तथा सूत्रभाष्यगतवाक्योदाहरणेनोपपादितं ग्रन्थशरीरे (पा. ४२) । अथेदानीम् उपनिषद्भाष्यगीताभाष्यवाक्यान्युदाह्रियन्ते यैः सुषुप्तिसमाधिमूर्छाद्यवस्थासु सद्ब्रह्मसंपत्तिरेव भवति जीवस्येति स्फुटीभवेत् ॥

(१) इन्द्रियाणां श्रोत्रादीनाम् स्वस्वविषयग्रहणप्रयोजनेन स्वकारणेभ्य आकाशादिभ्यः पृथगुत्पद्यमानानाम् अत्यन्तविशुद्धात् केवलात् चिन्मात्रात्मस्वरूपात् पृथग्भावं स्वभावविलक्षणात्मकताम्, तथा तेषामेव इन्द्रियाणाम् उदयास्तमयौ च उत्पत्तिप्रलयौ च जाग्रत्स्वप्नावस्थापेक्षया 'नात्मनस्तौ' इति मत्वा ज्ञात्वा विवेकतः, धीरो धीमान् न शोचति । आत्मनो नित्यैकस्वभावत्वाव्यभिचारात् शोककारणत्वानुपपत्तेः ॥ का॰ २-३-६, पा॰ ९९.

[इन्द्रियसंबन्धः तद्वियोगश्चात्मनो भवतीव जाग्रत्स्वप्नापेक्षया । वस्तुतस्तु नित्यैकस्वभावत्वमात्मनः इत्यर्थः । स्वप्नग्रहणम् उपलक्षणार्थम्, सुषुप्ते सर्वथापि इन्द्रियसंयोगाभावादित्यवगन्तव्यम् ॥]

(२) ताम् ईदृशीं तदवस्थां योगमिति मन्यन्ते वियोगमेव सन्तम् । सर्वानर्थसंयोगवियोगलक्षणा हि इयमवस्था योगिनः । एतस्यां हि अवस्थायाम् अविद्याध्यारोपणवर्जितस्वरूपप्रतिष्ठ आत्मा । स्थिराम् इन्द्रियधारणाम् स्थिरामचलाम् इन्द्रियधारणां बाह्यान्तःकरणानां धारणम् इत्यर्थः ॥ का॰ भा॰ २-३-११, पा १०१.

**(३) उपरते च जाग्रत्स्वप्नव्यापारे यत् प्रसन्नं निरायासलक्षणम् अनाबाधं सुखं कस्यैतद् भवति ? तस्मिन् काले जाग्रत्स्वप्नव्यापारादुपरताः सन्तः कस्मिन्नु सर्वे सम्यगेकीभूताः सम्प्रतिष्ठिताः । मधुनि रसवत् समुद्रप्रविष्टनद्यादिवच्च विवेकानर्हाः प्रतिष्ठिता भवन्ति सङ्गताः संप्रतिष्ठिता भवन्तीत्यर्थः । .... अत्र तु कार्यकरणसङ्घातो यस्मिंश्च प्रलीनः सुषुप्तप्रलयकालयोः, तद्विशेषं बुभुत्सोः स कः नु स्यात् ? इति, कस्मिन् सर्वे सम्प्रतिष्ठिता भवन्तीति ॥ प्र. पा, ४-१, पा. १२२.**

[सुषुप्तप्रलययोर्ब्रह्मणि एकीभवति सर्वः कार्यकरणसङ्घातः – इति वेदान्तमर्यादा । तां बुभुत्सोरयं प्रश्न इत्यर्थः ॥]

**(४) न हि विदुष एव श्रोत्रादीनि स्वपन्ति, प्राणाग्नयो वा जाग्रति । जाग्रत्स्वप्नयोर्मनः स्वातन्त्र्यमनुभवत् अहरहः सुषुप्तं वा प्रतिपद्यते । समानं हि सर्वप्राणिनां पर्यायेण जाग्रत्स्वप्नसुषुप्तिगमनम् ॥ प्र. भा ४, पा. १२४.**

**(५) यथा हृदयाकाशे पुरीतति नाडीषु च स्वपतः तत्सम्बन्धाभावात् ततो विविच्य दर्शयितुं शक्यत इत्यात्मनः स्वयञ्ज्योतिष्ट्वं न बाध्यते, एवं मनसि अविद्याकामकर्मनिमित्तोद्भूतवासनावति कर्मनिमित्ता वासना अविद्यया अन्यद् वस्त्वन्तरमिव पश्यतः सर्वकार्यकरणेभ्यः प्रविविक्तस्य द्रष्टुर्वासनाभ्यो दृश्यरूपाभ्योऽन्यत्वेन स्वयञ्ज्योतिष्ट्वं सुदर्पितेनापि तार्किकेण न वारयितुं शक्यते ॥ प्र. ४-५, पा. १२५.**

[ हृदयाकाशे इति ब्रह्मणीत्यर्थः ; द्रष्टव्यं सूत्रभाष्यं (३-२-७) । सुषुप्ते सर्वथा कार्यकरणेभ्यो विविक्तत्वात् स्वप्ने च वासनानां विषयत्वेनैव विनियुक्तत्वात् तद्विषयिणः स्वयञ्ज्योतिष्ट्वम् इत्यर्थः ॥]

**(६) यदा मनो दार्वग्निवत् अविशेषविज्ञानरूपेण कृत्स्नं शरीरं व्याप्यावतिष्ठते तदा सुषुप्तो भवति ; अत्र एतस्मिन् काले एष मनआख्यो देवः स्वप्नान् न पश्यति । दर्शनद्वारस्य निरुद्धत्वात् तेजसा । अथ तदा एतस्मिन् शरीरे एतत् सुखं भवति यद्विज्ञानं निराबाधम् अविशेषेण शरीरव्यापकं प्रसन्नं भवतीत्यर्थः ॥ प्र. भा. ४-६, पा. १२६.**

[ विज्ञानम् अविशेषेण शरीरं व्याप्य तिष्ठति, शरीरे एतत् सुखं भवति – इति च शरीरग्रहणं जागरितदृष्ट्या । न हि वस्तुतः सुषुप्ते शरीरसंबन्धोऽस्ति । अत एव **सूत्रभाष्ये** लिखितमस्ति 'योऽप्यसौ सुषुप्तावस्थायां दर्शनादिव्यवहाराभाव उक्तः सोऽप्यात्मन एवासङ्गत्वविवक्षया उक्तः, न प्राणस्वभावविवक्षया, परमात्मप्रकरणात् । यदपि तस्याम् अवस्थायां सुखमुक्तम् , तदप्यात्मन एव सुखरूपत्वविवक्षया उक्तम्' (१-३-१२) इति । एवं च 'अविशेषविज्ञानरूपेण' इति 'निर्विशेषचैतन्यरूपेण' इत्ययमेवार्थः ॥]

(७) एतस्मिन् काले अविद्याकामकर्मनिबन्धनानि कार्यकरणानि शान्तानि भवन्ति । तेषु शान्तेषु आत्मस्वरूपम् उपाधिभिरन्यथा विभाव्यमानम् अद्वयम् एकं शिवं शान्तं भवति – इत्येताम् एव अवस्थां पृथिव्याद्यविद्याकृतमात्रानुप्रवेशेन दर्शयितुं दृष्टान्तमाह – .... ॥ प्र· भा· ४–७, पा· १२६·

(८) अतः परं [पृथिव्यादिप्रविलयानन्तरम्] यदात्मरूपं जलसूर्यकादिवत् भोक्तृत्वकर्तृत्वेन इहानुप्रविष्टम् एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा .... विज्ञानं कर्तृकारकस्वरूपं तदात्मा तत्स्वभावः, विज्ञातृस्वभावः इत्यर्थः । पुरुषः कार्यकरणसङ्घातोक्तोपाधिपूरणात् पुरुषः । स च जलसूर्यकादिप्रतिबिम्बस्य सूर्यादिप्रवेशवत् जलाद्याधारशोषे परेऽक्षरे आत्मनि सम्प्रतिष्ठते ॥ प्र· भा. ४–९, पा· १२७.

(९) समस्तं जगत् कार्यकरणलक्षणं सह विज्ञानात्मना परस्मिन् अक्षरे सुषुप्तिकाले सम्प्रतिष्ठत इत्युक्तम् । सामर्थ्यात् प्रलयेऽपि तस्मिन्नेवाक्षरे सम्प्रतिष्ठते जगत्, तत एवोत्पद्यते – इति च सिद्धं भवति ॥ प्र· भा· ६–१, पा. १३२·

(१०) ज्ञानस्यापि सुषुप्तेऽभावात् ज्ञेयवत् ज्ञानस्वरूपस्य व्यभिचारः इति चेत् । न । ज्ञेयावभासकस्य ज्ञानस्य आलोकवत् ज्ञेयाभिव्यञ्जकत्वात् स्वव्यङ्ग्याभावे आलोकाभावानुपपत्तिवत् अप्रतीतेषु वस्तुषु सुषुप्ते विज्ञानाभावानुपपत्तेः ॥ प्र· भा· ६–२, पा· १३३.

(११) एष हि स्वरूपावस्थः सर्वेश्वरः ॥ मां· भा· ६, पा· १८१·

(१२) सर्वत्राव्यभिचारात् ज्ञस्वरूपस्य सत्यत्वम् । सुषुप्ते व्यभिचरतीति चेत् । न । सुषुप्तस्य अनुभूयमानत्वात् ॥ मां· भा· ७, पा· १८७.

[अनुभव एव ज्ञस्वरूपम् इति भावः]

(१३) तत्त्वाप्रतिबोधमात्रमेव हि बीजं प्राज्ञत्वे निमित्तम् ॥ गौ· का· भा· १–११, पा· १८८.

[न तु स्वरूपाच्छादकशक्तिसद्भावो निमित्तम् यथाह टीकाकृत् ॥]

(१४) लीयते सुषुप्तौ हि यस्मात् सर्वाभिरविद्यादिप्रत्ययबीजवासनाभिः सह तमोरूपम् अविशेषरूपं बीजभावमापद्यते, तत् विवेकविज्ञानपूर्वकं निगृहीतं निरुद्धं सत् न लीयते तमोबीजभावं नापद्यते । तस्मात्, युक्तः प्रचारभेदः सुषुप्तस्य समाहितस्य (च ?) मनसः ॥ गौ· का· भा· ३–३५, पा· २२२–२२३·

[अत्र सुषुप्तौ अविद्याप्रत्ययवासनाया अविनाशः, समाधौ आत्मसत्यानुबोधेन विवेकेन तद्विनाशः – इत्युक्तम् ॥]

(१५) न हि सुषुप्तसमाहितमुक्तानां भ्रान्तिदर्शनाभावे आत्मव्यतिरिक्तो बाह्योऽर्थ उपलभ्यते ॥ गौ. का. भा. ४-२५, पा. २३६.

(१६) अवस्तु अनुपलम्भं च । ग्राह्यग्रहणवर्जितम् इत्येतत् । लोकोत्तरम् अत एव लोकातीतम् । ग्राह्यग्रहणविषयो हि लोकः, तदभावात् सर्वप्रवृत्तिबीजं सुषुप्तम् इत्येतत् ॥ गौ. का. भा. ४-८८, पा. २५२.

[ग्राह्यग्रहणाभाव एव, न तु तदतिरिक्ताविद्याशक्तिसंयुतम् ॥]

(१७) अन्यस्य चाविद्याकृतत्वे विद्यया अवस्तुत्वदर्शनोपपत्तिः । तद्धि द्वितीयस्य चन्द्रस्य असत्त्वं यत् अतैमिरिकेण चक्षुष्मता न गृह्यते । नैवं न गृह्यत इति चेत्, न । सुप्तसमाहितयोरग्रहणात् । सुषुप्ते अग्रहणम् अन्यासक्तवदिति चेत्, न । सर्वाग्रहणात् । जाग्रत्स्वप्नयोरन्यस्य ग्रहणात् सत्त्वमेवेति चेत् । न । अविद्याकृतत्वात् जाग्रत्स्वप्नयोः । यदन्यग्रहणं जाग्रत्स्वप्नयोः तदविद्याकृतम् । विद्याभावे अभावात् । सुषुप्तेऽग्रहणमपि अविद्याकृतम् इति चेत् । न । स्वाभाविकत्वात् ॥ तै. भा. २-८, पा. ३०९.

[सुषुप्ते द्वितीयाग्रहणम् नाविद्यालक्षणपरोपाधिकृतम्, किं तु स्वाभाविकमेवेत्युक्तमत्र ॥]

(१८) बाह्येन्द्रियविषये जागरितस्थाने नभसि दुःखबाहुल्यं दृश्यते । ततोऽन्तःशरीरे स्वप्नस्थानभूते मन्दतरं दुःखं भवति स्वप्नान् पश्यतः । हृदयस्थे पुनर्नभसि न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति । अतः सर्वदुःखनिवृत्तिरूपमाकाशं सुषुप्तस्थानम् ॥ छां. भा. ३-१२-९, पा. ४२३.

(१९) न हि प्रागुत्पत्तेः 'नामवद्, रूपवद् वा इदम्' इति ग्रहीतुं शक्यं वस्तु सुषुप्तकाले इव । यथा सुषुप्तादुत्थितः सत्त्वमात्रमवगच्छति 'सुषुप्ते सन्मात्रमेव केवलं वस्तु' इति, तथा प्रागुत्पत्तेः – इत्यभिप्रायः ॥ छां. भा. ६-२-१, पा. ५०६.

(२०) न ह्यन्यत्र सुषुप्तात् स्वमपीतिं जीवस्येच्छन्ति ब्रह्मविदः । तत्र हि आदर्शापनयने पुरुषप्रतिबिम्ब आदर्शगतो यथा स्वमेव पुरुषम् अपीतो भवति । एवं मनआद्युपरमे चैतन्यप्रतिबिम्बरूपेण जीवेनात्मना मनसि प्रविष्टा नामरूपव्याकरणाय परा देवता सा स्वमेवात्मानं प्रतिपद्यते जीवरूपतां मनआख्यां हित्वा । अतः सुषुप्त एव स्वप्नान्तशब्दवाच्य इत्यवगम्यते ॥ छां. भा. ६-८-१, पा. ५२२.

(२१) पुण्यापुण्ययोर्हि सुखदुःखारम्भकत्वं प्रसिद्धम् पुण्यापुण्ययोश्च अविद्याकामोपष्टम्भेनैव सुखदुःखतद्दर्शनकार्यारम्भकत्वम् उपपद्यते नान्यथा –

इति अविद्याकामकर्मभिः संसारहेतुभिः संयुक्त एव स्वप्ने इति न स्वम् 'अपीतो भवति । अनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्छोकान् हृदयस्य भवति', 'तद्वा अस्यैतदतिच्छन्दाः', 'एषोऽस्य परम आनन्दः' इत्यादिश्रुतिभ्यः सुषुप्त एव स्वं देवतारूपं जीवत्वविनिर्मुक्तं दर्शयिष्यामि इत्याह .... ॥ छां· भा· ६-८-१, पा· ५२२·

[सुषुप्ते जीवत्वविनिर्मुक्तं रूपम् इत्युक्तमत्र । एतद्विरुद्धे टीकातद्विवरणे सुषुप्तेऽप्यविद्या-वरणं जीवस्येत्यङ्गीकर्तृणी ॥]

(२२) तदा जीवः श्रमापनुत्तये स्वं देवतारूपमात्मानं प्रतिपद्यते । नान्यत्र स्वरूपावस्थानात् श्रमापनोदः स्यात् इति युक्ता प्रसिद्धिर्लौकिकानां 'स्वं ह्यपीतो भवति' इति । दृश्यते हि लोके ज्वरादिरोगग्रस्तानां तद्विनिर्मोके स्वात्मस्थानां विश्रमणम् ; तद्वदिहापि स्यात् इति युक्तम् ॥ छां·भा· ६-८-१, पा· ५२३·

(२३) अन्यत्र सदाख्यात् स्वात्मनः आयतनं विश्रमणस्थानम् अलब्ध्वा प्राणमेव । प्राणेन सर्वकार्यकरणाश्रयेण उपलक्षिता 'प्राण' इत्युच्यते सदाख्या परा देवता । 'प्राणस्य प्राणम्', 'प्राणशरीरो भारूपः' इत्यादिश्रुतेः । अतः तां देवतां प्राणं प्राणाख्यामेव उपश्रयते ॥ छां· भा. ६-८-२, पा· ५२३·

(२४) तदेवं क्रमेणोपसंहृते स्वमूले प्राप्ते च मनसि तत्स्थो जीवोऽपि सुषुप्तकालवत् निमित्तोपसंहारादुपसंह्रियमाणः सन् सत्याभिसन्धिपूर्वकं चेदुप-संह्रियते सदेव संपद्यते न पुनर्देहान्तराय सुषुप्तादिवोत्तिष्ठति ॥ छां·भा· ६·८·६, पा· ५२७·

[मरणकालेऽपि सत्सम्पन्नः सर्वो जीवः पुनर्देहधारणाय गच्छति सुषुप्तादिव, सत्याभि-संधस्तु मुच्यते इत्युक्तमत्र ॥]

(२५) सर्वाः प्रजाः अहन्यहनि सति सम्पद्य सुषुप्तिकाले मरणप्रलययोश्च न विदुः न विजानीयुः सति, सम्पद्यामहे इति सम्पन्ना इति वा ॥ छां· भा· ६-९-२, पा· ५२८·

[अज्ञात्वा सत्संपत्तिरेव कारणं पुनरुत्थाने इति भावः ॥]

(२६) विद्वान् अविद्वांश्च सुषुप्ते यद्यपि सत् संपद्यते, तथापि एवंविदेव स्वर्गलोकं गच्छतीत्युच्यते, देहपातेऽपि । विद्याफलस्य अवश्यम्भावित्वात् — इत्येष विशेषः ॥ छां· भा· ८-३-३, पा· ५७४·

(२७) स्वाभाविके एव स्वात्मनि वर्तमानोऽपि कर्मानुगतबुद्ध्यनुवृत्ति-त्वात् 'पुरीतति शेते' इत्युच्यते । न हि सुषुप्तिकाले शरीरसंबन्धोऽस्ति । .... सर्वसंसारदुःखवियुक्ता इयमवस्था ॥ बृ· भा· २-१-१९, पा· ७३०-७३१·

(२८) जागरिते ससङ्गः समृत्युः सकार्यकरणसङ्घातः उपलक्ष्यते, अविद्यया। स्वप्ने तु कामसंयुक्तो मृत्युरूपविनिर्मुक्त उपलभ्यते। सुषुप्ते पुनः सम्प्रसन्नोऽसङ्गो भवतीत्यसङ्गतापि दृश्यते। एकवाक्यतया तु उपसंह्रियमाणं फलं नित्यशुद्धबुद्धमुक्तस्वभावता अस्य नैकत्र पुञ्जीकृत्य प्रदर्शिता – इति तत्प्रदर्शनाय कण्डिका आरभ्यते। सुषुप्ते हि एवंरूपता अस्य वक्ष्यमाणा 'तद्वा अस्यैतदतिच्छन्दा अपहतपाप्मा अभयं रूपम्' इति ॥ बृ. भा. ४-३-१९, पा. ८८७, ८८८.

[अत्र सुषुप्तवर्णनम्, तत्रात्मनः नित्यशुद्धबुद्धमुक्तस्वभावताप्रदर्शनाय इत्युच्यते। सुषुप्ते अविद्याशक्तिः संस्कारमात्रं तिष्ठतीति टीकामतम्, अज्ञानमिथ्याज्ञानतत्संस्कार-व्यतिरिक्तं भावरूपं मूलाज्ञानं जीवेश्वरविभागहेतुत्वेनावतिष्ठते इति विवरणमतं च एतस्मादत्यन्तविलक्षणमिति किं पृथग्वक्तव्यम्?]

(२९) इदानीं योऽसौ सर्वात्मभावो मोक्षो विद्याफलं क्रियाकारकफल-शून्यं स प्रत्यक्षतो निर्दिश्यते यत्राविद्याकामकर्माणि न सन्ति ॥ बृ. भा. ४-३-२१, पा. ८९१.

(३०) अत्र चैतत् प्रकृतम् अविद्याकामकर्मविनिर्मुक्तमेव तद्रूपम् यत् सुषुप्त आत्मनो गृह्यते प्रत्यक्षतः – इति ॥ बृ. भा. ४-३-२२, पा. ८९३.

(३१) कथं तर्हि न पश्यतीति? उच्यते – न तु तदस्ति। किं तत्? द्वितीयं विषयभूतम्। किंविशिष्टम्? ततो द्रष्टुरन्यत् अन्यत्वेन विभक्तं यत् पश्येत् यत् उपलभेत। यद्धि तद्, विशेषदर्शनकारणम् अन्तःकरणम्, चक्षुः, रूपं च, तदविद्यया अन्यत्वेन प्रत्युपस्थापितमासीत्। तदेतस्मिन् काले एकीभूतम्। आत्मनः परेण परिष्वङ्गात्। द्रष्टुर्हि परिच्छिन्नस्य विशेषदर्शनाय करणम् अन्यत्वेन व्यवतिष्ठते। अयं तु स्वेन सर्वात्मना संपरिष्वक्तः स्वेन परेण प्राज्ञेनाऽऽत्मना प्रिययेव पुरुषः। तेन न पृथक्त्वेन व्यवस्थितानि करणानि विषयाश्च। तदभावात् विशेषदर्शनं नास्ति ॥ बृ. भा. ४-३-२३, पा. ८९७.

[अत्र सुषुप्तौ अविद्याया अभावः, द्रष्टृकरणविषयाणां पृथक्त्वाभावश्च विशेषदर्शनाभावे कारणम् इत्युक्तम्, द्रष्टुः प्राज्ञसंज्ञकपरमात्मभावश्च ॥]

(३२) यत्र पुनः सा अविद्या सुषुप्ते वस्त्वन्तरप्रत्युपस्थापिका शान्ता, तेनान्यत्वेन अविद्याप्रविभक्तस्य वस्तुनोऽभावात्, तत् केन कं पश्येत्, जिघ्रेत्, विजानीयाद् वा? अतः स्वेनैव हि प्राज्ञेनात्मना स्वयञ्ज्योतिःस्वभावेन संपरिष्वक्तः समस्तः सम्प्रसन्न आप्तकामः आत्मकामः सलिलवत् स्वच्छीभूतः सलिल इव सलिलः, एकः द्वितीयस्याभावात्। अविद्यया हि द्वितीयः प्रविभज्यते। सा च शान्ताऽत्र। अत एकः। द्रष्टा दृष्टेरविपरिलुप्तत्वात् आत्मज्योतिः-

स्वभावायाः । अद्वैतः द्रष्टव्यस्य द्वितीयस्याभावात् । एतदमृतम् अभयम्, एष ब्रह्मलोकः, ब्रह्मैव लोको ब्रह्मलोकः पर एवायमस्मिन् काले व्यावृत्तकार्यकरणोपाधिभेदः स्वे आत्मज्योतिषि शान्तसर्वसंबन्धो वर्तते हे सम्राट् ॥ बृ· भा· ४-३-३२, पा· ९००-९०१.

[अत्र नित्यशुद्धबुद्धमुक्तस्वभावतैवात्मनः सुषुप्ते – इत्युक्तम् ॥]

(३३) एषाऽस्य विज्ञानमयस्य परमा गतिः । यास्तु अन्या देहग्रहणलक्षणाः ब्रह्मादिस्तम्बपर्यन्ता अविद्याकल्पिताः ता गतयोऽतोऽपरमाः, अविद्याविषयत्वात् । इयं तु देवत्वादिगतीनां कर्मविद्यासाध्यानां परमा उत्तमा यः समस्तात्मभावः, यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानातीति । एषैव च परमा सम्पत् सर्वासां सम्पदां विभूतीनामियं परमा स्वाभाविकत्वादस्याः । कृतका ह्यन्याः सम्पदः । तथा एषोऽस्य परमो लोकः । येऽन्ये कर्मफलाश्रया लोकाः, तेऽस्मादपरमाः अयं तु न केनचन कर्मणा मीयते, स्वाभाविकत्वात् । एषोऽस्य परमो लोकः । तथा एषोऽस्य परम आनन्दः । यान्यन्यानि विषयेन्द्रियसंबन्धजनितानि आनन्दजातानि तान्यपेक्ष्य एषोऽस्य परम आनन्दः, नित्यत्वात् । 'यो वै भूमा तत्सुखम्' इति श्रुत्यन्तरात् । यत्रान्यत्पश्यत्यन्यद्विजानाति तदल्पं मर्त्यममुख्यं सुखम् । इदं तु तद्विपरीतम् । अत एवैषोऽस्य परम आनन्दः एतस्यैवानन्दस्य मात्रां कलाम् अविद्याप्रत्युपस्थापितां विषयेन्द्रियसम्बन्धकालविभाव्याम् अन्यानि भूतानि उपजीवन्ति ॥ बृ· भा· ४-३-३२, पा· ९०१.

[सुषुप्तात्मस्वरूपम् एवं स्वाभाविकत्वेन प्रशंसति श्रुतिरित्याह भाष्यम् । अविद्यासंस्कारसंपर्कस्य नामापि न श्रूयतेऽत्र ॥ ]

(३४) एवं शतगुणोत्तरोत्तरवृद्ध्युपेता आनन्दा यत्रैकतां यान्ति, यश्च श्रोत्रियप्रत्यक्षोऽथैष एव सम्प्रसादलक्षणः परम आनन्दः । यत्र हि नान्यत् पश्यति नान्यच्छृणोति ; अतो भूमा, भूमत्वादमृतः । इतरे तद्विपरीताः ॥ बृ· भा· ४-३-३३, पा· ९०३.

(३५) एवम् अविद्याकामकर्मादिसर्वसंसारधर्मसंम्बन्धातीतं रूपमस्य साक्षात् सुषुप्ते गृह्यते इत्येतद् विज्ञापितम् ॥ बृ· भा· ४-३-३४, पा· ९०४.

[ 'तस्मात् सम्प्रसादस्थानं मोक्षदृष्टान्तभूतम्' इत्युत्तरत्र एतत्कण्डिकाभाष्ये स्थितम् ॥ ]

(३६) यो हि सुषुप्तावस्थायामिव निर्विशेषम्, अद्वैतम्, अविलुप्तचिद्रूपज्योतिःस्वभावम् आत्मानं पश्यति, तस्यैव अकामयमानस्य कर्माभावे गमनकारणाभावात्, प्राणा वागादयो नोत्क्रामन्ति, किं तु विद्वान् स इहैव ब्रह्म –

यद्यपि देहवानिव लक्ष्यते – स ब्रह्मैव सन् ब्रह्माप्येति ॥ बृ. भा. ४-३-६, पा. ९१७.

[सुषुप्ते मोक्षे इव निर्विशेषात्मैवावतिष्ठते इति दृष्टान्तार्थं सुषुप्तावस्थात्मस्वरूपम् आदीयते इति भावः ॥]

(३७) सम्प्रसादकाले अन्तर्हृदये य एष आकाशः पर एवात्मा निरुपाधिको विज्ञानमयस्य स्वस्वभावः, तस्मिन् स्वस्वभावे परमात्मनि आकाशाख्ये शेते ॥ बृ. भा. ४-४-२२, पा. ९३०.

[संप्रसादकाले जीवः यथा निरुपाधिके स्वस्वभावे परमात्मनि तदात्मभावेन वर्तते, एवं ज्ञानाज्जीवन्मुक्तिं प्राप्तोऽपीत्याशयोऽत्र व्यञ्जितः ॥]

## गीताभाष्ये

(१) न च देहाद्यात्मप्रत्ययभ्रान्तिसन्तानविच्छेदेषु, सुषुप्तिसमाध्यादिषु कर्तृत्वभोक्तृत्वाद्यनर्थं उपलभ्यते ॥ १८-६६, पा. २९६.

## ५. अव्याकृतवाक्यानि

नामरूपम्, अव्याकृतम्, प्रकृतिः, अव्यक्तम्, माया, अक्षरम्, आकाशम् – इत्यादयः शब्दा प्रलयकालस्थितजगद्बीजवाचका अपि अविद्यावाचकत्वेन परिगणिताः पञ्चपादिकायाम् (पं. पा. पु. ३१८)। भाष्ये पुनरविद्याकल्पितैव मायाऽव्याकृतादिशब्दवाच्या सा प्रागवस्था – इति सूत्रभाष्यवाक्योदाहरणैर्निरूपितम् (पा. ४९) ग्रन्थशरीरे । अथेदानीम् उपनिषद्भाष्यगीताभाष्येभ्योऽपि तादृशानि वाक्यानि संगृह्य लिख्यन्ते जिज्ञासुजनतोषार्थम् ॥

(१) विदितं नाम यद् विदिक्रियया अतिशयेन आप्तम्, विदिक्रियाकर्मभूतम्। क्वचित् किञ्चित् कस्यचिद् विदितं स्यादिति सर्वमेव व्याकृतं विदितमेव। तस्मादन्यदेव – इत्यर्थः। अविदितम् अज्ञातम् तर्हि – इति प्राप्ते आह। अथो अविदितात् विदितविपरीतात् अव्याकृतात् अविद्यालक्षणात् व्याकृतबीजात् ॥ के. भा. १-४, पा. २०.

[अविद्यालक्षणात् – अविद्याकल्पितात् इत्यर्थः ॥]

(२) महतोऽपि परं सूक्ष्मतरं प्रत्यगात्मभूतं सर्वमहत्तरं च अव्यक्तं सर्वस्य जगतो बीजभूतम् अव्याकृतनामरूपसतत्त्वं सर्वकार्यकारणशक्तिसमाहार-

रूपम् अव्यक्तं अव्याकृताकाशादिनामवाच्यं परमात्मन्योतप्रोतभावेन समाश्रितं वटकणिकायामिव वटवृक्षशक्तिः ॥ का. भा. १-३-११, पा. ८२.

(३) ऊर्ध्वमूलः। ऊर्ध्वं मूलं यत्तद्विष्णोः परमं पदम् अस्य – इति सोऽयम् अव्यक्तादिस्थावरान्तः संसारवृक्ष ऊर्ध्वमूलः ॥ का. भा. २-३-१, पा. ९७.

(४) अविद्याकृतनामरूपोपाधिकृतो हि विशेषोऽभ्युपगम्यते आत्मनो बन्धमोक्षादिशास्त्रकृतसंव्यवहाराय; परमार्थतोऽनुपाधिकृतं च तत्त्वम् एकमेवाद्वितीयम् उपादेयं सर्वतार्किकबुद्ध्यनवगम्यं ह्यजमभयं शिवमिष्यते ॥ प्र. भा. ६-३, पा. १३६.

(५) अतः अक्षरात् नामरूपबीजोपाधिलक्षितस्वरूपात्, सर्वकार्यकरणबीजत्वेनोपलक्ष्यमाणत्वात् परं तत्त्वम्। तदुपाधिलक्षणम् अव्याकृताख्यमक्षरं सर्वविकारेभ्यः। तस्मात् परतोऽक्षरात् परः निरुपाधिकः पुरुषः इत्यर्थः। यस्मिन् तदाकाशाख्यम् अक्षरं संव्यवहारविषयम् ओतं प्रोतं च ॥ मुं. २-१-२, पा. १५५.

(६) ततो ब्रह्मण अन्नम् अद्यते भुज्यते इत्यन्नम्, अव्याकृतं साधारणं कारणं संसारिणां व्याचिकीर्षितावस्थारूपेण अभिजायते उत्पद्यते ॥ मुं. भा. १-१-८, पा. १४६.

(७) सतां विद्यमानानां स्वेन अविद्याकृतनामरूपमायास्वरूपेण सर्वभावानां विश्वतैजसप्राज्ञभेदानां प्रभव उत्पत्तिः ॥ गौ. का. १-६, पा. १८४.

(८) प्राणः प्राज्ञो बीजात्मा, तत्कार्यभेदा हीतरे स्थित्यन्ताः। अन्ये च सर्वे लौकिका सर्वप्राणिपरिकल्पिता भेदाः, रज्ज्वामिव सर्पादयः, तच्छून्ये आत्मनि आत्मस्वरूपानिश्चयहेतोरविद्यया कल्पिताः – इति पिण्डीकृतोऽर्थः ॥ गौ. का. भा. २-२०तमश्लोकमारभ्य २८तम श्लोकपर्यन्तम्, पा २०२.

[अत्र अव्याकृतात्मतत्त्वलक्षणं प्राज्ञत्वमपि अविद्यया कल्पितमित्युक्तम् ॥]

(९) असत् इति व्याकृतनामरूपविशेषविपरीतरूपम् अविकृतं ब्रह्मोच्यते ॥ तै. भा. २-७, पा. ३०२.

[अत्र व्याकृतनामरूपविशेषयुतरूपं ब्रह्म, अव्याकृतनामरूपविशेषरूपं च ब्रह्मैवोच्यते। न तु टीकासम्मता अविद्या। एष च रूपविशेषोऽविद्याकल्पित इति सूत्रभाष्ये (२-१-२७, पा. २१३) उक्तम् ॥]

(१०) प्रागुत्पत्तेः अव्याकृतनामरूपभेदम् आत्मभूतम् आत्मैकशब्दप्रत्ययगोचरम् जगत्। इदानीं व्याकृतनामरूपभेदत्वात् अनेकशब्दप्रत्ययगोचरम्

आत्मैकशब्दप्रत्ययगोचरं च इति विशेषः। यथा सलिलात् पृथक् फेननामरूप-व्याकरणात् प्राक् सलिलैकशब्दप्रत्ययगोचरमेव फेनम्, यदा सलिलात् पृथङ् नामरूपभेदेन व्याकृतं भवति तदा 'सलिलम् फेनं च' – इत्यनेकशब्दप्रत्यय-भाक्, 'सलिलमेव' इति चैकशब्दप्रत्ययभाक्च फेनं भवति तद्वत्॥ ऐ. भा. १-१, पा. ३३०.

[अत्राप्यविद्याकल्पितनामरूपविशेषवदेव ब्रह्माव्याकृतमिति स्पष्टम्॥]

(११) असत् अव्याकृतनामरूपमिदं जगत् अशेषम् अग्रे प्रागवस्थाया-मुत्पत्तेः आसीत्, न त्वसदेव॥ छां. भा. ३-१९-१, पा. ४३९.

(१२) अथ एतस्यैव साध्यसाधनलक्षणस्य व्याकृतस्य जगतो व्याकरणात् प्राग् बीजावस्था या तां निर्दिदिक्षति, अङ्कुरादिकार्यानुमितामिव वृक्षस्य। कर्म-बीजोऽविद्याक्षेत्रो ह्यसौ संसारवृक्षः समूल उद्धर्तव्यः इति॥ बृ. भा. १-४-७, पा. ६५४.

[व्याकृताव्याकृतरूपः संसारोऽविद्याक्षेत्र एवेत्युक्तमत्र॥]

(१३) सर्वाण्येव भूतानि प्रागुत्पत्तेरव्याकृतावस्थानि कर्तृसहितानि निर्दि-श्यन्ते 'आपः' इति। ता आपो बीजभूता जगतोऽव्याकृतात्मना अवस्थिताः। ता एवेदं सर्वं नामरूपविकृतं जगत् अग्रे आसुः, नान्यत् किञ्चित् विकारजातम् आसीत्॥ बृ. भा. ५-५-१, पा. ९६०.

तदेवम्, अव्याकृताव्यक्तप्रकृत्यादिशब्दा अविद्याकल्पितजगद्बीजा-वस्थावाचका, न जात्वेते अविद्यात्वेन व्यवहृता उपनिषत्सु तद्भाष्ये वा – इति यथोदाहृतभाष्यवाक्यैरवगम्यते। ईशावास्योपनिषद्भाष्ये परं वाक्यमेकं वर्तते यत्र अविद्याशब्दोऽपि प्रयुक्तः –

(१४) अन्धं तमः प्रविशन्ति ये असम्भूतिं सम्भवनं सम्भूतिः सा यस्य कार्यस्य सा सम्भूतिस्तस्या अन्या असम्भूतिः प्रकृतिः, कारणम्, अविद्या अव्याकृ-ताख्या। ताम् असम्भूतिम् अव्याकृताख्यां प्रकृतिं कारणम् अविद्यां कामकर्म-बीजभूताम् अदर्शनात्मिकाम् उपासते ये ते तदनुरूपमेव अन्धं तमः, अदर्श-नात्मकं प्रविशन्ति। ततः, तस्मादपि भूयो बहुतरमिव तमः ते प्रविशन्ति, ये उ सम्भूत्यां कार्यब्रह्मणि हिरण्यगर्भाख्ये रताः॥ ई. १२, पा. १०.

अत्र 'कारणम् अविद्या' इति सामानाधिकरण्येन अव्याकृतस्य अविद्या-शब्दवाच्यत्वमुक्तमिति भाति। तच्च विरुध्यते अव्याकृतस्य अविद्याकल्पित-

त्वोल्लेखिभिर्वचनैरिति स्पष्टम् । परं तूत्तरत्र 'सम्भूतिं च विनाशं च' – इति श्रुतिव्याख्याने इत्थं भाष्यमुपलभ्यते –

(अ) "विनाशेन – विनाशो धर्मो यस्य कार्यस्य सः । तेन धर्मिणा अभेदेनोच्यते 'विनाशः' इति । तेन तदुपासनेन अनैश्वर्यम् अधर्मकामादिदोषजातं च मृत्युं तीर्त्वा – हिरण्यगर्भोपासनेन हि अणिमादिप्राप्तिः फलम्, तेन अनैश्वर्यादिमृत्युम् अतीत्य, असम्भूत्या अव्याकृतोपासनयाऽमृतं प्रकृतिलयलक्षणम् अश्नुते"

इति । तत्र प्रकृतिलयाख्यफलश्रवणात्, व्याकृताव्याकृतोपाधियुक्तब्रह्मोपासना-समुच्चय एव इह विवक्षित इति गम्यते, तथा च 'कारणम् अविद्या अव्याकृताख्या' इत्यस्य अविद्याकल्पितत्वमेवार्थः स्वीकार्यो भवति भाष्यवाक्यान्तरेणैकार्थ्याय कारणत्वमविद्याकृतमिति कृत्वा 'अविद्या' इत्युच्यते इत्यपि हि शक्यते कल्पयितुमिति सर्वं शिवम् ॥

## गीताभाष्यवाक्यानि

(१) प्रकृतेः । प्रकृतिः प्रधानं सत्त्वरजस्तमसां गुणानां साम्यावस्था । तस्याः प्रकृतेर्गुणैर्विकारैः कार्यकरणरूपैः क्रियमाणानि कर्माणि लौकिकानि शास्त्रीयाणि च सर्वशः सर्वप्रकारैः अहङ्कारविमूढात्मा कार्यकरणसंघातात्म-प्रत्ययोऽहङ्कारः, तेन विविधं नानाविधं मूढ आत्मा अन्तःकरणं यस्य सोऽयं – कार्यकरणधर्मा कार्यकरणाभिमानी अविद्यया कर्माणि आत्मनि मन्यमानः तत्त-त्कर्मणाम् अहं कर्ता इति – मन्यते ॥ ३–२७, पा. ५४.

[अविद्याविकाराः कार्यकरणरूपा इति न क्वचिदपि निर्दिश्यते ॥]

(२) प्रकृतिं स्वां मम वैष्णवीं मायां त्रिगुणात्मिकां यस्या वशे सर्वं जगत् वर्तते, यया मोहितं सत् स्वमात्मानं वासुदेवं न जानाति, तां प्रकृतिं स्वाम् अधिष्ठाय वशीकृत्य संभवामि देहवानिव भवामि जात इव आत्ममायया आत्मनो मायया न परमार्थतः लोकवत् ॥ ४–६, पा. ६२.

[प्रकृतिः, माया–इति पर्यायत्वेन प्रयुज्येते । एवम् अविद्याशब्दो त्रिगुणात्मिकायां मायायां न प्रयुज्यते क्वचिदपि गीताभाष्ये ॥]

(३) इतीयं यथोक्ता प्रकृतिर्मे मम ऐश्वरी मायाशक्तिः । अष्टधा भिन्ना भेदमागता ॥ ७–४, पा. ११७.

[ 'मायाशक्तिः' इतिवत् 'अविद्याशक्तिः' इति नैव प्रयुज्यते गीताभाष्ये क्वचिदपि ॥ ]

(४) कथं पुनर्दैवीमेतां त्रिगुणात्मिकां वैष्णवीं मायाम् अतिक्रामन्ति इति ? उच्यते ॥ ७-१४, पा. १२०.

[ 'वैष्णवी अविद्या ' इति नैवास्ति प्रयोगः ॥]

(५) पूर्वोक्तात् भूतग्रामबीजभूतात् अविद्यालक्षणात् अव्यक्तात् अन्यः विलक्षणो भावः इत्यभिप्रायः । सनातनः चिरन्तनः ॥ ८-२०, पा. १३३.

[प्रकृतिः 'अविद्यालक्षणा' अविद्याकल्पिता इत्युक्तात्र । द्रष्टव्यम् सू. भा. २-१-१४, पा. २०१ ॥]

(७) एवम् अविद्यालक्षणां प्रकृतिं स्वां स्वीयाम् अवष्टभ्य वशीकृत्य विसृजामि पुनः पुनः प्रकृतितो जातं भूतग्रामं भूतसमुदायमिमम् ॥ ९-८, पा. १३९.

(८) मया सर्वतो दृशिमात्रस्वरूपेण अविक्रियात्मना अध्यक्षेण मम माया त्रिगुणात्मिका अविद्यालक्षणा प्रकृतिः सूयते उत्पादयति सचराचरं जगत् ॥ ९-१०, पा. १४०.

[अत्रापि प्रकृतिर्मायाख्या अविद्यालक्षणा – अविद्याकल्पिता इत्युक्ता ॥]

(९) एतदुक्तं भवति – प्रकृतिस्थत्वाख्या अविद्या गुणेषु च सङ्गः कामः, संसारस्य कारणम् इति ॥ १३-२१, पा. २०९.

[प्रकृतिस्थत्वम् अविद्या इत्यनेन प्रकृतिर्नाविद्या इत्युक्तमेव भवति ॥]

(१०) य एवं यथोक्तप्रकारेण वेत्ति पुरुषं साक्षात् अहमिति, प्रकृतिं च यथोक्ताम् अविद्यालक्षणां गुणैः स्वविकारैः सह निवर्तिताम् अभावमापादितां विद्यया सर्वथा सर्वप्रकारेण वर्तमानोऽपि स भूयः पुनः पतिते अस्मिन् विद्वच्छरीरे देहान्तराय नाभिजायते नोत्पद्यते । देहान्तरं न गृह्णातीत्यर्थः ॥ १३-२३, पा. २१०.

[प्रकृतिरविद्याकल्पितत्वात् विद्यया निवर्त्यते इत्युक्तमत्र ॥]

(११) भूतप्रकृतिमोक्षं च भूतानां प्रकृतिः अविद्यालक्षणा अव्यक्ताख्या । तस्या भूतप्रकृतेः मोक्षणम् अभावगमनं च ये विदुः विजानन्ति यान्ति गच्छन्ति ते परं परमार्थतत्त्वं ब्रह्म । न पुनर्देहम् आददते इत्यर्थः ॥ १३-३४, पा. २१७.

(१२) 'सत्त्वम्', 'रजः', 'तमः' – इति एवं नामानो 'गुणाः' इति पारिभाषिकः शब्दः, न रूपादिवत् द्रव्याश्रिताः गुणाः, न च गुणगुणिनोरन्यत्वमत्र विवक्षितम् । तस्मात् गुणा इव नित्यपरतन्त्राः क्षेत्रज्ञम् अविद्यात्मक-

त्वात् क्षेत्रज्ञं निबध्नन्तीव । तम् आस्पदीकृत्य आत्मानं प्रतिलभन्ते इति 'निबध्नन्ति' इत्युच्यते । ते च प्रकृतिसंभवाः भगवन्मायासंभवाः ॥ १४-५, पा. २१९.

(१३) ऊर्ध्वमूलम् । कालतः सूक्ष्मत्वात्, कारणत्वात्, नित्यत्वात्, महत्त्वाच्च ऊर्ध्वम् उच्यते ब्रह्म अव्यक्तमायाशक्तिमत् ॥ १५-१, पा. २२८.

(१४) यस्मात् क्षरम् अतीतोऽहम्, संसारमायावृक्षम् अश्वत्थाख्यम् अतिक्रान्तोऽहम्; अक्षरादपि संसारमायावृक्षबीजभूतादपि च उत्तमः उत्कृष्टतमः, ऊर्ध्वतमो वा; अतः ताभ्यां क्षराक्षराभ्याम् उत्तमत्वात् अस्मि लोके वेदे च प्रथितः प्रख्यातः पुरुषोत्तमः ॥ १५-१८, पा. २३६.

(१५) यदि वस्तुभूता गुणाः, यदि वा अविद्याकल्पिताः, तद्धर्मः कर्म। तदात्मन्यविद्याध्यारोपितमेवेति अविद्वान् 'न हि कश्चित् क्षणमपि अशेषतस्त्यक्तुं शक्नोति' इत्युक्तम्; विद्वांस्तु पुनर्विद्यया अविद्यायां निवृत्तायां शक्नोत्येवाशेषतः कर्म परित्यक्तुम्, अविद्याध्यारोपितस्य शेषानुपपत्तेः ॥ १८-४८, पा. २७८.

[ गुणाः साङ्ख्यानामिव न वस्तुभूता अस्मिन् दर्शने, किं तु अविद्याकल्पिताः । उभयथापि तत्कर्म अविद्याध्यारोपितमेवेत्युक्तमत्र ॥ ]

## ६. अविद्याश्रयवाक्यानि

व्यवहारावस्थायां जीवस्याविद्या, परमार्थतस्तु नैव कस्यचित् – इति सूत्रभाष्ये स्पष्टतया उक्तम् (खं. ३२) । न तु कुत्रापि किं सा जीवस्य, आहोस्वित् ब्रह्मणः ? – इति व्याख्यानप्रस्थानेष्विव विशिष्य विचारितम् । यथाप्रसिद्धजीवाश्रयैवाविद्या – इत्यस्मिन्नर्थे उपनिषद्भाष्येभ्यः, गीताभाष्याच्च कानिचिद् वाक्यानि अत्र समुद्धृत्य उदाहरिष्यन्ते –

(१) प्रेत्य व्यावृत्य अस्माल्लोकात् पुत्रमित्रकलत्रबन्धुषु ममाहम्भावसंव्यवहारलक्षणात् । त्यक्तसर्वैषणा भूत्वा इत्यर्थः । अमृता अमरणधर्माणो भवन्ति इत्यर्थः ॥ के. भा. १-२, पा. १९.

[अनात्मन्यहंममाभिमानलक्षणाविद्यामात्रम् अमृतत्वप्रतिबन्धभूतम् इत्यर्थः ॥]

(२) धीरा धीमन्तः । प्रेत्य व्यावृत्य ममाहम्भावलक्षणात् अविद्यारूपात् अस्माल्लोकात् उपरम्य सर्वात्मैकत्वभावम् अद्वैतमापन्नाः सन्तः अमृता भवन्ति । ब्रह्मैव भवन्ति इत्यर्थः ॥ के. भा. २-५, पा. २९.

['अविद्याव्यावृत्तेरूर्ध्वं ब्रह्मभावः' इत्युक्त्या जीवस्यैव अविद्या इत्युक्तं भवति ॥]

(३) तदात्मसंस्थस्य प्रत्यगात्मन ईश्वरस्य सर्वज्ञस्य सर्वक्रियाफलसंयोजयितुः प्राणिनां सर्वशक्तेः, जगतः स्थितिं चिकीर्षोः, अयं जयो महिमा च इत्यजानन्तः, ते देवा ऐक्षन्त ईक्षितवन्तः, अग्न्यादिस्वरूपपरिच्छिन्नात्मकृतोऽस्माकमेवायं विजयोऽस्माकमेवायं महिमा अग्निवाय्विन्द्रत्वादिलक्षणो जयफलभूतः, अस्माभिरनुभूयते नास्मत्प्रत्यगात्मभूतेश्वरकृत इति ॥ के. भा. ३–१, पा. ३०.

[सर्वस्य प्रत्यगात्मभूतं ब्रह्म सर्वज्ञम्, जीवास्तु अग्न्यादिरूपा अपि अविद्यावन्तः इत्युक्तमत्र ॥]

(४) अतो विधिप्रतिषेधार्थविषयस्य आत्मनि क्रियाकारकफलाध्यारोपणलक्षणस्य स्वाभाविकस्याज्ञानस्य संसारबीजस्य निवृत्त्यर्थं तद्विपरीतब्रह्मात्मैकत्वविज्ञानं क्रियाकारकफलाध्यारोपणलक्षणशून्यं आत्यन्तिकनिःश्रेयसप्रयोजनं वक्तव्यम् इत्युत्तरो ग्रन्थ आरभ्यते ॥ का. भा. १–१–२०, पा. ६५.

(५) प्रागेकत्वविज्ञानात् आचार्यागमसंस्कृतेन मनसैवेदं ब्रह्म एकरसम् आप्तव्यम् आत्मैव नान्यदस्तीति । आप्ते च नानात्वप्रत्युपस्थापिकाया अविद्याया निवृत्तत्वात् इह ब्रह्मणि नाना नास्ति किञ्चन अणुमात्रमपि ॥ २–१–११, पा. ८९.

(६) यं (पुरुषं) ज्ञात्वा आचार्यतः, शास्त्रतश्च मुच्यते जन्तुः; अविद्यादिहृदयग्रन्थिभिर्जीवन्नेव ॥ का. भा. २–३–८, पा. १००.

(७) विद्याविद्ययोस्तद्धर्मत्वम् इति चेत् । न । प्रत्यक्षत्वात् । विवेकाविवेकौ रूपादिवत् प्रत्यक्षौ उपलभ्येते अन्तःकरणस्थौ । न हि रूपस्य प्रत्यक्षस्य सतो द्रष्टृधर्मत्वम् । अविद्या च स्वानुभवेन रूप्यते 'मूढोऽहम् अविविक्तं मम विज्ञानम्' इति । तथा विद्याविवेकोऽनुभूयते । उपदिशन्ति चान्येभ्य आत्मनो विद्यां बुधाः । तथा च अन्ये अवधारयन्ति । तस्मात्, नामरूपपक्षस्यैव विद्याविद्ये । नामरूपे च नात्मधर्मौ । 'नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म' इति श्रुत्यन्तरात् । ते च पुनर्नामरूपे सवितर्यहोरात्रे इव कल्पिते न परमार्थतो विद्यमाने ॥ तै. भा. २–८, पा. ३१०.

[विद्याविद्ये अपि वस्तुतो नात्मधर्मौ, यद्यपि व्यवहारे तद्धर्मत्वेन अविद्याकल्पितौ इत्युक्तमत्र ॥]

(८) ब्रह्मण्यविद्यानुपपत्तिः इति चेत्, न । ब्रह्मणि विद्याविधानात् । न हि शुक्तिकायां रजताध्यारोपणे असति शुक्तिकात्वं ज्ञाप्यते चक्षुर्गोचरापन्नायाम् 'इयं शुक्तिका, न रजतम्' इति । तथा 'सदेवेदं सर्वम्', 'ब्रह्मैवेदं सर्वम्', 'आत्मैवेदं सर्वम्', 'नेदं द्वैतमस्त्यब्रह्म' – इति ब्रह्मणि एकत्वविज्ञानं

न विधातव्यं ब्रह्मणि अविद्याध्यारोपणायाम् असत्यम् । न ब्रूमः शुक्तिकायामिव ब्रह्मणि अतद्धर्माध्यारोपणा नास्तीति, किं तर्हि, न ब्रह्म स्वात्मनि अतद्धर्माध्यारोपनिमित्तम्, अविद्याकर्तृ च इति । भवत्वेवं नाविद्याकर्तृ, भ्रान्तं च ब्रह्म – इति । किं तु नैवाब्रह्म अविद्याकर्ता चेतनो भ्रान्तोऽन्य इष्यते 'नान्योऽतोऽस्ति विज्ञाता', 'नान्यदतोऽस्ति विज्ञातृ', 'तत्त्वमसि', 'आत्मानमेवावेत्', 'अहं ब्रह्मास्मि', 'अन्योऽसावन्योऽहमस्मीति न स वेद' इत्यादिश्रुतिभ्यः ॥ बृ. भा. १-४-१०, पा. ६६९-६७०.

[ब्रह्मण्येव जीवत्वस्य कल्पितत्वात् ब्रह्म स्वात्मानमेवावेत् इत्युक्तः, वस्तुतस्तु ब्रह्मणो व्यतिरिक्तो जीवो नाम नास्त्येवेति, न कश्चिदन्यः परमार्थतोऽविद्यावान् इत्यभिप्रायः ॥]

(९) अविद्यावतः, अविद्यानिवृत्त्यनिवृत्तिकृतो विशेष आत्मनः स्यात् – इति चेत्, न । अविद्याकल्पनाविषयत्वाभ्युपगमात् रज्जूषरशुक्तिकागगनानां सर्पोदकरजतमलिनत्वादिवददोष इत्यवोचाम । तिमिरातिमिरदृष्टिवत् अविद्याकर्तृत्वाकर्तृत्वकृत आत्मनो विशेषः स्यादिति चेन्न 'ध्यायतीव लेलायतीव' इति स्वतोऽविद्याकर्तृत्वस्य प्रतिषिद्धत्वात् । अनेकव्यापारसंनिपातजनितत्वाच्च अविद्याभ्रमस्य । विषयत्वोपपत्तेश्च । यस्य चाविद्याभ्रमो घटादिवद् विविक्तो गृह्यते स नाविद्याभ्रमवान् ॥ बृ. भा. ४-४-६, पा. ९१९.

[अविद्यावत्त्वम्, तन्निवृत्तिः, तन्निवृत्त्यनिवृत्तिकृतविशेषश्च – इत्येतद् सर्वमपि अविद्याकृतमेव । परमार्थतस्तु नाविद्या जीवस्यापि – इत्युक्तमत्र । अत्र सर्वत्रापि अविद्याभ्रमाश्रयत्वमेव विचारविषयः, न तु तदुपादानभूताविद्याशक्त्याश्रयत्वमिति न प्रस्मर्तव्यम् ॥]

## गीतासु

(१) तत्रैवं सति क्षेत्रज्ञस्य ईश्वरस्यैव सतः अविद्याकृतोपाधिभेदतः संसारित्वमिव भवति यथा देहाद्यात्मत्वमात्मनः ॥ गी. भा. १३-२, पा. १९१.

[देहादिष्वात्मबुद्धिरिव संसारित्वभ्रान्तिलक्षणा अविद्या जीवस्येत्युक्तं भवति ॥]

(२) अविद्यावत्त्वात् क्षेत्रज्ञस्य संसारित्वम् इति चेत् । न, अविद्यायास्तामसत्वात् । तामसो हि प्रत्ययः, आवरणात्मकत्वात् अविद्या, विपरीतग्राहकः, संशयोपस्थापको वा अग्रहणात्मको वा । विवेकप्रकाशभावे तदभावात् । तामसे च आवरणात्मके तिमिरादिदोषे सति अग्रहणादेरविद्यात्रयस्य उपलब्धेः । .... यथा करणे चक्षुषि विपरीतग्रहणादिदोषस्य दर्शनात् न विपरीतादिग्रहणं तन्निमित्तो वा तैमिरिकत्वादिदोषो ग्रहीतुः, चक्षुषु संस्कारेण तिमिरे अपनीते ग्रहीतुरदर्शनात् न ग्रहीतुर्धर्मो यथा – तथा सर्वत्रैव अग्रहणविपरीतसंशय-

प्रत्ययाः सनिमित्ताः करणस्यैव कस्यचिद् भवितुमर्हन्ति न ज्ञातुः क्षेत्रज्ञस्य ॥
गी. भा. १३-२, पा. १९२.

[अत्राविद्यायाः तामसप्रत्ययत्वम्, अन्तःकरणधर्मत्वं चोपपादितम्; तथा च अन्तःकरणोपहितस्य जीवस्यैवाविद्या इत्युक्तं भवति ॥]

(३) यच्चूक्तम्, ईश्वरस्य क्षेत्रज्ञैकत्वे संसारित्वं प्राप्नोति, क्षेत्रज्ञानां च ईश्वरैकत्वे संसारिणोऽभावात् संसाराभावप्रसङ्गः इति । एतौ दोषौ प्रत्युक्तौ विद्याविद्ययोर्वैलक्षण्याभ्युपगमात् इति । कथम्? अविद्यापरिकल्पितदोषेण तद्विषयं वस्तु पारमार्थिकं न दुष्यतीति। तथा च दृष्टान्तो दर्शितः मरीच्यम्भसा ऊषरदेशो न पङ्कीक्रियत इति ॥ १३-२, पा. १९५.

[अविद्यादृष्ट्या जीवस्य संसारित्वं कल्प्यते, न त्वीश्वरस्य; अत ईश्वरस्याविद्यावत्त्वादिदोषो न संभवतीत्यर्थः ॥]

(४) ननु अविद्यावत्त्वमेव क्षेत्रज्ञस्य संसारित्वदोषः । तत्कृतं च दुःखित्वादि प्रत्यक्षमुपलभ्यत इति चेत् । न, ज्ञेयस्य क्षेत्रधर्मत्वात्, ज्ञातुः क्षेत्रज्ञस्य तत्कृतदोषानुपपत्तेः ॥ १३-२, पा. १९५.

[अहमज्ञः – इति प्रत्यक्षानुभवादविद्यावत्त्वं जीवस्य इत्याक्षेपः; प्रत्यक्षानुभवविषयत्वादेव न विषयिणस्तद्धर्मवत्त्वमिति परिहारः । पूर्वं करणधर्मत्वमविद्याया इत्युक्त्या परिहार उक्तः, इदानीं तु विषयत्वेन न विषयिधर्मित्वं तस्य इत्युच्यते-इति विवेकः ॥]

(५) अत्राह – सा अविद्या कस्येति? यस्य दृश्यते तस्यैव । कस्य दृश्यत इति? अत्रोच्यते-अविद्या कस्य दृश्यत इति प्रश्नो निरर्थकः; कथम्? दृश्यते चेत् अविद्या तद्वन्तमपि पश्यसि । न च तद्वति उपलभ्यमाने 'सा कस्य?' इति प्रश्नो युक्तः । न हि गोमत्युपलभ्यमाने 'गावः कस्य?' इति प्रश्नोऽर्थवान् भवेत् । ननु विषमो दृष्टान्तः; गवां तद्वतश्च प्रत्यक्षत्वात् सम्बन्धोऽपि प्रत्यक्ष इति प्रश्नो निरर्थकः । न तथा अविद्या तद्वांश्च प्रत्यक्षौ, यतः प्रश्नो निरर्थकः स्यात् । अप्रत्यक्षेण अविद्यावता अविद्यासंबन्धे ज्ञाते, किं तव स्यात्? अविद्याया अनर्थहेतुत्वात् परिहर्तव्या स्यात् । यस्याविद्या स तां परिहरिष्यति। ननु ममैवाविद्या! जानासि तर्हि अविद्यां तद्वन्तं चात्मानम् ॥
१३-२, पा. १९५-१९६.

[मम ईश्वरत्वमुच्यते भवता, तर्हि कस्येयम् अविद्या यद्बलेन जीवेश्वरविभागः? – इत्याक्षेपः प्रथमः । अविद्यां तद्वन्तं च दृष्टवतस्तावदयं प्रश्नो न भवति । अदृष्ट्वा चेत्, प्रश्नो निष्प्रयोजनः – इति तत्परिहारः । अविद्यापरिहाराय प्रश्नः, न त्वाक्षेपोऽयम् इति द्वितीयं प्रत्युत्थानम् । अस्मिन् पक्षे 'अहमज्ञः' इति भ्रान्तिप्रत्यक्षमवलम्ब्य प्रश्नः – इति बोध्यम् ॥]

**(६) जानासि, न तु प्रत्यक्षेण । अनुमानेन चेत् जानासि, कथं सम्बन्ध-ग्रहणम् ? न हि तव ज्ञातुर्ज्ञेयभूतया अविद्यया तत्काले सम्बन्धो गृहीतुं शक्यते । अविद्याया विषयित्वेनैव ज्ञातुरुपयुक्तत्वात् । न च ज्ञातुरविद्यायाश्च संबन्धस्य यो ग्रहीता, ज्ञानं चान्यत् तद्विषयं सम्भवति, अनवस्थाप्राप्तेः ॥ १३-२, पा. १९६.**

[भ्रान्तिप्रत्यक्षेण सिद्धाया अविद्याया भ्रान्तिसिद्धजीवाश्रयत्वमभ्युपगम्यत एव भवता इति न तत्र प्रश्नो भवति इति । इदानीम्, यद्यपि प्रत्यक्षेण ज्ञायते अविद्या, तथापि तस्या मदाश्रितत्वम् अनुमीयते, अतस्तां परिहर्तुं पृच्छामीति पुनः प्रत्यवतिष्ठते शङ्कावादी । यत्र दृश्यते अविद्या तस्यैवान्तःकरणादेः सा इति युक्तं निश्चेतुम्, न पुनर्येन दृश्यते तस्येति । न हि येन दृश्यते, स ज्ञाता सन्नपि ज्ञेयोऽपि भवेत्, येन ममेयम् अविद्या इति जानीयात्-इत्युत्तरम् । ननु मया अविद्यायाः सम्बन्धस्य ज्ञाता मदन्य एव कश्चित् भवितुमर्हतीति कल्प्यताम् - इति कुतर्कस्तु अनवस्थादुस्थत्वेन नास्थेया इति प्रतितर्केण परिह्रियते । एवं च क्षेत्रज्ञस्य ज्ञातृत्वात्, अविद्यायाश्च ज्ञेयत्वात्, न तेन तस्याः सम्बन्धो शक्यज्ञानः - इति स्थितम् ॥]

**(७) ननु अयमेव दोषः यद्दोषवत्क्षेत्रविज्ञातृत्वम् । न । विज्ञान-स्वरूपस्यैव अविक्रियस्य विज्ञातृत्वोपचारात्; यथोष्णतामात्रेणाग्नेः तप्तिक्रियोप-चारः, तद्वत् ॥ १३-२, पा. १९९.**

[यद्यविद्या ज्ञेयभूतक्षेत्रधर्म एव, तर्हि तज्ज्ञातृत्वरूपसंसारदोषो दुष्परिहरः - इत्याक्षेपः । आत्मचैतन्यविषयत्वमेव तस्या ज्ञेयत्वम्, न तु तज्ज्ञानव्यापारेण व्याप्यत्वमपि । अतो न दोष इति परिहारः ॥ ]

एतावता विचारसन्दर्भेण इदं स्थितम्, यदविद्यादृष्ट्यैव अविद्यावत्त्वं जीवस्य, परमार्थतस्तु नास्त्येव कस्यचिदप्यविद्यावत्त्वमिति; टीकोक्ताऽविद्या तु मिथ्यार्थावभासान्यथानुपपत्त्या कल्पितैव न प्रत्यक्षेति तस्याः केनचिदपि संबन्धो न शक्यसमर्थन इति स्पष्टमेवेति च ॥

## ७. स्वाभाविकशब्दगर्भितवाक्यानि

'अहमिदं ममेदम् इति नैसर्गिकोऽयं लोकव्यवहारः' इति भाष्ये नैसर्गिकशब्देन स्वाभाविकशब्दपर्यायभूतेन अविचारस्वभावसिद्धत्वं विवक्ष्यते इत्युपपादयितुं ग्रन्थशरीरे (खं. ४०, पा. ७६) कतिचिदुदाहरणानि सूत्र-भाष्यत उद्धृतानि । अथेदानीमन्यान्यपि कतिचिद्वाक्यानि समुदाह्रियन्ते यथोक्तेऽर्थे भाष्यान्तरतः -

(१) तस्मात् एते मन्त्राः आत्मनो याथात्म्यप्रकाशनेन आत्मविषयं स्वाभाविकमज्ञानं निवर्तयन्तः, शोकमोहादिसंसारधर्मविच्छित्तिसाधनमात्मैकत्वादिविज्ञानम् उत्पादयन्ति ॥ ई. भा. अव. पा. २.

(२) यथा हि चन्दनागर्वादेरुदकादिसम्बन्धजक्लेदादिजम् औपाधिकं दौर्गन्ध्यं तत्स्वरूपनिघर्षणेन आच्छाद्यते स्वेन पारमार्थिकेन गन्धेन, तद्वदेव हि स्वात्मन्यध्यस्तं स्वाभाविकं कर्तृत्वभोक्तृत्वादिलक्षणं जगत् द्वैतरूपम्, जगत्यां पृथिव्याम् – 'जगत्याम्' इत्युपलक्षणार्थत्वात् सर्वमेव, नामरूपकर्माख्यं विकारजातं परमार्थसत्यात्मभावनया त्यक्तं स्यात् ॥ ई. भा. १, पा. २.

(३) स्वाभाविक्या स्वशास्त्रीयया प्रवृत्त्या पश्वादिस्थावरान्ता अधोगतिः स्यात् ॥ के. अव. पा. १५.

(४) अतो विधिप्रतिषेधार्थविषयस्य आत्मनि क्रियाकारकफलाध्यारोपणलक्षणस्य स्वाभाविकस्याज्ञानस्य संसारबीजस्य निवृत्त्यर्थं तद्विपरीतब्रह्मात्मैकत्वविज्ञानं क्रियाकारकफलाध्यारोपणलक्षणशून्यम् आत्यन्तिकनिःश्रेयसप्रयोजनं वक्तव्यम् इत्युत्तरो ग्रन्थ आरभ्यते ॥ का. १-१-२०, पा. ६५.

(५) यत् तावत् स्वाभाविकं परागेवानात्मदर्शनं तत् आत्मदर्शनस्य प्रतिबन्धकारणम् अविद्या ॥ का. २-१-२, पा. ८६.

(६) परीक्ष्य यदेतद् ऋग्वेदाद्यपरविद्याविषयं स्वाभाविकाविद्याकामकर्मदोषवत्पुरुषानुष्ठेयम् .... ॥ मुं. भा. १-२-१२, पा. १५२.

(७) न हि भेदवाक्यानां कदाचिदपि मुख्यभेदार्थत्वम् उपपद्यते । स्वाभाविकाविद्यावत्प्राणिभेददृष्टयनुकारित्वात् आत्मभेदवाक्यानाम् ॥ गौ. का. भा. ३-१४, पा. २१४.

(८) सत्यमेव देवतादर्शनस्य सम्भूतिविषयस्य विनाशशब्दवाच्यस्य च कर्मणः समुच्चयविधानार्थः सम्भूत्यपवादः ; तथापि विनाशाख्यस्य कर्मणः स्वाभाविकाज्ञानप्रवृत्तिरूपस्य मृत्योरतितरणार्थत्ववत् देवतादर्शनकर्मसमुच्चयस्य पुरुषसंस्कारार्थस्य कर्मफलरागप्रवृत्तिरूपस्य साध्यसाधनैषणाद्वयलक्षणस्य मृत्योरतितरणार्थत्वम् ॥ गौ. का. भा. ३-२५, पा. २१९.

(९) न ह्येकं वस्तु परमार्थतः कर्त्रादिविशेषवत्, तच्छून्यं च-इत्युभयथा द्रष्टुं शक्यते । अवश्यं हि अन्यतरन्मिथ्या स्यात् । अन्यतरस्य च मिथ्यात्वप्रसङ्गे युक्तं यत् स्वाभाविकाज्ञानविषयस्य द्वैतस्य मिथ्यात्वम् ॥ तै. भा. ११, पा. २७७.

(१०) स्वाभाविकस्य आत्मन्यक्रिये अध्यारोपितस्य कर्त्रादिकारकक्रियाफलभेदविज्ञानस्य निवर्तकम् अद्वैतविज्ञानम् ॥ छां. भा. अव. पा. ३५२.

(११) 'सदेकमेवाद्वितीयम्', 'आत्मैवेदं सर्वम्', 'ब्रह्मैवेदं सर्वम्' इति शास्त्रजन्यः प्रत्ययो विद्यारूपः स्वाभाविकं क्रियाकारकफलभेदप्रत्ययं कर्मविधिनिमित्तम् अनुपमृद्य न जायते, भेदाभेदप्रत्यययोर्विरोधात् ॥ छां. भा. २-२३-१, पा. ४०६.

(१२) एवं ब्रह्माद्या स्थावरान्ता स्वाभाविकाविद्यादिदोषवतः धर्माधर्मसाधनकृता संसारगतिः ॥ बृ. भा. अव. पा. ६०९.

(१३) स च कुमारः भीतः स्वाभाविक्या अविद्यया युक्तः 'भाण्'! इत्येवं शब्दम् अकरोत् ॥ बृ. भा. १-२-४, पा. ६१९.

(१४) पूर्वमपि अद्याद्यात्मान एव सन्तः, स्वाभाविकेन पाप्मना तिरस्कृतविज्ञानाः पिण्डमात्राभिमाना आसन् ॥ बृ. भा. १-३-७, पा. ६३२.

(१५) यदर्थः सर्वशास्त्रारम्भः, यस्मिन् अविद्यया स्वाभाविक्या कर्तृक्रियाफलाध्यारोपणा कृता, यः कारणं सर्वस्य जगतः, यदात्मके नामरूपे – सलिलादिव स्वच्छात् मलमिव फेनम् – अव्याकृते व्याक्रियेते, यश्च ताभ्यां नामरूपाभ्यां विलक्षणः स्वतो नित्यशुद्धबुद्धमुक्तस्वभावः स एषः, अव्याकृते आत्मभूते नामरूपे व्याकुर्वन् ब्रह्मादिस्तम्बपर्यन्तेषु देहेषु इह कर्मफलाश्रयेषु अशनायादिमत्सु प्रविष्टः ॥ बृ. भा. १-४-७, पा. ६५५.

(१६) एतस्य हि अविदुषः, वर्णाश्रमादिप्रविभागवतः, अधिकृतस्य कर्मणः विद्यासहितस्य केवलस्य च शास्त्रोक्तस्य कार्यं मनुष्यत्वादिको ब्रह्मान्त उत्कर्षः । शास्त्रोक्तविपरीतस्य च स्वाभाविकस्य कार्यं मनुष्यत्वादिक एव स्थावरान्तोऽपकर्षः ॥ बृ. भा. १-४-१०, पा. ६७९.

(१७) यदिदं (सर्वं) साधनजातं अस्य कर्मणः ऋत्विगग्न्यादि मृत्युना कर्मलक्षणेन स्वाभाविकासङ्गसहितेन आप्तं व्याप्तम् । न केवलं व्याप्तम्, अभिपन्नं च मृत्युना वशीकृतं च, केन दर्शनलक्षणेन साधनेन यजमानः मृत्योराप्तिम् अतिमृत्युगोचरत्वम् अतिक्रम्य मुच्यते ॥ बृ. भा. ३-१-३, पा. ७८४, ७८५.

(१८) कः पुनरसौ मृत्युः, यस्मात् अतिमुक्तिर्व्याख्याता ? स च स्वाभाविकाज्ञानासङ्गास्पदः, अध्यात्माधिभूतविषयपरिच्छिन्नः ग्रहातिग्रहलक्षणो मृत्युः ॥ बृ. भा. ३-२-१, पा. ७९१.

(१९) यदा तु स्वाभाविक्या अविद्यया ब्रह्मस्वरूपं रज्जुशुक्तिकागगन-स्वरूपवदेव स्वेन रूपेण वर्तमानं केनचिद् अस्पृष्टस्वभावमपि सन् नामरूप-कृतकार्यकरणोपाधिभ्यो विवेकेन नावधार्यते नामरूपोपाधिदृष्टिरेव च भवति स्वाभाविकी, तदा सर्वोऽयं वस्त्वन्तरास्तित्वव्यवहारः ॥ बृ. भा. ३-५-१, पा. ८११.

(२०) ननु एवं सति प्रमाणभूतस्य कर्मविधेर्निरोधः स्यात् । न च तुल्यप्रमाणयोः इतरेतरनिरोधो युक्तः । न । स्वाभाविकभेदबुद्धिमात्रनिरोधक-त्वात् । न हि विध्यन्तरनिरोधकम् आत्मज्ञानम्, स्वाभाविकभेदबुद्धिमात्रं निरुणद्धि ॥ बृ. भा. ४-५-१५, पा. ९४७.

(२१) तस्मात् यथाप्राप्तमेव द्वैतम् अविद्याकृतं स्वाभाविकम् उपादाय स्वाभाविक्यैव अविद्यया युक्ताय रागद्वेषादिदोषवते यथाभिमतपुरुषार्थसाधनं कर्म उपदिशति अग्रे ॥ बृ. भा. ५-१-१, पा. ९५३.

(२२) यद्यपि 'द्वया ह प्राजापत्याः' (१-३-१) इत्यत्र स्वाभाविकः पाप्मा सूचितः । न च तस्येदं कार्यम् इति विपाकः प्रदर्शितः । शास्त्रीयस्यैव तु विपाकः प्रदर्शितः श्यन्नात्मप्रतिपत्त्यन्तेन ॥ बृ. भा. ६-२-१, पा. ९८३.

[अत्र स्वाभाविक इति शास्त्रीयप्रतिद्वन्द्वी अर्थ उक्तः ॥]

## ८. जीवन्मुक्तिवाक्यानि

जीवन्मुक्ते अविद्यालेशस्तत्संस्कारो वा अनुवर्तत इत्यङ्गीकृतं व्याख्यानप्रस्थाने (खं. ५०, पा. ९८) । भाष्यप्रस्थाने तु अविद्याकृतत्वात् कर्तृत्वदुःखित्वादेः, विद्यया च तस्या निरवशेषं बाधात् ज्ञानसमकालमेव सद्योमुक्तिरिति सिद्धान्तः । मिथ्याज्ञानस्य तु बाधितस्यापि द्विचन्द्रदर्शनवत् कञ्चित्कालमनुवृत्तिरिति तु व्यवहारदृष्ट्या इत्यस्मिन्नर्थे सूत्रभाष्यवाक्यानि कानिचित् (पा. ९९) उदाहृतानि । गीतावाक्यमेकं च उपनिषद्वाक्यं चैकमुदाहृतं तत्रैव । अथेदानीमन्यान्यपि उपनिषद्भाष्येभ्यो गीताभाष्याच्च कानिचिद् जीवन्मुक्तिवाक्यान्युद्धृत्य दर्शयिष्यन्ते ॥

(१) इहैव चेन्मनुष्योऽधिकृतः समर्थः सन् यद्यवेदीत् आत्मानं यथोक्त-लक्षणं विदितवान् यथोक्तेन प्रकारेण, अथ तदा अस्ति सत्यं मनुष्यजन्मनि

अस्मिन् अविनाशोऽर्थवत्ता वा सद्भावो वा परमार्थता वा सत्यं विद्यते । न चेदिहावेदीदिति । न चेदिह जीवंश्चेदधिकृतो वेदीन्न विदितवान्, तदा महती दीर्घा अनन्ता विनष्टिः, विनाशनं जन्मजरामरणादिप्रबन्धाविच्छेदलक्षणा संसारगतिः ॥ के. भा. २-५, पा. २८-२९.

(२) स्वात्मभूते अनन्यस्मिन् आत्मनि प्रोक्ते अनन्यप्रोक्ते गतिः, अत्रान्यावगतिर्नास्ति, ज्ञेयस्यान्यस्याभावात् । ज्ञानस्य ह्येषा परा निष्ठा यदात्मैकत्वविज्ञानम् । अतोऽवगन्तव्याभावान्न गतिरत्रावशिष्यते । संसारगतिर्वा अत्र नास्ति अनन्ये आत्मनि प्रोक्ते नान्तरीयकत्वात् तद्विज्ञानफलस्य मोक्षस्य ॥ क. भा. २-८, पा. ७२.

(३) तदेवम्भूतं ब्रह्मात्मानं निचाय्य अवगम्य तमात्मानं मृत्युमुखात् मृत्युगोचरात् अविद्याकामकर्मलक्षणात् प्रमुच्यते, वियुज्यते ॥ क. भा. १-३-१५, पा. ८४.

(४) तं सर्वैषणाविनिर्मुक्तः सन् समं सर्वभूतस्थं ध्यात्वा न शोचति । तद्विज्ञानादभयप्राप्तेः, शोकावसराभावात् कुतो भयेक्षा ? इहैवाविद्याकृतकामकर्मबन्धनैर्विमुक्तो भवति । विमुक्तश्च सन् विमुच्यते, पुनः शरीरं न गृह्णाति इत्यर्थः ॥ का. भा. २-२-१, पा. ९१.

[अत्र मुख्यमुक्तिरिहैव जन्मनि, शरीरग्रहणान्मुक्तिः शरीरपातानन्तरम् इत्युक्तम् ॥]

(५) यं ज्ञात्वा आचार्यतः शास्त्रतश्च मुच्यते जन्तुः, अविद्यादिहृदयग्रन्थिभिर्जीवन्नेव । पतितेऽपि शरीरे अमृतत्वं च गच्छति ॥ के. भा. २-३-८, पा. १००.

(६) अथ तदा – मर्त्यः प्राक् प्रबोधात् आसीत् स प्रबोधोत्तरकालम् अविद्याकामकर्मलक्षणस्य मृत्योर्विनाशात् अमृतो भवति । गमनप्रयोजकस्य मृत्योर्विनाशात् गमनानुपपत्तेः, अत्र इहैव प्रदीपनिर्वाणवत् सर्वबन्धनोपशमात् ब्रह्म समश्नुते, ब्रह्मैव भवति – इत्यर्थः ॥ का. भा. २-३-१४, पा. १०३.

(७) तस्मात्, सर्वं ब्रह्म परामृतं 'परममृतमहमेव' इति यो वेद निहितं स्थितं गुहायां हृदि सर्वप्राणिनाम्, स एवं विज्ञानात् अविद्याग्रन्थिं ग्रन्थिमिव दृढीभूताम् अविद्यावासनां विकिरति विक्षिपति विनाशयति इह जीवन्नेव न मृतः सन् हे सोम्य प्रियदर्शन ॥ मुं. भा. २-१-१०, पा. १५८, १५९.

(८) यदि हि देशपरिच्छिन्नं ब्रह्म स्यात्, मूर्तद्रव्यवत् आद्यन्तवदन्याश्रितं सावयवम् अनित्यं कृतकं च स्यात् । न त्वेवंविधं ब्रह्म भवितुमर्हति । अतस्तत्प्राप्तिश्च नैव देशपरिच्छिन्ना भवितुं युक्ता । अपि चाविद्यादिसंसारबन्धापनयमेव मोक्षमिच्छन्ति ब्रह्मविदः, न तु कार्यभूतम् ॥ मुं. भा. ३-२-६, पा. १७३.

(९) किञ्च तरति शोकम् अनेकेष्टवैकल्यनिमित्तं मानसं सन्तापं जीवन्नेव अतिक्रान्तो भवति । तरति पाप्मानं धर्माधर्माख्यं गुहाग्रन्थिभ्यः हृदयाविद्याग्रन्थिभ्यो विमुक्तः सन् अमृतो भवति । मुं. भा. ३-२-९, पा. १७४.

(१०) आत्मैव सत्यम् आत्मसत्यम्, ........ तस्य शास्त्राचार्योपदेशमनु अवबोधः, आत्मसत्यानुबोधः । तेन सङ्कल्प्याभावात् तन्न सङ्कल्पयते दाह्याभावे ज्वलनमिवाग्नेः यदा यस्मिन् काले तदा तस्मिन् काले अमनस्ताम् अमनीभाव याति ग्राह्याभावे तन्मनः, अग्रहं ग्रहणविकल्पनावर्जितम् इत्यर्थः ॥ गौ. का. भा. ३-३२, पा. २२१.

[आत्मैव सत्यमिति यदा बोधः, तदा मनसोऽपि बाध एव भवतीत्युक्तम् । तदा मनआश्रिताया अविद्यायास्तत्संस्कारस्य च अभाव इति स्फुटमेव ॥]

(११) येषां पुनर्ब्रह्मस्वरूपव्यतिरेकेण रज्जुसर्पवत् कल्पितमेव मनः इन्द्रियादि च न परमार्थतो विद्यते, तेषां ब्रह्मस्वरूपाणाम् अभयं मोक्षाख्या च अक्षया शान्तिः स्वभावत एव सिद्धा, नान्यायत्ता 'नोपचारः कथञ्चन' इत्यवोचाम ॥ गौ. का. भा. ३-४०, पा. २२५.

[मनसः कल्पितत्वे सिद्धे तदाश्रयेण लब्धसद्भावाया अविद्याया बाधितत्वं सिद्धमेव ॥]

(१२) स्थानत्रयाभावेन परमार्थसत्ये तुर्ये अद्वये, अजे, अभये, विदिते, स्वयमेव आत्मस्वरूपमेव सर्वज्ञता – सर्वश्चासौ ज्ञश्च सर्वज्ञः; तद्भावः सर्वज्ञता – इह अस्मिँल्लोके भवति महाधियः महाबुद्धेः । सर्वलोकातिशयवस्तुविषयबुद्धित्वात् एवंविदः सर्वत्र सर्वदा भवति । सकृद्विदिते स्वरूपे व्यभिचाराभावात् इत्यर्थः । न हि परमार्थविदो ज्ञानिनः ज्ञानोद्भवाभिभवौ स्तः, यथान्येषां प्रावादुकानाम् ॥ गौ. का. भा. ४-८९, पा. २५२, २५३.

[ईश्वरस्य ज्ञानिनः; अविद्यालेशः, तत्संस्कारो वा न शक्यशङ्क इति स्पष्टम् ॥]

(१३) अन्नमयाद्यानन्दमयान्तात्मव्यतिरिक्तकर्तृकं ज्ञानमात्रं च संक्रमणम् उपपद्यते । ज्ञानमात्रत्वे च आनन्दमयान्तःस्थस्यैव सर्वान्तरस्य आकाशाद्यन्नमयान्तं कार्यं सृष्ट्वा अनुप्रविष्टस्य हृदयगुहाभिसंबन्धादन्नमयादिषु अनात्मसु आत्मत्वविभ्रमः संक्रमणेन आत्मविवेकविज्ञानोत्पत्त्या विनश्यति । तदेतस्मिन् अविद्याविभ्रमनाशे संक्रमणशब्द उपचर्यते ॥ तै. भा. २-८, पा. ३१०.

[अत्र संक्रमणं ज्ञानम्, तदेव चाविद्याविभ्रमनाशलक्षणं परमपुरुषार्थः – इत्युक्तम् ॥]

(१४) अनुसञ्चरन् सर्वात्मना इमान् लोकान् आत्मत्वेनानुभवन्, किम्? एतत्साम गायन् आस्ते । समत्वाद् ब्रह्मैव साम सर्वानन्यरूपं गायन्

शब्दयन् आत्मैकत्वं प्रख्यापयन्, लोकानुग्रहार्थं तद्विज्ञानफलं चातीव कृतार्थत्वं गायन्नास्ते तिष्ठति ॥ तै. भा. ३-५, पा. ३२१.

[आनन्दमयान्तमुपसंक्रम्य ब्रह्म गायन्नास्ते इत्यनेन सर्वथा अज्ञानप्रहाणिप्रख्यापनम् ॥]

(१५) स वामदेव ऋषिर्यथोक्तमात्मानमेवं विद्वान् अस्मात् शरीरभेदात् शरीरस्याविद्यापरिकल्पितस्य आयसवदनिर्भेद्यस्य जननमरणाद्यनेकानर्थशताविष्टशरीरप्रबन्धस्य परमात्मज्ञानामृतोपयोगजनितवीर्यकृतभेदात् शरीरोत्पत्तिबीजाविद्यादिनिमित्तोपमर्दहेतोः शरीरविनाशात् इत्यर्थः । ऊर्ध्वः परमात्मभूतः सन् अधोभावात् संसारात् उत्क्रम्य ज्ञानावद्योतिताऽमलसर्वात्मभावमापन्नः सन् अमुष्मिन् यथोक्ते अजरेऽमरेऽमृतेऽभये सर्वज्ञेऽपूर्वेऽनपरेऽनन्तरेऽबाह्ये प्रज्ञानामृतैकरसे स्वर्गे लोके स्वस्मिन्नात्मनि स्वे स्वरूपे अमृतः समभवत् आत्मज्ञानेन पूर्वमात्मकामतया जीवन्नेव सर्वान् कामानाप्त्वा इत्यर्थः ॥ ऐ. भा. २-४-६, पा. ३४५, ३४६.

[अत्र शरीरस्याविद्याकृतत्वं ज्ञानेन तन्नाशो जीवत एवेत्युक्तम् ॥]

(१६) न च 'असत्यम्' इत्युपमर्दिते भेदप्रत्यये 'सत्यमिदम् अनेन कर्तव्यं मया' इति प्रमाणप्रमेयबुद्धिरुपपद्यते, आकाश इव तलमलबुद्धिर्विवेकिनः ॥ छां. भा. २-२३-१, पा. ४०६.

[इह ज्ञानिनः सकलभेदप्रत्ययोपमर्दमकर्तृत्वं चाऽऽह ॥]

(१७) ननु सर्वात्मत्वे दुःखसंबन्धोऽपि स्यात् इति चेत् । न । दुःखस्याप्यात्मत्वोपगमात्, अविरोधः । आत्मनि अविद्याकल्पनानिमित्तानि दुःखानि रज्ज्वामिव सर्पादिकल्पनानिमित्तानि । सा चाविद्या अशरीरात्मैकत्वस्वरूपदर्शनेन दुःखनिमित्ता उच्छिन्नेति दुःखसंबन्धाशङ्का न संभवति ॥ छां. भा. ८-१२-१, पा. ५९६.

[अविद्याकल्पितदुःखैर्न संबन्धो ज्ञानिनः, अविद्याया निवृत्तेः ॥]

(१८) अविद्यायाश्च ब्रह्मविद्यया निरन्वयतो नाशितत्वात् कुतो विशेषसंज्ञासम्भवो ब्रह्मविदश्चैतन्यस्वभावावस्थितस्य । शरीरावस्थितस्यापि विशेषसंज्ञा नोपपद्यते किमुत कार्यकरणविमुक्तस्य सर्वतः ॥ बृ. भा. २-४-१२, पा. ७६७.

[शरीरेऽवस्थितिरविद्याकृतेति जीवतोऽपि अशरीरत्वमेव परमार्थतः । अतो विदुषो जीवद्दशायामपि नास्ति विशेषसंज्ञा इति भावः ॥]

(१९) यो हि सुषुप्तावस्थायामिव निर्विशेषमद्वैतम् अलुप्तचिद्रूपज्योतिःस्वभावमात्मानं पश्यति तस्यैवाकामयमानस्य कर्माभावे गमनकारणाभावात्

प्राणा वागादयो नोत्क्रामन्ति; किं तु विद्वान् स इहैव ब्रह्म – यद्यपि देहवानिव लक्ष्यते – स ब्रह्मैव सन् ब्रह्माप्येति । यस्मान्न हि तस्य अब्रह्मत्व-परिच्छेदहेतवः कामाः सन्ति, तस्मात्, इहैव ब्रह्मैव सन् ब्रह्माप्येति, न शरीर-पातोत्तरकालम् । न हि विदुषो मृतस्य भावान्तरापत्तिः, जीवतोऽन्यो भावः । देहान्तरप्रतिसन्धानाभावमात्रेणैव तु ब्रह्माप्येतीत्युच्यते । भावान्तरापत्तौ हि मोक्षस्य सर्वोपनिषद्विवक्षितोऽर्थः. आत्मैकत्वाख्यः स बाधितो भवेत् ॥ बृ. भा. ४-४-६, पा. ९१७.

(२०) एष ब्रह्मलोको ब्रह्मैव लोको ब्रह्मलोको मुख्यः । निरुपचरितः सर्वात्मभावलक्षणः, हे सम्राट्! एनं ब्रह्मलोकं परिप्रापितोऽसि अभयम् नेति नेत्यादिलक्षणम् इति होवाच याज्ञवल्क्यः ॥ बृ. भा. ४-४-२३, पा. ९३७.

[जीवन्तमेव याज्ञवल्क्यः 'निरुपचरितं ब्रह्म प्रापितोऽसि, न ब्रह्मलोकवद् देह-पातानन्तरं प्राप्यमेतदित्युक्तवान् ॥]

(२१) भयं च हि नाम अविद्याकार्यम्, तत् कार्यप्रतिषेधेन भाव-विकारप्रतिषेधेन च अविद्यायाः प्रतिषेधः सिद्धो वेदितव्यः । अभय आत्मा एवङ्गुणविशिष्टः । किमसौ? ब्रह्म परिवृढं निरतिशयं महत् इत्यर्थः । अभयं वै ब्रह्म, प्रसिद्धमेतत् लोकेऽभयं ब्रह्मेति । तस्मात् युक्तम् एवङ्गुणविशिष्ट आत्मा ब्रह्मेति । य एवं यथोक्तमात्मानम् अभयं ब्रह्म वेद सोऽभयं हि वै ब्रह्म भवति ॥ बृ. भा. ४-४-२५, पा. ९३८.

[ब्रह्मात्मैकत्ववेदनात् अभयं ब्रह्म भवति, सर्वाविद्यातत्कार्यरहितो भवतीत्यर्थः ॥]

## गीताभाष्ये जीवन्मुक्तिवचनानि

(१) कर्मजं 'फलं त्यक्त्वा' इति व्यवहितेन संबन्धः । इष्टानिष्टदेहप्राप्तिः कर्मजं फलं कर्मभ्यो जातम् । बुद्धियुक्ताः समत्वबुद्धियुक्ताः हि यस्मात् फलं त्यक्त्वा परित्यज्य मनीषिणः ज्ञानिनो भूत्वा जन्मबन्धविनिर्मुक्ताः जन्मैव बन्धः जन्मबन्धः, तेन विनिर्मुक्ता जीवन्त एव जन्मबन्धविनिर्मुक्ताः सन्तः, पदं परमं विष्णोः मोक्षाख्यं गच्छन्ति अनामयं सर्वोपद्रवरहितम् इत्यर्थः ॥ गी. भा. २-५१, पा. ३२.

(२) योऽयं लौकिको वैदिकश्च व्यवहारः. स उत्पन्नविवेकज्ञानस्य स्थित-प्रज्ञस्य अविद्याकार्यत्वात् अविद्यानिवृत्तौ निवर्तते; अविद्यायाश्च विद्याविरोधा-न्निवृत्तिः ॥ २-६९, पा. ३८.

(३) इहैव जीवद्भिरेव तैः समदर्शिभिः पण्डितैः जितो वशीकृतः सर्गो जन्म, येषां साम्ये सर्वभूतेषु ब्रह्मणि समभावे स्थितं निश्चलीभूतं मनः अन्तः-करणम् ॥ ५-१९, पा. ९३.

(४) योऽन्तःसुखः, अन्तरात्मनि सुखं यस्य सोऽन्तःसुखः तथा अन्तरेव आत्मनि आरामः आरमणं क्रीडा यस्य सोऽन्तरारामः। तथैव अन्तरेव आत्मन्येव ज्योतिः प्रकाशः यस्य सः अन्तर्ज्योतिरेव । य ईदृशः स योगी ब्रह्मनिर्वाणं ब्रह्मणि निर्वृतिं मोक्षम् इह जीवन्नेव ब्रह्मभूतः सन् अधिगच्छति प्राप्नोति इत्यर्थः ॥ ५-२४, पा. ९५.

(५) सम्यग्दर्शननिष्ठानां संन्यासिनां सद्योमुक्तिरुक्ता ॥ ५-२७, पा. ९६.

(६) प्रशान्तमनसं प्रकर्षेण शान्तं मनः यस्य सः प्रशान्तमनाः, तं प्रशान्तमनसं हि एनं योगिनं सुखम् उत्तमं निरतिशयम् उपैति उपगच्छति शान्तरजसं प्रक्षीणमोहादिक्लेशरजसम् इत्यर्थः । ब्रह्मभूतं जीवन्मुक्तं 'ब्रह्मैव सर्वम्' इत्येवं निश्चयवन्तं ब्रह्मभूतम् अकल्मषम् अधर्मादिवर्जितम् ॥ ६-२७, पा. १०९.

(७) तस्मिन् मार्गे प्रयाताः मृताः गच्छन्ति ब्रह्म ब्रह्मविदो ब्रह्मोपासकाः ब्रह्मोपासनपरा जनाः । क्रमेण इति वाक्यशेषः । न हि सद्योमुक्तिभाजां सम्यग्दर्शननिष्ठानां गतिः, आगतिर्वा क्वचिदस्ति 'न तस्य प्राणा उत्क्रामन्ति' इति श्रुतेः । ब्रह्मसँलीनप्राणा एव ते ब्रह्ममया ब्रह्मभूता एव ते ॥ ८-२४, पा. १३४.

(८) गुणान् एतान् यथोक्तान् अतीत्य जीवन्नेव अतिक्रम्य मायोपाधिभूतान् त्रीन् देही देहसमुद्भवान् देहोत्पत्तिबीजभूतान् जन्ममृत्युजरादुःखैः जन्म च मृत्युश्च जरा च दुःखानि च जन्ममृत्युजरादुःखानि तैः जीवन्नेव विमुक्तः सन् विद्वान् अमृतम् अश्नुते । एवं मद्भावम् अधिगच्छति- इत्यर्थः ॥ १४-२०, पा. २२४.

(९) नैष्कर्म्यसिद्धिं परमां प्रकृष्टां कर्मजसिद्धिविलक्षणाम् सद्योमुक्त्यवस्थानरूपाम्, संन्यासेन सम्यग्दर्शनेन तत्पूर्वकेण वा सर्वकर्मसंन्यासेन अधिगच्छति प्राप्नोति ॥ १८-४९, पा. २७९.

## ९. कारणब्रह्मवाक्यानि

जन्मादिसूत्रे अद्वितीयमेव ब्रह्म जगत्कारणत्वेन लक्षितमिति भाष्यप्रस्थानम् । तत्र तटस्थब्रह्ममात्रं सूत्रितमिति टीकाभिप्रायो न साधुरिति प्रतिपादयितुं कतिचिद् वाक्यानि ग्रन्थशरीरे (खं. ५७, पा. १०९) समुदाहृतानि । एतदेवोपबृंहयितुमत्र वाक्यान्तराणि गीतादिभाष्येभ्य उद्धृत्येहोदाह्रियन्ते –

(१) ऊर्ध्वमूलः – ऊर्ध्वं मूलं यत् तद् विष्णोः परमं पदम् अस्य इति, सोऽयम् अव्यक्तादिस्थावरान्तः संसारवृक्षः, ऊर्ध्वमूलः वृक्षश्च व्रश्चनात्, अविच्छिन्नजन्मजरामरणशोकाद्यनेकानर्थात्मकः, प्रतिक्षणम् अन्यथास्वभावः, मायामरीच्युदकगन्धर्वनगरादिवत् दृष्टनष्टस्वरूपत्वात्, अवसाने च वृक्षवत् अभावात्मकः कदलीस्तम्भवत् निःसारः ॥ का. भा. २-३-१, पा. ९७.

[ जगतः कारणं 'विष्णोः परमं पदम्' इति, जगच्च मायादिवत् 'दृष्टनष्टस्वरूपम्' इत्युक्तेः, अद्वितीयमेव ब्रह्म जगत्कारणमित्युक्तं भवति ॥]

(२) बुद्ध्यादिचेष्टाविषयं चेत् ब्रह्म 'इदं तत्' इति विशेषतो गृह्येत, बुद्ध्याद्युपरमे च ग्रहणकारणाभावात् अनुपलभ्यमानं नास्त्येव ब्रह्म। ........ इत्येवं प्राप्ते इदमुच्यते । सत्यम् । नैव वाचा न मनसा न चक्षुषा नान्यैरपीन्द्रियैः प्राप्तुं शक्यत (इति) इत्यर्थः । तथापि सर्वविशेषरहितोऽपि जगतो मूलम् इत्यवगतत्वात् अस्त्येव कार्यप्रविलापनस्य अस्तित्वनिष्ठत्वात् .... मूलं चेत् जगतो न स्यात् असदन्वितमेवेदं कार्यम् 'असत्' 'असत्' इत्येव गृह्येत । न त्वेतदस्ति । 'सत्' 'सत्' इत्येव तु गृह्यते, यथा मृदादिकार्यं घटादि मृदन्वितम् ॥ का. भा. २-३-१२, पा. १०२.

[ अत्र निर्विशेषस्यापि सतः जगत्कारणत्वेनावगतत्वात् अस्तित्वमभ्युपगन्तव्यम् इत्युक्तम् ॥ ]

(३) तस्मिन् कालेऽविद्याकामकर्मनिबन्धनानि कार्यकरणानि शान्तानि भवन्ति । तेषु शान्तेषु आत्मस्वरूपम् उपाधिभिरन्यथाविभाव्यमानम् अद्वयमेकं शिवं शान्तं भवति इत्येतामेवावस्थां पृथिव्याद्यविद्याकृतमात्रानुप्रवेशेन दर्शयितुं दृष्टान्तमाह .... ॥ प्र. भा. ४-७, पा. १२६.

[अत्र सुषुप्तावक्षरे पृथिव्यादिभूततन्मात्रादीनां परे अक्षरे आत्मनि संप्रतिष्ठाश्रुतेः, अक्षरमेव जगज्जन्मादिकारणमित्युक्तं भवति ॥ ]

(४) विज्ञानात्मा सह देवैश्च अग्न्यादिभिः प्राणाः चक्षुरादयः, भूतानि पृथिव्यादीनि सम्प्रतिष्ठन्ति प्रविशन्ति यत्र यस्मिन्नक्षरे तदक्षरं वेदयते यस्तु हे सोम्य प्रियदर्शन स सर्वज्ञः सर्वमेवाविवेश, आविशति इत्यर्थः ॥ प्र. भा. ४-११, पा. १२८.

[सर्वजगल्लयस्थानमक्षरम् तद्विज्ञानात् सर्वं विज्ञातं भवतीत्यर्थः ॥]

(५) उपलब्धिनिमित्तत्वाच्च दर्शनश्रवणमननविज्ञानादिलिङ्गैरन्तःशरीरे परिच्छिन्न इव हि उपलभ्यते पुरुषः, उपलभ्यते चात्र । अत उच्यते 'अन्तःशरीरे सोम्य स पुरुषः' इति ; न पुनराकाशकारणः सन् कुण्डबदरवत् शरीरपरिच्छिन्न इति मनसापीच्छति वक्तुं मूढोऽपि, किमुत प्रमाणभूता श्रुतिः ॥ प्र. भा. ६-२, पा. १३५.

[आकाशकारणं पुरुष एवाक्षराख्यः – इत्युक्तमत्र ॥]

(६) पुरुषस्य स्वात्मन्येव भोक्तृत्वे चिन्मात्रस्वरूपविक्रिया न दोषाय। भवतां पुनर्वेदवादिनां सृष्टिकर्तृत्वे तत्त्वान्तरपरिणाम एव – इत्यात्मनोऽनित्यत्वादिसर्वदोषप्रसङ्ग इति चेत्, न। एकस्याप्यात्मनोऽविद्याविषयनामरूपोपाध्यनुपाधिकृतविशेषाभ्युपगमात्। अविद्याकृतनामरूपोपाधिकृतो हि विशेषोऽभ्युपगम्यते। आत्मनो बन्धमोक्षादिशास्त्रकृतसंव्यवहाराय। परमार्थतोऽनुपाधिकृतं च तत्त्वमेकमेवाद्वितीयम् उपादेयं सर्वतार्किकबुद्ध्यनवगम्यं हि अजमभयं शिवमिष्यते॥ प्र. भा. ६ ३. पा. १३६.

[अत्र कारणत्वं मायोपाधिकृतम् अद्वैतस्यैव सतः – इत्युक्तम्॥]

(७) यथैते [ऊर्णनाभ्यादयः] दृष्टान्ताः, तथा विलक्षणं सलक्षणं निमित्तान्तरानपेक्षात्, यथोक्तलक्षणात् अक्षरात् संभवति॥ मुं. १-१-७, पा १४६.

(८) तस्मात् सबीजत्वाभ्युपगमेनैव सतो प्राणत्वव्यपदेशः, सर्वश्रुतिषु च कारणत्वव्यपदेशः। अत एव 'अक्षरात् परतः परः', 'स बाह्याभ्यन्तरो ह्यजः', 'यतो वाचो निवर्तन्ते', 'नेति नेति' इत्यादिना बीजत्वापनयनेन व्यपदेशः॥ गौ. का. भा. १-२, पा. १८३.

[अद्वितीयब्रह्मण एव कारणत्वव्यपदेशः, तदपोहेन व्यपदेशश्च इति द्वेधा श्रुतिप्रस्थानम् उपाध्यपेक्ष्यत्वतदनपेक्षत्वाभ्याम् इत्यर्थः॥]

(९) सतां विद्यमानानां स्वेन अविद्याकृतनामरूपमायास्वरूपेण सर्वभावानां विश्वतैजसप्राज्ञभेदानां प्रभव उत्पत्तिः। वक्ष्यति च 'बन्ध्यापुत्रो न तत्त्वेन मायया वापि जायते' इति। यदि ह्यसतामेव जन्म स्यात्, ब्रह्मणोऽव्यवहार्यस्य ग्रहणद्वाराभावात् असत्त्वप्रसङ्गः। दृष्टं च रज्जुसर्पादीनाम् अविद्याकृतमायाबीजोत्पन्नानां रज्ज्वाद्यात्मना सत्त्वम्। न हि निरास्पदा रज्जुसर्पमृगतृष्णिकादयः क्वचिदुपलभ्यन्ते केनचित्। यथा रज्ज्वां प्राक् सर्पोत्पत्तेः रज्ज्वाद्यात्मना सर्पः सन्नेवासीत्, एवं सर्वभावानाम् उत्पत्तेः प्राक् प्राणबीजात्मनैव सत्त्वम्॥ गौ. का. भा. १-६, पा. १८४.

[मायिकसत्कार्यवादाश्रयणेनैव ब्रह्मणः कारणत्वव्यपदेशः–इत्यर्थः॥]

(१०) तस्मात्, आकाशादिकारणत्वात्, देशतस्तावदनन्तं ब्रह्म। आकाशो ह्यनन्त इति प्रसिद्धं देशतः, तस्य चेदं कारणम्, तस्मात् सिद्धं देशत आत्मन आनन्त्यम्। .... अतो निरतिशयमात्मन आनन्त्यं देशतः, तथा अकार्यत्वात् कालतः, तद्भिन्नवस्त्वन्तराभावाच्च वस्तुतः॥ तै. भा. २-१, पा. २८७.

[ब्रह्मण आकाशादिकारणत्वमानन्त्योपपादनार्थम् इत्युक्तमत्र॥]

(११) तस्मात्, आत्मभूतनामरूपोपादानभूतः सन् सर्वज्ञो जगन्निर्मिमीत इत्यविरुद्धम्। अथवा यथा विज्ञानवान् मायावी निरुपादान एव आत्मानमेव

आत्मान्तरत्वेन आकाशेन गच्छन्तमिव निर्मिमीते, तथा सर्वज्ञो देवः सर्वशक्ति-र्महामायः आत्मानमेवात्मान्तरत्वेन जगद्रूपेण निर्मिमीते इति युक्ततरम्। एवं च सति कार्यकारणोभयासद्वाद्यादिपक्षाश्च न प्रसज्यन्ते, सुनिराकृताश्च भवन्ति॥ ऐ. भा. २-२, पा. ३३१.

(१२) ननु निरवयवं सत् ... निरवयवस्य सतः कथं विकारसंस्थानमुपपद्यते? नैष दोषः। रज्ज्वाद्यवयवेभ्य सर्पादिसंस्थानवत् बुद्धिपरिकल्पितेभ्यः सदवयवेभ्यो विकारसंस्थानोपपत्तेः। वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्, एवं सदेव सत्यमिति श्रुतेः, एकमेवाद्वितीयं परमार्थः इदंबुद्धिकालेऽपि॥ छां.भा. ६-२-२, पा. ५०९.

[अद्वितीयत्वमनुपमृद्यैव कारणत्वं मायिकम् इत्यर्थः॥]

(१३) तत्र इदं सर्वं यदयमात्मा – इति प्रतिज्ञातम्। तत्र हेतुरभिहितः आत्मसामान्यत्वम्, आत्मजत्वम्, आत्मप्रलयत्वं च। तस्मात् उत्पत्तिस्थिति-प्रलयकालेषु प्रज्ञानव्यतिरेकेणाभावात् 'प्रज्ञानं ब्रह्म', 'आत्मैवेदं सर्वम्' इति यत् प्रतिज्ञातं तत्तर्कतः साधितम्॥ बृ. भा. २-४-१२, पा. ७६५.

[जगज्जन्मादिकारणत्वोपदेशः, आत्मैकत्वोपपादनाय॥]

(१४) तत्र विजज्ञुर्ब्राह्मणाः, यतो मृतः पुनः प्ररोहति, (तत्?) जगतो मूलं न विज्ञातं ब्राह्मणैः।....यज्जगतो मूलम्, येन च शब्देन साक्षाद् व्यपदिश्यते ब्रह्म, यत् याज्ञवल्क्यो ब्राह्मणान् पृष्टवान्, तत् स्वेन रूपेण श्रुतिरस्मभ्यम् आह–विज्ञानं विज्ञप्तिर्विज्ञानम्, तच्च आनन्दम्, न विषयविज्ञानवद् दुःखानु-विद्धम्, किं तर्हि प्रसन्नं शिवमतुलम् अनायासम्, नित्यतृप्तम्, एकरसम् इत्यर्थः। किं तत् ब्रह्म उभयविशेषणवत्॥ बृ. भा. ३-९-२८, पा. ८४८.

## गीताभाष्ये

(१) एवम् अविद्यालक्षणां प्रकृतिं स्वां स्वीयाम् अवष्टभ्य वशीकृत्य विसृजामि पुनः पुनः प्रकृतितो जातं भूतग्रामं भूतसमुदायम् इमं वर्तमानं कृत्स्नं समग्रम् अवशम् अस्वतन्त्रम् अविद्यादिदोषैः परवशीकृतं प्रकृतेर्वशात्, स्वभाववशात्॥ गी भा. ९-८, पा. १३९.

(२) अहमेवादिर्भूतानां कारणम्, तथा मध्यं च स्थितिः, अन्तः प्रलयश्च॥ गी. भा. १०-२०, पा. १५४.

(३) ऊर्ध्वमूलं कालतः सूक्ष्मत्वात्, कारणत्वात्, नित्यत्वात्, महत्वाच्च ऊर्ध्वम् उच्यते ब्रह्म अव्यक्तमायाशक्तिमत्। तन्मूलमस्य इति सोऽयम् संसारवृक्षः ऊर्ध्वमूलः॥ गी. भा. १५-१, पा. २२८.

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादश्रीमच्छङ्करभगवच्चरणस्मरणपरिचयावाप्त-वेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्येण सच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतं पञ्चपादिकाप्रस्थानपरिशीलनपरिशिष्टम् समाप्तम्

# अथ मुख्यशब्दसूची

अत्र य एव शब्दाः पञ्चपादिकायाम् असाधारणतया प्रयुक्ताः, भाष्ये प्रयुक्ता अपि तु न टीकाकृदादृतार्थकत्वेन क्वचिदपि प्रयुक्ताः, त एव वर्णानुक्रमेण निर्दिश्यन्ते प्रस्थानयोरुभयोः परस्परवैलक्षण्यप्रद्योतनार्थमिति मन्तव्यम् । अत्र सङ्ख्याः पत्रपार्श्वपरामर्शकाः ॥


अक्षरम्, ४७.
अग्रहणम्, १९, ४७, ५५, ९८.
अग्रहणाविद्या, ३३, ५५, ६०.
अज्ञानम्, १९.
अतद्रूपप्रतिभासः, १९, ४०.
अतद्रूपावभासिता, ७२.
अध्यस्तप्रविलयनम्, ७३.
अध्यासः, ७, १८, २८, ७०, ७५.
अनर्थहेतोः प्रहाणम्, ८३-८५.
अनवभासः, ३३, ६४.
अनादित्वम्, ९, १८, ६४, ६७, ८४, १०७
अनाद्य(निर्वचनीया)विद्या, ३०, ३३, ४८, ५५, ८४, १०५.
अनिर्वचनीयम्, १६, १९, ६७.
अनुमानम्, १०६.
अनृतम्, ३३, ७७.
अपरोक्षचैतन्यस्था अविद्याशक्तिः, ३०.
अपरोक्षत्वम्, ७०, ७१.
अपरोक्षावभासः, ३१.
अपरोक्षोऽहङ्कारः, ४८.
अपौरुषेयः, ११०.
अब्रह्मोपासनानि, १०१.
अर्थवादः, १२०, १२१.
अर्थापत्तिः, ३३.
अवगतिः, ९४.
अवभासः, २८.
अविद्या, ३३, ४७, ७२, ९८.
अविद्यानामानि, ४७.
अविद्यापरिणामविशेषः, ४८.
अविद्याया आश्रयविषयौ, ३३.
अविद्यायां प्रमाणम्, १९, ३३.
अविद्याशक्तिः, १९, ३०.
अविद्यासंस्कारः, १९, ४०.
अविद्यावच्छिन्ना जीवाः, ३३, ५५.
अविद्याविलयः, ८७.
अविषये अध्यासः, ९.
अविषये श्रुतिप्रामाण्यम्, ११३.
अव्यक्तम्, ४७.
अव्याकृतम्, ४७.
असत्, ३०.
असंप्रयुक्तावभासि, २८.
अस्मत्प्रत्ययगोचरत्वम्, -विषयत्वम्, ७, ९, ६०, ७०.
'अहमिदम्', 'ममेदम्', १७, १८.
अहङ्कारः, १९, ४०, ४८, ६४, ७५, ७८, ८४.
अहङ्कारग्रन्थिः, ६०, ६६, ७०, ७४, ९८.
अहङ्काराध्यासः, ६४, ७८.

अहंप्रत्ययः, ८४, १०५, १०६.

अहंप्रत्ययविषयः, १०५, १०६.

अहंप्रत्ययी, ६४, ७४.

अहमध्यासे दृष्टान्तः, ६५, ६८.

आकाशम्, ४७.

आच्छादकत्वम्, ३३, ७२.

आत्मैकत्वविद्याप्रतिपत्तिः, ८५, ९८.

आत्मानात्मनोर्विरोधः, ४.

आलम्बनम् (मिथ्याज्ञानस्य), २९, ३०.

इतरेतरभावः, ४.

इतरेतराध्यासः, ७५.

उपादानम्, १९.

उपासनानि, १००.

कर्तृत्वभोक्तृत्वप्रवर्तनः, ८१.

कारणम्, ४७.

कारणदोषः, २९, ३०, ३३, ५८.

कार्यनिष्ठो वेदः, १०४.

चैतन्यस्था अविद्याशक्तिः, ३०.

जडम्, १९.

जडरूपम्, ६६.

जडात्मिका (अविद्याशक्तिः), १९.

जीवः, ३३, ५५, ६४.

जीवस्य ब्रह्मात्मतावगतिपर्यन्तानि वाक्यानि १०८.

ज्ञानम्, २९.

ज्ञानं क्रियारूपमपि न चोदनातन्त्रम्, ११७.

ज्ञानाभ्यासः, ९७.

तटस्थं ब्रह्म, १०८.

तत्त्वावद्योतिशब्दः, ८६.

तमः, ४७, ६४.

तर्कः, ९१, ९२, १०६.

तिमिरादिः, ३३.

दोषः, ३१, ३३.

नामरूपम्, ४७.

निद्रा, ४७.

निमित्तम्, १९.

निरुपाख्यता, ३०.

नेदं रजतम्, ८६.

नैसर्गिकः, १७, १८, १९, ३३, ७७, ७८.

परिनिष्ठिते वस्तुनि श्रुतिप्रामाण्यम्, ११०.

परस्परानात्मता, ४.

परस्परसंभेदः, ४.

परोक्षं ज्ञानम्, ९४.

पूर्वदृष्टावभासः, २८.

प्रकाशाच्छादनम्, ३३, ४१, ४८, ५५, ६४.

प्रकृतिः, ४७.

प्रतिबिम्बम्, ६७.

प्रत्यगात्मा, ६०.

प्रत्यगात्मप्रसिद्धिः, ७१.

प्रमातृत्वम्, ५८.

प्रमाणादिचतुष्टयम्, ९१, ११३.

प्रमाणानि, ५८, ५९.

प्रहाणमनादेः, ८४.

प्राज्ञः, ६०.

भयसंस्कारः, ९८.

भोक्त्रादिग्रन्थिः, ९८.

मनुष्य इत्यभिमानः, १७, १९.

माया, ४७.

मायावच्छिन्नरूपः, ३४.

मायामयम्, ३०.

मिथ्या, १६, ३०.

मिथ्याज्ञानम्, १९, २९.

मिथ्याप्रत्ययरूपः, ८०.
मिथ्यारजतम्, २९.
मिथ्यार्थावभासः, १९, ३०.
मिथ्यावलम्बनम्, २९, ३०.
युक्तिः, १०६, १०७.
युष्मदर्थः, ७५, ७७.
लयः, ४७.
लोकव्यवहारः, १७, १९, ७८.
विक्षेपः, १९.
विज्ञानघनः, ६०.
विद्या, ७३, ९१.
विद्यायाः प्रतिष्ठा, ९१.
विरोधः, ४.
व्यवहारयोग्यत्वम् (आत्मनः), ९.
शक्तिः, ४७.
शब्दः, ११०.
शास्त्रम्, १०७.
शास्त्रं प्रति कारणत्वं ब्रह्मणः, १०७.
शास्त्रप्रमाणत्वं ब्रह्मणः, १११, ११३.
श्रुतिप्रामाण्यम्, १११, ११३.
संस्कारः, २९, ३१, ६०, ६७, ९८.
संस्कारमात्रशेषत्वम् (अविद्यायाः), १९, ४१.
सत्यम्, ७७.
समन्वयः, ११४.
समन्वयसूत्रभाष्यस्थवाक्यानि, १०८.
सर्वज्ञत्वादिस्वभावत्वे समन्वयः, ११४.
सर्वे वेदान्ताः, १००.
सहानवस्थानम्, ४.
साक्षात्कारः, ९७.
साक्षादनुभवः, ९२, ९४.
साक्षी, ७४-७५.
सादृश्यादिः, ३३.
सुषुप्तम्, १९, ४१, ४८, ६०.
'सोऽयम्' इत्यादिवाक्यम्, ११३.
स्मृतिः, २८.
स्मृतिरूपः, २८.
स्वयञ्ज्योतिः, ३३, ६४.
स्वयंप्रकाशमानः, ४८.
स्वयंप्रसिद्धः, ७१.
स्वरूपतोऽप्यध्यस्तम्, ७७.
स्वरूपसत्तामात्रानुबन्धी, १९.


---

१०००—२०-७-१९६६. अध्यात्मप्रकाशमुद्रणालयः, होळेनरसीपुरम्.

शुद्धशाङ्करप्रक्रियाप्रकाशकाः

# कतिचन वेदान्तग्रन्थाः

## १. उपनिषद्भाष्याणि

अध्यात्मप्रकाशकार्यालयप्रकाशितेषु उपनिषद्भाष्येषु विशेषोऽयं यत् (१) विषयानुसारेण प्रविभक्तग्रन्थशरीरत्वम् , (२) तत्तद्विभागप्रतिपाद्यविषयसूचकशिरोलेखनिवेशः, (३) पाठान्तरनिर्देशभाष्यान्तरसंवादादिस्थलसूचनापूर्वकं हितमिताद्यष्टिप्पणदानम् , (४) विचारप्रचोदिका पीठिका, (५) उपनिषन्मूलस्य स्थूलाक्षरैः (20 Pt.); भाष्यस्य मध्यगात्राक्षरैः (16 Pt. Roman), टिप्पणस्य भूमिकायाश्च कृष्णतरसूक्ष्माक्षरैः (12 Pt Antique), उपनिषत्सारादिपरिशिष्टभागस्य च सामान्यसूक्ष्माक्षरैः (12 Pt. Roman) – इति चैवं विविधगात्रस्फुटाक्षरैरङ्कनं च इति । सुन्दरसीसकाक्षरैः शुक्लमसृणपत्रे मुद्रापितानामप्येषां पुस्तकानां गात्राकारानुगुण्येन परिमितमूल्येनैव वितरणे प्रयत्नः कृतः । सर्वत्र टिप्पणं व्याख्यानादिकं च नूत्नतया श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिरनुगृहीतम् ॥

### ईशावास्योपनिषद्भाष्यम् (1932)

समूला सभाष्यटिप्पणयुता च । उपनिषदो माध्यन्दिनपाठोऽपि दत्तः । जिज्ञासूपयोगिमन्त्रानुक्रमणिका शब्दसूच्यादिसमेतं विचारप्रचोदकपीठिकायुक्तं चेदं संस्करणम् ॥

क्रौन् अष्टपार्श्वात्मक ५६ पृष्ठात्मकस्य इदानींतनं मूल्यम् ०-५० पैसे.

### केनोपनिषद्भाष्यम् (1959)

ईशावास्यभाष्यवदेव सर्वपरिकरोपेतम् , पदभाष्यं वाक्यभाष्यं च । पदभाष्यवाक्यभाष्यगतानामभिप्रायाणां परस्परतुलनात्मकविमर्शोऽपि टिप्पण्यां पीठिकायां च तत्र तत्र संयोजितोऽत्र ॥

डेमि अष्टपार्श्वात्मक २०+११२ पृष्ठात्मकस्य मूल्यम् रू. २-००

### काठकोपनिषद्भाष्यम् (1962)

केनभाष्यवदेव सर्वपरिकरोपेतम् ॥

डेम्मि अष्टपार्श्वात्मक ३४+१५६ पृष्ठात्मकस्यास्य मूल्यम् रू. ३-२५.

### मुण्डकोपनिषद्भाष्यम् (1960)

कठभाष्यवत् सर्वपरिकरोपेतम् । पीठिकायां न केवलं भाष्यविषयविवेचनम् , किं तु भाष्यतट्टीकाकारयोः मतभेदविमर्शनं च कृतमत्र ॥

डेम्मि अष्टपार्श्वात्मकं २२-१२४ पृष्ठपरिमितस्यास्य पुस्तकस्य मूल्यम् रू. २-५०.

## तैत्तिरीयोपनिषच्छीक्षावल्लीभाष्यम् (1961)

टिप्पण्यादि सर्वपरिकरोपेतं मुण्डकभाष्यवत् ॥

डेम्मि अष्टपार्श्वात्मक २४+७६ पृष्ठात्मकस्य पुस्तकस्यास्य मूल्यम् रू. १-७५.

## तैत्तिरीयोपनिषद्भाष्यम् (1962)

'आनन्दवल्ली भृगुवल्ली च' इतिवल्लीद्वयव्याख्यानरूपम् । श्रीसच्चिदानन्देन्द्रसरस्वतीनिर्मितया **भाष्यार्थविमर्शिनीनाम्न्या व्याख्यया सहितम्** । अर्वाचीनमतान्तरप्रविष्टवेदान्तिभिरुत्थाप्यमानशङ्कातङ्कनिरसनपूर्वकं भाष्यविरुद्धव्याख्यापङ्ककलङ्कप्रक्षालनेन विशुद्धशाङ्करप्रक्रियायाः श्रैष्ठ्यं सम्यगाविष्कृतम् । व्याख्यायां चास्यां भगवत्पादीयभाष्यान्तराणि, उपदेशसाहस्री, तैत्तिरीयबृहदारण्यकवार्तिके, वेदान्तार्थसंप्रदायविदां श्रीगौडपादाचार्याणां माण्डूक्यकारिकाश्च – इत्येते एव ग्रन्थाः प्रमाणत्वेन गृहीताः शुद्धसंप्रदायानुसारिप्रक्रियानिर्धारणार्थम् ॥

पुस्तकस्यान्ते अनुवाकसूची, उपनिषत्खण्डसूची, अर्थनिर्देशपूर्वकं भाष्यस्थमुख्यशब्दानां सूची, विमर्शिनीगतमुख्यविषयसूची च – इत्येता वर्णानुक्रमसूच्यो निवेशिताः । आंग्लगैर्वाणभूमिकयोः भाष्यगता मुख्यविषयाः सप्रपञ्चं परिशीलिताः–इति सर्वाङ्गसुन्दरं परिष्करणमिदम् ॥

डेम्मि अष्टपार्श्वात्मक ४०+४०८ पृष्ठपरिमितस्य पुस्तकस्यास्य मूल्यम् रू. ८-५०.

## माण्डूक्यरहस्यविवृतिः (1958)

श्रीसच्चिदानन्देन्द्रसरस्वतीभिर्निर्मिता माण्डूक्योपनिषत्कारिकाव्याख्येयम् । अन्वर्थाभिधानायाम् अस्यां व्याख्यायां माण्डूक्योपनिषदि तत्कारिकासु च श्रीगौडपादाचार्यप्रणीतासु गर्भीकृतानि नैकानि रहस्यानि सांप्रदायिकवेदान्तप्रक्रियानुसारेण विवृतानि । उपनिषदः कारिकाणां च भाष्याक्षराण्युपजीव्यैव व्याख्या प्रतानिता तत्र तत्र प्रस्थानत्रयभाष्यस्थवाक्यान्तरसज्ञानेन । विशिष्य च अलातशान्तिप्रकरणे अधुनातनविमर्शकोत्थापितसौगतमतसंक्रान्तिशङ्कानिरसनपूर्वकं श्रीगौडपादाचार्याणां परमाशय आविष्कृतः, यथा चतुर्ष्वपि प्रकरणेषु सांप्रदायिकप्रक्रियाया गतिसामान्यं जिज्ञासुजनहृदयमागच्छेत् । आंग्लभाषामय्या गैर्वाणवाणीमय्या च भूमिकया वेदान्तसंप्रदायगतप्रक्रियाया माद्यमानिकप्रक्रियातो वैलक्षण्यं स्फुटितम् ॥

डेम्मि अष्टपार्श्वक १२८+४९० पृष्ठपरिमितस्यास्य पुस्तकस्य मूल्यम् रू. १२-००.

## गीताशास्त्रार्थविवेकः (1966)

श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिरनुगृहीतोऽयं ग्रन्थः । अल्पकायेनाप्यनेन प्रकरणेन सुचिन्तितेन, श्रीशङ्करभगवत्पादभाष्यादत एव वेदान्तार्थो गीताचार्यानुगृहीत इति, स एव चानुसृतः परमपुरुषार्थदायी इति च जिज्ञासवो निःसंशयं विजानीयुः । अत्र प्रप्रथमं साङ्ख्य-योग-कर्म-ध्यान-ज्ञानादिपदार्थानां विवेकः कृतः । तदनु च कर्मयोग-ध्यानयोग-

भक्तियोग-ज्ञानयोगानां परस्परसंबन्धो निरूपितः । परिशिष्टे च भागे साङ्ख्ययोगदर्शनाभ्यां गीतादर्शनस्य सालक्षण्यवैलक्षण्ये विवेचिते येन स्पष्टं विज्ञायेत सर्ववेदान्तसिद्धान्त एव परिशुद्धः स्वीकृतोऽत्र शास्त्रे इति ॥

क्रौन् अष्टपार्श्वक २०+१९० पृष्ठपरिमितस्यास्य पुस्तकस्य मूल्यम् रू. २-२५.

## सुगमा (1955)

अध्यासभाष्यव्याख्या श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिर्विनिर्मिता । प्रचलित-व्याख्यानानां भिन्नभिन्नप्रस्थानावलम्बनत्वात् शुद्धं शाङ्करदर्शनं कीदृशम्, कथं च तदविवादम्, अविरुद्धं च स्यादिति संशयानानां मनःसमाधानाय प्रस्थानत्रयभाष्यैककण्ठ्यम् आदर्शयन्ती सार्वत्रिकानुभवानुसारिवेदान्तप्रक्रियाप्रख्यापनी इयं व्याख्या ॥

क्रौन् अष्टपार्श्वक १६+१३३ पत्रात्मकस्य पुस्तकस्य मूल्यम् रू. १-५०.

## सूत्रभाष्यार्थतत्त्वविवेचनी (1964)

जिज्ञासाधिकरणभाष्यस्य नूतनेयं व्याख्या श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिः प्रणीता । सार्वत्रिकानुभवानुसारि शाङ्करं प्रस्थानं स्वासाधारणधर्मविशिष्टं व्याख्यानगत-प्रस्थानान्तरकलङ्करहितं दूरीकृतभाष्यान्तरदुराक्रमं च परिशुद्धरूपेणाविष्कृतमत्र ॥

क्रौन् अष्टपार्श्वात्मक १६ +१२२ पृष्ठात्मकस्य पुस्तकस्यास्य मूल्यम् रू. १-७५.

## सूत्रभाष्यार्थतत्त्वविवेचनी (1965)

जन्माद्यधिकरणभाष्यव्याख्या सच्चिदानन्देन्द्रसरस्वतीविरचिता । यथैव जिज्ञासाधिकरण-व्याख्यायां ब्रह्मज्ञानसतत्त्वनिर्धारणं कृतम्, एवमेवात्र जगज्जन्मादिकारणसतत्त्वनिर्धारणं कृतम् सर्ववेदान्तादृताम् अध्यारोपापवादप्रक्रियामनुसृत्य । परिशिष्टे च जिज्ञासाधिकरण-भाष्यव्याख्यायामिव सूत्रार्थसंबद्धाः केचन विषयाः भगवत्पादसंमतां वेदान्तप्रक्रियां निर्दिधारयिषूणाम् उपकाराय विचारिताः ॥

क्रौन् अष्टपार्श्वात्मक १८ +१४५ पृष्ठात्मकस्य पुस्तकस्यास्य मूल्यम् रू. २-००.

## वेदान्तप्रक्रियाप्रत्यभिज्ञा (1964)

श्रीसच्चिदानन्देन्द्रसरस्वतीभिर्विनिर्मितोऽयं स्वतन्त्रो निबन्धः । तत्रास्मिन् प्रथमे सम्पुटे सर्वत्र वेदान्तेषु अध्यारोपापवादन्यायाश्रया एकैव प्रक्रिया प्राधान्येन परिगृहीतास्ति वेदान्ताभियुक्तैरित्येतद्दर्शितमत्र । अस्याः प्रक्रियाया अनादरादेव हेतोः सर्वेऽपि वावदूकाः वेदान्तोपदिष्टमात्मैकत्वमनुभवारूढमापादयितुं नाशक्नुवन्नित्येतच्च निदर्शितम् अतिप्राचीन-कालादारभ्य सर्वज्ञात्ममुनिसमयपर्यन्तवृत्तवेदान्तविचारेतिहाससङ्क्षेपोपस्थापनेन ॥

विस्तृताङ्गलभाषामयभूमिकया संस्कृतभाषामयभूमिकया च समलङ्कृतम्, प्रधान-विषयानुक्रमणिकासहितं च । डेम्मि अष्टपार्श्वात्मक १५०+ ६७२ पृष्ठात्मकस्य पुस्तकस्यास्य मूल्यम् रू. १६-००

## शुद्धशाङ्करप्रक्रियाभास्करः (1964)

वेदान्तसिद्धान्तनिर्णयः, शाङ्करसंप्रदायनिर्णयश्च-इति किरणद्वयात्मकः प्रथमो भागः। अल्पकायस्य (क्रौन् २४ पत्रपार्श्वात्मकस्य) अस्य मूल्यम् ०-४०.

## शुद्धशाङ्करप्रक्रियाभास्करः (1964)

अस्मिन् द्वितीये भागे शाङ्करवेदान्तमर्यादा, शाङ्करवेदान्तप्रक्रियास्वरूपम्, अध्यारोपापवादविशेषाश्च-इत्येते विषयाः प्रतिपादिताः। अल्पकायस्य (क्रौन् २८ पत्रपार्श्वात्मकस्य) अस्य भागस्य मूल्यम् रू. ०-६०.

## शुद्धशाङ्करप्रक्रियाभास्करः (1965)

अस्मिन् तृतीये भागे – शाङ्करप्रस्थानस्य प्रस्थानान्तरेभ्यो वैलक्षण्यं स्फुटितम्, शाङ्कराद्वैतस्य बौद्धमतसाम्यशङ्का च परिहृता । अस्य ( ५० पत्रपार्श्वात्मकस्य ) मूल्यम् रू. ०-६०.

## वेदान्तडिण्डिमः (1935)

सुप्रसिद्धमिदं प्रकरणं भावबोधिन्याख्यया व्याख्यया सहितम्। व्याख्यायां ललितया शैल्या श्रुतिप्रमाणवचनोदाहरणपूर्वकं श्लोकार्थो विवृतः। युक्त्या समुपबृंहितश्च। मूल्यम् रू. १-००.

## वेदान्तबालबोधिनी (1950)

श्रीशङ्करभगवत्पादविरचितप्रातःस्मरणस्तोत्रस्य प्रश्नोत्तररूपा व्याख्या। वेदान्तार्थमननमार्गं प्रविविक्षूणां कृते विरचितेयं विद्वज्जनमनोरञ्जन्यपि। क्रौन् अष्टपार्श्वात्मक-५४ पत्रपृष्ठमितस्यास्य मूल्यम् रू. ०-७५.

## वेदान्तविद्वद्गोष्ठी (1962)

शाङ्करभाष्यतद्व्याख्यानप्रस्थानयोर्वैलक्षण्यमधिकृत्य एकादशविद्वत्प्रकाण्डानामभिप्रायाः अत्र प्रत्ताः। विद्वदभिप्रायसंग्राहिका आंग्लभूमिकाविभूषितस्यास्य डेम्मि अष्टपार्श्वक-५४+९८मितपत्रपृष्ठात्मकस्य पुस्तकस्य मूल्यम् रू. २-७५.

सर्वेषामपि पुस्तकानां प्रापणव्ययस्तु पृथगेव

प्रापणस्थानम्

## अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्.

( हासनजिल्ला, मैसूरुप्रान्तः, दक्षिणरेल्वे )

# ENGLISH BOOKS

NᾹRADA'S APHORISMS ON BHAKTI (1938)

With Text and Translation. The book will serve as a valuable guide to those who wish to tread the path of Bhakti. Rs. 0-50

AVASTHA-TRAYA *OR*
THE UNIQUE METHOD OF VEDANTA (1937)

A valuable Introduction to the study of Vedanta as pure philosophy. Rs. 0-40

MINOR WORKS OF SRI S'HANKARACHARYA (1942)

Here are 16 of the most popular minor works of Shankara with English translation. Rs. 1-25

HOW TO RECOGNIZE THE METHOD OF VEDANTA

The first sustained attempt to reduce all the seemingly various methods of the Upanishads to the only comprehensive one. Contains a brief account of the history of Vedantic thought up to the time of Sarvajnatma Muni. Rs. 2-25

VEDANTA *OR* THE SCIENCE OF REALITY (1965)

By K. A. Krishnaswamy Iyer. With a Foreword by Dr. S. Radhakrishnan, M.A., (Now, the President of the Republic of India). Second Revised Edition revised by Swami Satchidanandendra Saraswati. This is a work dealing with the immediate realization of Brahman by pure reflexion on the witness of the three states. It sets out the basis of all religions and the meaning of all experience. Faith is justified by reason, and Etihcs is placed on firm ground. All Systems of Thought, Eastern and Western, have been examined to prove the truths of Vedanta. Rs. 20-00

Foreign price calculated at 2 Sh. per Rupee.

*Apply to* :

THE SECRETARY,
ADHYATMA PRAKASHA KARYALAYA,
HOLENARSIPUR. (Hassan Dist., Mysore State.)

This is the first sustained effort to compare and contrast '**the Pancapadika**' with Sri S'aṅkara's Bhashya and to convince the critical reader that they actually present two distinct systems diametrically opposed to each other on the cardinal tenets of Vedanta. Basing himself on a close study of numerous passages culled from the Bhashya, the author has tried to persuade Pandits and Professors that the study of these as two independent systems without interblending is quite essential for a correct and fruitful understanding of S'aṅkara's teachings.

# THE
# ADHYATMA PRAKASHA KARYALAYA

( ESTABLISHED 1920 )

**HOLENARSIPUR. (Hassan Dist., Mysore State.)**

An Institution to help the interpretation of Indian Culture by stimulating the study and practice of the Adhyatma Vidya — Philosophy and Religion in its universal aspect — especially as revealed in the Upanishads and allied literature.

1. Has so far Published more than ONE HUNDRED AND THIRTY BOOKS in Kannada, English and Sanskrit.

2. Arranges for frequent DISCUSSIONS, DISCOURSES, and PUBLIC LECTURES; VEDANTA CLASSES in the morning form a regular feature.

3. Has a free lending LIBRARY and a READING ROOM for the public.

4. Conducts a Kannada Monthly Magazine called the "ADHYATMA PRAKASHA", devoted to Gnana, Bhakti and Vairagya.

5. Maintains a VEDANTIC COLLEGE for training up model students for the dissemination of Vedantic ideas.

6. Has a TEMPLE dedicated to the service of Sri Digvijaya Rama.

Please apply to the Manager
for fuller information.